भिरूढ, एवंभूत । अब इन नयोंके लक्षण क्या है । इसलिये कहते हैः—निगमोंमें (शास्त्रोंमें) जो शब्द कहे गये है, उनके अर्थ, और शब्द तथा अर्थका जो ज्ञान है वह एकदेशसे ग्राही वा समग्ररूपसे ग्राही नैगम है । अर्थोंका सब रूपसे वा एकदेशसे जो संग्रह है, उसको संग्रह कहते है । लौकिकके समान उपचारसे बहुधा पूर्ण और विस्तृत अर्थका बोधक जो है वह व्यवहार नय है । विद्यमान साप्रतिक अर्थोंका अभिधान अथवा परिज्ञान जो है, उसको ऋजुसूत्र कहते है । और यथार्थ वस्तुका कथन वा नाम जो है, उसको शब्दनय कहते है । नामादिकमें प्रसिद्ध पूर्व शब्दसे जो शब्दार्थमें प्रत्यय अर्थात् ज्ञान है, वह साप्रत शब्द नय है । विद्यमान अर्थोंमें जो असंक्रम है, वह समभिरूढ शब्द-नय है । और व्यञ्जन तथा अर्थमें जो प्रवृत्त है, वह एवभूतनय है ॥ ३५ ॥

भाष्यम्—अत्राह । उद्दिष्टा भवता नैगमादयो नया । तन्नया इति क पदार्थ इति । नया प्रापका कारका साधका निर्वर्तका निर्भासका उपलम्भका व्यञ्जका इत्यनर्थान्तरम् । जीवादीन्पदार्थान्नयन्ति प्राप्नुवन्ति कारयन्ति साधयन्ति निर्वर्तयन्ति निर्भासयन्ति उपलम्भयन्ति व्यञ्जयन्तीति नया ॥

अब यहांपर कहते है, कि आपने नैगम आदि नयोंका सकीर्तन किया, अब उन नयोंमें नयत्व क्या पदार्थ है? अर्थात् यहां नयशब्दका व्युत्पत्तिलभ्य अर्थ क्या है? इसका उत्तर कहते है.– नय, प्रापक (अर्थविशेषको प्राप्त करानेवाले) कारक (विशेष कार्यके करनेवाले) साधक, निर्वर्त्तक, निर्भासक (किसी अर्थके प्रकाशक) उपलम्भक, तथा व्यञ्जक ये सब पर्यायवाचक वा समानार्थक शब्द है । जो जीवादि पदार्थोंको प्राप्त करते है, प्राप्त होते है, कराते है, सिद्ध करते है, व्यवहारमें वर्त्ताते है, प्रकाशित करते है, उपलब्ध करते है, और प्रकट करते है, वे नय है । तात्पर्य यह कि नयशब्दका प्रापक, कारक तथा साधक आदि अर्थ है ।

भाष्यम्—अत्राह । किमेते तन्त्रान्तरीया वादिन आहोस्वित्स्वतन्त्रा एव चोदकपक्षग्राहिणो मतिभेदेन विप्रधाविता इति । अत्रोच्यते । नैते तन्त्रान्तरीया नापि स्वतन्त्रा मतिभेदेन विप्रधाविताः । ज्ञेयस्य त्वर्थस्याध्यवसायान्तराण्येतानि । तद्यथा । घट इत्युक्ते योऽसौ चेष्टाभिर्निर्वृत्त ऊर्ध्वकुण्डलौष्ठायतवृत्तग्रीवोऽधस्तात्परिमण्डलो जलादीनामाहरणधारणसमर्थ उत्तरगुणनिर्वर्तनानिर्वृत्तो द्रव्यविशेषस्तस्मिन्नेकस्मिन्विशेषवति तज्जातीयेषु वा सर्वेष्वविशेषात्परिज्ञानं नैगमनय । एकस्मिन्वा बहुषु वा नामादिविशेषितेषु साम्प्रतातीतानागतेषु घटेषु सम्प्रत्ययः सङ्ग्रहः । तेष्वेव लौकिकपरीक्षकग्राह्येषूपचारगम्येषु यथास्थूलार्थेषु संप्रत्ययो व्यवहारः । तेष्वेव सत्सु साम्प्रतेषु संप्रत्यय ऋजुसूत्रः । तेष्वेव साम्प्रतेषु नामादीनामन्यतमग्राहिषु प्रसिद्धपूर्वकेषु घटेषु सम्प्रत्यय साम्प्रत शब्द. । तेषामेव साम्प्रतानामध्यवसायासङ्क्रमो वितर्कध्यानवत् समभिरूढः । तेषामेव व्यञ्जनार्थयोरन्योन्यापेक्षार्थग्राहित्वमेवम्भूत इति ॥

यहांपर यह शंका करते है, कि ये नय है, सो जैनतन्त्र (शास्त्र) से भिन्न जो कणाद आदिके शास्त्र वैशेषिक आदि है, उनमें कुशल जो वादी है उनके संकेत है अर्थात् वैशेषिकतन्त्रवादीजन इनको नय कहते है ? अथवा स्वतन्त्र (निज जैनशास्त्र) के सकेतसिद्ध चोदक पक्षग्राही अर्थात् दुरुक्त विषयके सूचक पक्षको ग्रहण करनेवाले अयथार्थ अर्थको मतिभेदसे कहनेकेलिये सहसा प्रवृत्त होनेवाले ये नय है? इसका समाधान करते हैं, कि ये नय कणाद वैशेषिक आदि शास्त्रोंके नही है, और स्वतत्र मतभेदसे अयथार्थ अर्थके निरूपणकेलिये भी नही दौड पडे है, किन्तु ज्ञेय जीवादिक पदार्थोके बोध करानेको उपाय विशेष ये नैगमादि नय है। जैसे घट (घटा) ऐसा कहनेपर कुंभकारकी चेष्टाओंसे उत्पन्न उर्ध्वदेशमें कुंडलाकार, विस्तृत, ओष्टसहित, वर्तुलाकार, ग्रीवायुक्त, अधोदेशमे परिमडलाकार, जलादि द्रवीभूत पदार्थोके आनयन तथा धारणादि कार्योमें समर्थ, तथा उत्तरोत्तर पाकजनित रक्तादिगुणोकी समाप्तिसिद्ध जो द्रव्य विशेष है उस एकमे वा उस जातिके सम्पूर्ण घटोंमें अविशेषरूपसे जो परिज्ञान है, वह **नैगम** नयका विषय है। तथा एक अथवा अनेक वर्तमान, अतीत, अनागत (होनेवाले) नाम आदिसे विशेषित घटोंका जो ज्ञान है, वह **संग्रह**नय है, अर्थात् सग्रहनयका विषय है। और लौकिक परीक्षाओंसे ग्रहण करने योग्य उपचारसे जानने योग्य उन्ही घटोंमें स्थूल पदार्थोंके तुल्य जो ज्ञान है वह **व्यवहार** नय है। तथा वर्तमान कालमे विद्यमान उन्ही घटोंमें जो ज्ञान है वह **ऋजुसूत्र** नयका विषय है। तथा नामादिमेसे किसी एकके द्वारा ग्राह्य और प्रसिद्धिपूर्वक उन्ही वर्तमानकालिक घटोमें जो ज्ञान है वह **सांप्रत शब्द** नयका विषय है। और वितर्क ध्यानके समान उन्ही साप्रत घटोंमें अध्यवसाय (निश्चयात्मक ज्ञान) का जो असक्रम है वह **समभिरूढ** नय है। और उन्हींमे व्यञ्जन तथा अर्थकी परस्पर अपेक्षासे जो पदार्थग्राहकता है, वह **एवंभूत** नयका विषय है।

भाष्यम्—अत्राह। एवमिदानीमेकस्मिन्नर्थेऽध्यवसायनानात्वान्ननु विप्रतिपत्तिप्रसङ्ग इति। अत्रोच्यते। यथा सर्वमेक सदविशेषात् सर्वं द्वित्वं जीवाजीवात्मकत्वात् सर्वं त्रित्वं द्रव्यगुणपर्यायावरोधात् सर्वं चतुष्ट्वं चतुर्दर्शनविषयावरोधात् सर्वं पञ्चत्वमस्तिकायावरोधात् सर्वं षट्त्वं षड्द्रव्यावरोधादिति। यथैता न विप्रतिपत्तयोऽथ चाध्यवसायस्थानान्तराण्येतानि तद्वन्नयवादा इति। किं चान्यत्। यथा मतिज्ञानादिभिः पञ्चभिर्ज्ञानैर्धर्मादीनामस्तिकायानामन्यतमोऽर्थ पृथक् पृथगुपलभ्यते पर्यायविशुद्धिविशेषादुत्कर्षेण न च ता विप्रतिपत्तयः तद्वन्नयवादाः। यथा वा प्रत्यक्षानुमानोपमानाप्तवचनैः प्रमाणैरेकोऽर्थः प्रमीयते स्वविषयनियमात् न च ता विप्रतिपत्तयो भवन्ति तद्वन्नयवादा इति। आह च -

अब यहांपर कहते है, कि एक ही पदार्थमें ज्ञानकी अनेकता (नैगम सग्रह आदि रूपसे अनेक ज्ञानविषयता) होनेसे विवादका प्रसङ्ग हो गया, अर्थात् कीदृशज्ञानसे यहा-

पर घट ग्राह्य है ? इस प्रकार विवाद प्राप्त हुआ। इसका उत्तर कहते हैः— सर्व एक ही है, क्योंकि सत्स्वरूपसे सबमें अभेद है, अर्थात् सद्रूपसे सब अभिन्न है। जैसे जो सत् है धर्म सत् है, अधर्म सत् है, आकाश सत् है, इस प्रकार सत्स्वरूपसे किसीमें भेद नहीं है। तथा सब द्विविध है, क्योंकि सब कुछ चेतन और अचेतनमय है, चेतन और अचेतनसे भिन्न कुछ नहीं है, इसलिये चेतन और अचेतन भेदसे सब द्विविध है। तथा सब त्रित्व संख्यायुक्त है, क्योंकि द्रव्य, गुण और पर्यायरूप ही समस्त लोक है। द्रव्य गुण और पर्याय इनसे भिन्न कुछ नहीं है, इसलिये सब जगत त्रिविध है। तथा सब चार संख्या युक्त है, क्योंकि चक्षुदर्शन अचक्षुदर्शन, अवधिदर्शन तथा केवलदर्शन इन चार प्रकारके दर्शनविषयोंमे सब गतार्थ है। तथा सब कुछ पंचसंख्यामय है, क्योंकि जीवास्तिकायादि पंचास्तिकायमें सब गतार्थ है। तथा सब कुछ षट्संख्यामय है; क्योंकि षड्द्रव्यमे सब अन्तर्भूत है। जैसे एकत्व, द्वित्व आदि विवादके स्थान नहीं है, किन्तु कथन तथा ज्ञानकी भिन्न २ परिपाटी है, ऐसे ही नयवाद भी है। **किं च** दूसरी यह भी वार्त्ता है, कि जैसे मतिज्ञान आदि पाच ज्ञानोसे धर्मास्तिकाय आदि पंचास्तिकायोंमे कोई एक अस्तिकायरूप पदार्थ पर्यायविशुद्धि तथा उत्कर्षसे पृथक् २ उपलब्ध होता है, और वह पृथक् २ उपलब्धि विप्रतिपत्ति नहीं है, ऐसे ही नयवाद भी है। अर्थात् पृथक् २ नयसे भिन्न प्रकारसे पदार्थोंके स्वरूप जाने जाते है, इसमे कुछ विवाद नहीं है। अथवा जैसे निज २ विषयके नियमसे प्रत्यक्ष अनुमान उपमान तथा आप्तवचनसे एक ही पदार्थ प्रमाण साक्षात् विषयीभूत किया जाता है, किन्तु वह अनेक प्रमाणोंमे एक पदार्थकी प्रमिति विवाद नहीं है। ऐसे ही नयवाद भी है। अब इस विषयमें सक्षिप्त रुचिवालेको बोध करानेके अनुग्रहसे आर्याद्वारा कहते है, —

नैगमशब्दार्थानामेकानेकार्थनयगमापेक्ष[१]।
देशसमग्रग्राही व्यवहारी नैगमो ज्ञेय ॥ १ ॥
यत्सङ्गृहीतवचनं सामान्ये देशतोऽथ च विशेषे।
तत्सङ्ग्रहनयनियत ज्ञानं विद्यान्नयविधिज्ञ ॥ २ ॥
समुदायव्यक्त्याकृतिसत्तासञ्ज्ञादिनिश्चयापेक्षम्।
लोकोपचारनियतं व्यवहारं विस्तृतं विद्यात् ॥ ३ ॥
साम्प्रतविषयग्राहकमृजुसूत्रनयं समासतो विद्यात्।
विद्याद्यथार्थशब्दं विशेषितपदं तु शब्दनयम् ॥ ४ ॥ इति ॥

निगमजन पदमे होनेवाले शब्द और उनके अर्थोंको नैगम, और उन नैगम शब्दार्थोंमेसे एक विशेष तथा अनेक सामान्यविषयों वा अर्थोंके एकदेशसे वा समग्ररूपसे ग्रहण करानेमे जो समर्थ है, उसको व्यवहारी **नैगम** कहते है ॥ १ ॥

---

१ द्रव्यसमूह।

सामान्य विषयमें वा विशेषके विषयमें जो संगृहीतका वचन अभिधान है, उस संग्रह नयके नियत ज्ञानकी नयविधि जाननेवालेको **संग्रह** नय जानना चाहिये ॥ २ ॥

समुदाय, व्यक्ति, आकृति, सत्ता और संज्ञा अर्थात् नाम स्थापना द्रव्य और भाव आदिके निश्चयकी अपेक्षा रखनेवाला, तथा लौकिक उपचारसे जो नियत है, उसको वि-स्तृत **व्यवहार** नय जानना चाहिये ॥ ३ ॥

और संक्षेपसे साम्प्रतविषयका जो ग्राहक है, उसको **ऋजुसूत्र** नय जानना चाहिये। तथा यथार्थविषयक साम्प्रतसमभिरूढ और एवंभूत इत्यादि पदोंसे जो विशेषित उ-सको **शब्द** नय जानना चाहिये ॥ ४ ॥

भाष्यम्—अत्राह । अथ जीवो नोजीव अजीवो नोऽजीव इत्याकारिते केन नयेन कोऽर्थः प्रतीयत इति । अत्रोच्यते । जीव इत्याकारिते नैगमदेशसङ्ग्रहव्यवहारर्जुसूत्रसाम्प्रतसमभिरूढै पञ्चस्वपि गतिष्वन्यतमो जीव इति प्रतीयते । कस्मात् । एते हि नया जीव प्रत्यौपशमिकादियुक्तभावग्राहिण. । नोजीव इत्यजीवद्रव्य जीवस्य वा देशप्रदेशौ । अजीव इत्यजीवद्रव्यमेव । नोऽजीव इति जीव एव तस्य वा देशप्रदेशाविति ॥ एवम्भूतनयेन तु जीव इत्याकारिते भवस्थो जीव प्रतीयते । कस्मात् । एष हि नयो जीव प्रत्यौदयिकभावग्राहक एव । जीवतीति जीव प्राणिति प्राणान्धारयतीत्यर्थ. । तच्च जीवन सिद्धे न विद्यते तस्माद्भवस्थ एव जीव इति । नोजीव इत्यजीवद्रव्य सिद्धो वा । अजीव इत्यजीवद्रव्यमेव । नोऽजीव इति भवस्थ एव जीव इति । समग्रार्थग्राहित्वाच्चास्य नयस्य नानेन देशप्रदेशौ गृह्येते । एवं जीवौ जीवा इति द्वित्वबहुत्वाकारितेष्वपि । सर्वसङ्ग्रहणे तु जीवो नोजीव अजीवो नोऽजीव जीवौ नोजीवौ अजीवौ नोऽजीवौ इत्येकद्वित्वाकारितेषु शून्यम् । कस्मात् । एष हि नय. सङ्ख्यानन्त्याज्जीवानां बहुत्वमेवेच्छति यथार्थग्राही । शेषास्तु नया जात्यपेक्षमेकस्मिन्बहुवचनत्वं बहुषु च बहुवचनं सर्वाकारितग्राहिण इति । एवं सर्वभावेषु नयवादाधिगमः कार्य. ।

अब यहापर कहते है । जीव, नोजीव तथा अजीव और नो अजीव ऐसा कहनेपर किस नयसे और कौनसा पदार्थ प्रतीत (ज्ञानविषयीभूत) होता है ? इसका उत्तर कहते है, कि 'जीव, ऐसा कहनेसे वा पुकारनेसे नैगम, देशसग्रह, व्यवहार, ऋजुसूत्र, साम्प्रत और समभिरूढ नयोंमे पाचो गतियोमे किसी एक जीवका ज्ञान होता है, क्योकि ये नैगम आदि नय जीवके प्रति औपशमिकादि भावयुक्त पदार्थके ग्राहक है । तथा 'नोजीव, ऐसा कहनेसे अजीवद्रव्य वा जीवके देश प्रदेशका बोध होता है । और 'अजीव, ऐसा कहनेसे अजीव द्रव्यका ही ज्ञान होता है । और 'नो अजीव, ऐसा कहनेसे जीव अथवा जीवके देश प्रदेशका बोध होता है । और एवभूत नयमे तो 'जीव, ऐसा कहनेसे भवस्थजीवका ग्रहण होता है, क्योकि यह नय जीवके प्रति औदयिक भावका ग्राहक है। जीव इस शब्दकी व्युत्पत्ति यह है "**जीवति (प्राणिति) इति जीवः**" अर्थात् जो दशों

१ अवस्था

प्राणोंको धारण करै। और वह प्राणधारणरूप जीवन सिद्धोंमें नहीं होता, इस हेतुसे 'जीव, ऐसा कहनेसे **एवंभूत** नयसे तो भवस्थजीवका ही ग्रहण होता है। और 'नो जीव, ऐसा कहनेसे अजीवद्रव्य अथवा सिद्धका ग्रहण होता है। अजीव ऐसा कहनेसे अजीव द्रव्यका ही ग्रहण होता है, और नोजीव ऐसा कहनेसे ससारस्थ जीवका ही ज्ञान होता है। क्योंकि यह एवंभूत नय सम्पूर्णरूपसे पदार्थका ग्राहक है, इसके द्वारा देश तथा प्रदेशका ग्रहण नही होता। इसी रीतिसे **"जीवौ जीवाः"** दो जीव वा बहुत जीव इत्यादि द्वित्व तथा बहुतरूपसे कहनेपर भी संसारस्थ जीवका ही इस नयसे ग्रहण होता है। और सम्पूर्ण जीवमात्रका ग्रहण होनेपर तो जीव, नोजीव (ईषत् जीव), अजीव, नोऽजीव (ईषत् वा किंचित् अजीव) जीव (दो जीव) नोजीव (द्वित्वसंख्या सहित नोजीव) तथा दो अजीव और दो नोऽजीव इत्यादि एकत्व वा द्विरूपसे कहनेपर शून्यका ही बोध होगा। क्योंकि यह यथार्थग्राही नय संख्याकी अनन्ततासे जीवोंके बहुत्वको ही चाहता है। और पूर्वोक्त उदाहरणमें तो एकत्व तथा द्वित्व ही है, अर्थात् एकवचन और द्विवचन ही है। और शेष जो नय है, वे तो जातिकी अपेक्षासे एकमें बहुवचन तथा बहुतमें भी बहुवचनको सम्पूर्ण वचनोंमे एक वचनादिसे आकारित उच्चारित विकल्पोंको ग्रहण करनेवाले है। इसी प्रकार सब पदार्थोंमें नयवादका ज्ञान समझना चाहिये।

भाष्यम्—अत्राह। अथ पञ्चाना ज्ञानानां सविपर्ययाणां कानि को नय श्रयत इति। अत्रोच्यते। नैगमादयस्त्रय सर्वाण्यष्टौ श्रयन्ते। ऋजुसूत्रनयो मतिज्ञानमत्यज्ञानवर्जानि **षट्**॥ अत्राह। कस्मान्मति सविपर्यया न श्रयत इति। अत्रोच्यते। श्रुतस्य सविपर्ययस्योपग्रहत्वात्। शब्दनयस्तु द्वे एव श्रुतज्ञानकेवलज्ञाने श्रयते। अत्राह। कस्मान्नेतराणि श्रयत इति। अत्रोच्यते। मत्यवधिमनःपर्यायाणां श्रुतस्यैवोपग्राहकत्वात्। चेतनाज्ञस्वाभाव्याच्च सर्वजीवानां नास्य कश्चिन्मिथ्यादृष्टिरज्ञो वा जीवो विद्यते। तस्मादपि विपर्ययान्न श्रयत इति। अतश्च प्रत्यक्षानुमानोपमानाप्तवचनानामपि प्रामाण्यमभ्यनुज्ञायत इति। आह च—

अब यहांपर कहते हैं, कि कुमति कुश्रुत तथा विभङ्गरूप विपर्यय (अज्ञान) सहित जो मत्यादि पांच ज्ञान हैं, उनमेंसे किन ज्ञानोंको कौन नय आश्रय करता है? इसका उत्तर कहते है, कि नैगमसे आदि लेके जो तीन नय हैं, अर्थात् नैगम सग्रह और व्यवहार, सो आठो ज्ञानका अर्थात् कुमति कुश्रुत तथा विभङ्गज्ञान सहित पाचो ज्ञानोंका आश्रय करते हैं। और ऋजुसूत्र नयतो मतिज्ञान तथा मत्यज्ञानको छोड़के षट् ज्ञानोंको आश्रय करता है। यहां कहते है, कि ऋजुसूत्र नय विपर्यय सहित मतिज्ञानका आश्रय क्यों नहीं करता? इस पर कहते है, कि विपर्यय सहित श्रुतका ही इससे उपग्रह होता है। और शब्दनय तो श्रुतज्ञान तथा केवलज्ञान इन्ही दोनोंका आश्रय करता है। यहांपर कहते है, कि शब्द नय इन दोनोंके सिवाय अन्यका आश्रय क्यों नहीं करता? इसका

उत्तर कहते हैं, कि मति, अवधि, तथा मनःपर्याय ज्ञानोंको श्रुतकी उपग्राहकता है । तथा सब संसारी जीवोंका चेतनज्ञ स्वभाव होनेसे इस नयकी दृष्टिमें कोई मिथ्यादृष्टि अथवा अज्ञानी जीव है ही नही । इस कारणसे शब्दनय विपर्ययोंका आश्रय नही करेगा । इसी कारण प्रत्यक्ष, अनुमान, उपमान, तथा आप्तवचन इनका भी प्रामाण्य हम स्वीकार करते है । और कहा भी है;—

विज्ञायैकार्थपदान्यर्थपदानि च विधानमिष्टं च ।
विन्यस्य परिक्षेपान्नयैः परीक्ष्याणि तत्त्वानि ॥ १ ॥
ज्ञानं सविपर्यास त्रयः श्रयन्त्यादितो नयाः सर्वम् ।
सम्यग्दृष्टेर्ज्ञानं मिथ्यादृष्टेर्विपर्यास ॥ २ ॥
ऋजुसूत्र' पट् श्रयते मते श्रुतोपग्रहादनन्यत्वात् ।
श्रुतकेवले तु शब्द श्रयते नोऽन्यच्छ्रुताङ्गत्वात् ॥ ३ ॥
मिथ्यादृष्ट्यज्ञाने न श्रयते नास्य कश्चिदज्ञोऽस्ति ।
ज्ञस्वाभाव्याज्जीवो मिथ्यादृष्टिर्न चाप्यज्ञ' ॥ ४ ॥
इति नयवादाश्चित्राः कचिद्विरुद्धा इवाथ च विशुद्धाः ।
लौकिकविषयातीतास्तत्त्वज्ञानार्थमधिगम्या' ॥ ५ ॥

इति तत्त्वार्थाधिगमेऽर्हत्प्रवचनसङ्ग्रहे प्रथमोऽध्यायः समाप्त ॥

एक अर्थवाचक पदोंको तथा अनेक अर्थके वाचक पदोंको जानकर और इष्ट विधानका विन्यास करके अनन्तर परिक्षेपमे नयोंके द्वारा तत्त्वोंकी परीक्षा करनी चाहिये ॥ १ ॥

आदिमे नैगम आदि तीन नय विपर्यय सहित सब ज्ञानोंका आश्रय करते है, उसमें सम्यग्दृष्टिको तो ज्ञान होता है और मिथ्यादृष्टिको विपर्यास होता है ॥ २ ॥

ऋजुसूत्र नय विपर्यय सहित मतिज्ञानको छोडके शेष पट् ज्ञानोंका आश्रय करता है, क्योंकि मतिज्ञानका अभेद होनेसे श्रुतसे ही उपग्रह हो जाता है, शब्दनय तो श्रुत और केवल ज्ञानका ही आश्रय करता है, न कि अन्यका, क्योंकि शब्दनय श्रुतका ही अङ्ग है ॥ ३ ॥

तथा मिथ्यादृष्टि अज्ञानका आश्रय नही करता । क्योंकि इसकी दृष्टिमें ज्ञस्वभाव (ज्ञानी स्वभाव) होनेसे न तो कोई मिथ्यादृष्टि है, और न कोई अज्ञानी है ॥ ४ ॥

इस रीतिसे विचित्र नयवाद कही विरुद्ध सदृश होनेपर भी अति विशुद्ध तथा लौकिक विषयोंसे परे है, इसीसे तत्त्वार्थज्ञानकेलिये इनको जानना चाहिये ॥ ५ ॥

इति तत्त्वार्थाधिगमेऽर्हत्प्रवचनसङ्ग्रहे आचार्योपाधिधारिपण्डितठाकुरप्रसादशर्मविरचितभाषाटीकासमलङ्कृतः प्रथमोध्याय ।

अथ द्वितीयोऽध्यायः ।

अत्राह । उक्तं भवता जीवादीनि तत्त्वानीति । तत्र को जीवः कथं लक्षणो वेति। अत्रोच्यते ।

यहांपर कहते है, कि आपने जीव आदि तत्त्वोंको कहा है, सो जीव क्या और उसका लक्षण क्या है ? इसलिये यह अग्रिमसूत्र कहते है ।

औपशमिकक्षायिकौ भावौ मिश्रश्च जीवस्य स्वतत्त्वमौदयिकपारिणामिकौ च ॥ १ ॥

सूत्रार्थः—औपशमिक, क्षायिक और मिश्रभाव जीवके स्वतत्त्व है, तथा औदयिक और पारिणामिक भी है ।

भाष्यम्—औपशमिक क्षायिक क्षायोपशमिक औदयिक पारिणामिक इत्येते पञ्च भावा जीवस्य स्वतत्त्वं भवन्ति ।

विशेषव्याख्या—औपशमिक, क्षायिक, क्षायोपशमिक, औदयिक तथा पारिणामिक । ये पांचभाव जीवके निजतत्त्व अर्थात् निज स्वभाव है ॥ १ ॥

द्विनवाष्टादशैकविंशतित्रिभेदा यथाक्रमम् ॥ २ ॥

सूत्रार्थः—औपशमिक आदि पांच भाव यथाक्रमसे दो, नव, अठारह, इक्कीस तथा तीन भेदवाले है ।

भाष्यम्—एते औपशमिकादय पञ्च भावा द्विनवाष्टादशैकविंशतित्रिभेदा भवन्ति । तद्यथा । औपशमिको द्विभेद क्षायिको नवभेद. क्षायोपशमिकोऽष्टादशभेदः औदयिक एकविंशतिभेद' पारिणामिकस्त्रिभेद इति । यथाक्रममिति येन सूत्रक्रमेणात ऊर्ध्वं वक्ष्याम' ।

विशेषव्याख्या—पूर्वोक्त औपशमिक आदि पाच भाव जो जीवके स्वतत्त्व है उनके भेद इस प्रकार है । जैसे औपशमिकके दो भेद, क्षायिकके नव भेद, क्षायोपशमिकके अठारह भेद, औदयिकके इक्कीस भेद, और पारिणामिकके तीन भेद है । 'यथाक्रम, इसका यह तात्पर्य है, कि जिस क्रमसे सूत्रमे उपनिबद्ध है, उसीसे ये भेद है । और जो जिसके भेद है, उनको क्रमसे आगे कहते है ॥ २ ॥

सम्यक्त्वचारित्रे ॥ ३ ॥

सूत्रार्थः—प्रथम अर्थात् औपशमिकके सम्यक्त्व चारित्र दो भेद है ।

भाष्यम्—सम्यक्त्वं चारित्रं च द्वावौपशमिकौ भावौ भवत इति ।

विशेषव्याख्या—सम्यक्त्व तथा चारित्र ये दो प्रकार औपशमिक भावके है अर्थात् औपशमिकसम्यक्त्व और औपशमिकचारित्र दो भेद है ॥ ३ ॥

ज्ञानदर्शनदानलाभभोगोपभोगवीर्याणि च ॥ ४ ॥

सूत्रार्थः—दूसरे अर्थात् क्षायिकके ज्ञान, दर्शन, दान, लाभ, भोग, उपयोग, वीर्य सम्यक्त्व और चारित्र ये नौ भेद है ।

भाष्यम्—ज्ञानं दर्शनं दानं लाभो भोग उपभोगो वीर्यमित्येतानि च सम्यक्त्वचारित्रे च नव क्षायिका भावा भवन्तीति ।

ज्ञान, दर्शन, दान, लाभ, भोग, उपयोग और वीर्य ये सात तथा च शब्दसे सम्यक्त्व और चारित्र मिलाकर नव प्रकारका क्षायिक भाव होता है, अर्थात् क्षायिक ज्ञान, क्षायिक दर्शन, क्षायिक दान, क्षायिक लाभ, क्षायिक भोग, क्षायिक उपभोग, क्षायिक वीर्य, क्षायिक सम्यक्त्व और क्षायिक चारित्र ॥ ४ ॥

ज्ञानाज्ञानदर्शनदानादिलब्धयश्चतुस्त्रित्रिपञ्चभेदाः सम्यक्त्वचारित्रसंयमासंयमाश्च ॥ ५ ॥

सूत्रार्थः—चार प्रकारका ज्ञान, तीन प्रकारका अज्ञान, तीन प्रकारका दर्शन और पांच प्रकारकी लब्धि, तथा सम्यक्त्व, चारित्र और सयमासंयम ये अष्टादश भेद क्षायोपशमिक भावके है ।

भाष्यम्—ज्ञान चतुर्भेद मतिज्ञानं श्रुतज्ञानमवधिज्ञानं मनःपर्यायज्ञानमिति । अज्ञानं त्रिभेदं मत्यज्ञान श्रुताज्ञानं विभङ्गज्ञानमिति । दर्शन त्रिभेद चक्षुर्दर्शनमचक्षुर्दर्शनमवधिदर्शनमिति । लब्धय. पञ्चविधा दानलब्धिर्लाभलब्धिर्भोगलब्धिरुपभोगलब्धिर्वीर्यलब्धिरिति । सम्यक्त्वं चारित्रं संयमासंयम इत्येतेऽष्टादश क्षायौपशमिका भावा भवन्तीति ।

विशेषव्याख्या—मतिज्ञान, श्रतज्ञान, अवधिज्ञान तथा मन.पर्याय ज्ञान ये चार ज्ञान, मत्यज्ञान, श्रुताज्ञान तथा विभगावधि ये तीन अज्ञान, चक्षुदर्शन, अचक्षुदर्शन और अवधिदर्शन ये तीन दर्शन, दानलब्धि, लाभलब्धि. भोगलब्धि. उपभोगलब्धि. तथा वीर्यलब्धि ये पांच प्रकारकी लब्धि, इस प्रकार ज्ञानादि पन्द्रह और सम्यक्त्व, चारित्र, तथा सयमासयम सब मिलाकर अठारह भेदवाला क्षायोपशमिक भाव है ॥ ५ ॥

गतिकषायलिङ्गमिथ्यादर्शनाज्ञानासंयतासिद्धत्वलेश्याश्चतुश्चतुस्त्र्येकैकैकैकषट्भेदाः ॥ ६ ॥

सूत्रार्थः—चार गति, चार कषाय, तीन लिङ्ग, मिथ्यादर्शन एक, अज्ञान एक, असंयत एक, असिद्धत्व एक, और लेश्या छह, ये औदयिक भावोंके २१ भेद है ।

भाष्यम्—गतिश्चतुर्भेदा नारकतैर्यग्योनमनुष्यदेवा इति । कषायश्चतुर्भेद क्रोधी मानी मायी लोभीति । लिङ्गं त्रिभेद स्त्रीपुमान्नपुंसकमिति । मिथ्यादर्शनमेकभेदं मिथ्यादृष्टिरिति । अज्ञानमेकभेदमज्ञानीति । असंयतत्वमेकभेदमसंयतोऽविरत इति । असिद्धत्वमेकभेदमसिद्ध इति । एकभेदमेकविधमिति । लेश्या षट्भेदा. कृष्णलेश्या नीललेश्या कापोतलेश्या तेजोलेश्या पद्मलेश्या शुक्ललेश्या । इत्येते एकविंशतिरौदयिकभावा भवन्ति ।

विशेषव्याख्या—नारक, तैर्यग्योनि मनुष्य और देव ये चार गति; क्रोध, मान, माया, तथा लोभ ये चार कषाय; स्त्रीवेद, पुंवेद और नपुंसकवेद ये तीन लिङ्ग; मिथ्यादृष्टिरूप मिथ्यादर्शन एक, अज्ञान एक, अविरत असयतरूप असयत एक, असिद्धत्व एक, और कृष्णलेश्या, नीललेश्या, कापोतलेश्या, तेजोलेश्या पद्मलेश्या तथा शुक्लेश्या इस प्रकार सब मिलकर इक्कीस प्रकार औदयिक भाव है ॥ ६ ॥

जीवभव्याभव्यत्वादीनि च ॥ ७ ॥

सूत्रार्थः—जीवत्व, भव्यत्व, और अभव्यत्व ये तीनों पारिणामिक भाव है ।

भाष्यम्—जीवत्वं भव्यत्वमभव्यत्वमित्येते त्रय पारिणामिका भावा भवन्तीति । आदिग्रहणं किमर्थमिति । अत्रोच्यते । अस्तित्वमन्यत्वं कर्तृत्वं भोक्तृत्व गुणवत्त्वमसर्वगतत्वमनादिकर्मसन्तानबद्धत्वं प्रदेशत्वमरूपत्वं नित्यत्वमित्येवमादयोऽप्यनादिपारिणामिका जीवस्य भावा भवन्ति । धर्मादिभिस्तु समाना इत्यादिग्रहणेन सूचिता । ये जीवस्यैव वैशेषिकास्ते स्वशब्देनोक्ता इति । एते पञ्च भावास्त्रिपञ्चाशद्भेदा जीवस्य स्वतत्त्व भवन्ति । अस्तित्वादयश्च । किं चान्यत्—

विशेषव्याख्या—जीवत्व, भव्यत्व, तथा अभव्यत्व आदि पारिणामिक भाव हैं । पारिणामिक भावके तीन ही भेद कहे है. तब इस सूत्रमे आदिग्रहण क्यो किया ? इसका उत्तर कहते है,—अस्तित्व, अन्यत्व, कर्तृत्व, भोक्तृत्व, गुणवत्व, असर्वगतत्व, अनादिकर्मसन्तानबद्धत्व, प्रदेशत्व, अरूपत्व तथा नित्यत्व, इत्यादि और भी अनादिकालसिद्ध पारिणामिक भाव जीवके है । और ये अस्तित्वादि भाव धर्मादिके समान है, इसलिये आदिग्रहणसे उनको भी सूचित किया है । जो जीवके वैशेषिक अर्थात् जो विशेष करके जीवमे ही होते है, उनको तो पृथक् २ स्व शब्दसे कहा है । ये औपशमिकादि पांचों भाव मिलके त्रिपञ्चाशत अर्थात् ५३ भेद जीवके स्वतत्त्व है, अर्थात् निज विशेष भाव है, जो कि जीवमे ही होते है । और अस्तित्वादि भी जीवके भाव है ॥ ७ ॥ और भी कहते है;—

उपयोगो लक्षणम् ॥ ८ ॥

सूत्रार्थः—उपयोगवत्ता जीवका लक्षण है ।

भाष्यम्—उपयोगो लक्षणं जीवस्य भवति ।

विशेषव्याख्या—जीवका उपयोग लक्षण होता है अर्थात् जीव उपयोगलक्षणयुक्त होता है ॥ ८ ॥

स द्विविधोऽष्टचतुर्भेदः ॥ ९ ॥

सूत्रार्थः—वह उपयोग दो प्रकारका है । एक अष्टविध है, और दूसरा चतुर्विध है ।

भाष्यम्—स उपयोगो द्विविधः साकारोऽनाकारश्च ज्ञानोपयोगो दर्शनोपयोगश्चेत्यर्थः ।

स पुनर्यथासङ्ख्यमष्टचतुर्भेदो भवति । ज्ञानोपयोगोऽष्टविध' । तद्यथा । मतिज्ञानोपयोगः श्रुतज्ञानोपयोगोऽवधिज्ञानोपयोगो मन पर्यायज्ञानोपयोगः केवलज्ञानोपयोगो मत्यज्ञानोपयोगः श्रुतज्ञानोपयोगो विभङ्गज्ञानोपयोग इति । दर्शनोपयोगश्चतुर्भेदः । तद्यथा । चक्षुर्दर्शनोपयोगोऽचक्षुर्दर्शनोपयोगोऽवधिदर्शनोपयोगः केवलदर्शनोपयोग इति ॥

विशेषव्याख्या—वह उपयोग दो प्रकारका है। एक साकार और दूसरा अनाकार। अर्थात् पहिला ज्ञानोपयोगसाकार दूसरा दर्शनोपयोगअनाकार। और वह यथाक्रमसे अष्टभेद तथा चतुर्भेद है। उनमेसे ज्ञानोपयोगके आठ भेद है। जैसे, –मतिज्ञानोपयोग, श्रुतज्ञानोपयोग, अवधिज्ञानोपयोग, मन.पर्यायज्ञानोपयोग तथा केवलज्ञानोपयोग, मत्यज्ञानोषयोग, श्रुताज्ञानोपयोग, और विभङ्गज्ञानोपयोग, । यह अष्टविध ज्ञानोपयोग है। और दर्शनोपयोग चार प्रकारका है। जैसे,'—चक्षुर्दर्शनोपयोग, अचक्षुर्दर्शनोपयोग, अवधिदर्शनोपयोग, और केवलदर्शनोपयोग। यही द्विविध उपयोग है॥ ९ ॥

संसारिणो मुक्ताश्च ॥ १० ॥

सूत्रार्थः—संसारी तथा मुक्त भेदसे जीवके दो भेद है।

भाष्यम्—ते जीवा. समासतो द्विविधा भवन्ति संसारिणो मुक्ताश्च। किं चान्यत—

विशेषव्याख्या—जिस जीवका पूर्वमे उपयोग लक्षण कहा है, वह जीव सक्षेपसे दो प्रकारका है। एक तो **संसारी** जो अनेक प्रकारके जन्मधारणकरके संसारमे भ्रमण करते है, और दूसरे **मुक्त** जीव वे है, जिनका ससारसे सम्बन्ध छूट गया है, तथा जो आवागमनसे रहित हो गये है॥ १० ॥

और भी,:—

समनस्कामनस्काः ॥ ११ ॥

सूत्रार्थः—जीवके समनस्क और अमनस्क ये दो भेद है।

भाष्यम्—समासतस्ते एव जीवा द्विविधा भवन्ति समनस्काश्च अमनस्काश्च। तान्परस्ताद्वक्ष्याम' ॥

विशेषव्याख्या—समनस्क तथा अमनस्क, अर्थात् मनसहित और मनरहित ये दो भेद जीवके है। हम इनका अर्थात् समनस्क और अमनस्कोंका वर्णन पीछेसे करेंगे।

संसारिणस्त्रसस्थावराः ॥ १२ ॥

सूत्रार्थः—पुन' त्रस तथा स्थावर भेदसे सक्षेपमे संसारी जीव दो प्रकारके है।

भाष्यम्—संसारिणो जीवा द्विविधा भवन्ति त्रसा' स्थावराश्च। तत्र—

विशेषव्याख्या—संसारी जीव दो प्रकारके होते है, त्रस और स्थावर। उनमे,:—

पृथिव्यब्वनस्पतयः स्थावराः ॥ १३ ॥

सूत्रार्थः—पृथिवी, जल और वनस्पति ये स्थावर जीव है।

भाष्यम्—पृथिवीकायिका अप्कायिका वनस्पतिकायिका' इत्येते त्रिविधाः स्थावरा जीवा

भवन्ति। तत्र पृथिवीकायोऽनेकविध शुद्धपृथिवीशर्करावालुकादिः। अप्कायोऽनेकविधो हिमादिः। वनस्पतिकायोऽनेकविध शैवालादिः॥

विशेषव्याख्या—पृथिवीकायिक, अप् (जल) कायिक, तथा वनस्पतिकायिक ये त्रिविध जीव स्थावर सञ्ज्ञक है। इनमेसे पृथिवीकायिक अनेक प्रकार शुद्धपृथिवी, शर्करा, वालुकादि हैं। अप्कायिक जो हिम आदि है, सो अनेक प्रकारके है। और वनस्पति कायिक जो शैवाल आदि है वे भी अनेक प्रकार है॥ १३॥

तेजोवायू द्वीन्द्रियादयश्च त्रसाः॥ १४॥

सूत्रार्थः—तेज कायिक, वायुकायिक, और द्वीन्द्रियादि त्रसजीव है।

भाष्यम्—तेज कायिका अङ्गारादय। वायुकायिका उत्कलिकादय। द्वीन्द्रियास्त्रीन्द्रियाश्चतुरिन्द्रिया पञ्चेन्द्रिया इत्येते त्रसा भवन्ति। संसारिणस्त्रसा स्थावरा इत्युक्ते एतदुक्तं भवति मुक्ता नैव त्रसा नैव स्थावरा इति॥

विशेषव्याख्या—तेज कायिक अङ्गारादि, वायुकायिक उत्कलिकादि, तथा द्वीन्द्रियादि अर्थात् दो इन्द्रियवाले, तीन इन्द्रियवाले, चार इन्द्रियवाले और पांच इन्द्रियवाले, ये सब त्रस जीव कहे जाते है। "**संसारिणस्त्रसस्थावराः**" अर्थात् संसारीजीव त्रस तथा स्थावर है, ऐसा कहनेसे यह फलित हुआ कि मुक्तजीव न तो त्रस है, और न स्थावर है॥ १४॥

पञ्चेन्द्रियाणि॥ १५॥

सूत्रार्थः—इन्द्रियां पांच है।

भाष्यम्—पञ्चेन्द्रियाणि भवन्ति। आरम्भो नियमार्थ षडादिप्रतिषेधार्थश्च। इन्द्रियं। इन्द्रलिङ्गमिन्द्रदिष्टमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिति वा। इन्द्रो जीव सर्वद्रव्येष्वैश्वर्ययोगाद्विषयेषु वा परमैश्वर्ययोगात्। तस्य लिङ्गमिन्द्रिय लिङ्गनात्सूचनात्प्रदर्शनादुपष्टम्भनाद्व्यञ्जनाच्च जीवस्य लिङ्गमिन्द्रियम्॥

विशेषव्याख्या—इस सूत्रका आरंभ नियमकेलिये है, अर्थात् इन्द्रियां पांच ही है, न कि छह अथवा चार, इस प्रकार नियम तथा षट् आदि संख्याका निषेध ये दो अर्थ सिद्ध हो गये। **इन्द्रलिङ्गम्** इन्द्रका लिङ्ग अर्थात् ज्ञापक व बोधक जो है वह इन्द्रिय है, **इन्द्रदिष्टम्** इन्द्रसे निज २ कार्योंमे आज्ञप्त जो है वे इन्द्रिय है, **इन्द्रदृष्टम्** अर्थात् इन्द्रसे अवलोकित, **इन्द्रसृष्टम्** इन्द्रसे सृष्ट, और **इन्द्रजुष्टम्** इन्द्रसे सेवित। इन्द्र जीवात्माको कहते है, क्योंकि सम्पूर्ण द्रव्योंमे इसका ऐश्वर्यका सम्बन्ध है, अथवा सब विषयोंमे ऐश्वर्यका सम्बन्ध है। जीवात्माके सूचनसे, उसके प्रदर्शनसे, उपष्टम्भ करनेसे अथवा व्यक्त करनेसे ये इन्द्रिय है॥ १५॥

द्विविधानि॥ १६॥

सूत्रार्थः—इन्द्रियां दो प्रकारकी है।

भाष्यम्—द्विविधानीन्द्रियाणि भवन्ति । द्रव्येन्द्रियाणि भावेन्द्रियाणि च ॥ तत्र—

विशेषव्याख्या—द्रव्येन्द्रिय तथा भावेन्द्रिय इन दो भेदोंसे इन्द्रियां दो प्रकारकी है ॥ १६ ॥ उनमें,:—

निर्वृत्त्युपकरणे द्रव्येन्द्रियम् ॥ १७ ॥

सूत्रार्थः—निर्वृत्तीन्द्रिय तथा उपकरणेन्द्रिय इस रीतिसे दो प्रकार द्रव्य इन्द्रियके है ।

भाष्यम्—निर्वृत्तीन्द्रियमुपकरणेन्द्रियं च द्विविधं द्रव्येन्द्रियम् । निर्वृत्तिरङ्गोपाङ्गनामनिर्वर्तितानीन्द्रियद्वाराणि कर्मविशेषसंस्कृताः शरीरप्रदेशाः । निर्माणनामाङ्गोपाङ्गप्रत्यया मूलगुणनिर्वर्तनेत्यर्थः । उपकरणं बाह्यमभ्यन्तरं च । निर्वर्तितस्यानुपघातानुग्रहाभ्यामुपकारीति ॥

विशेषव्याख्या—निर्वृत्ति तथा उपकरण ये दोनो मिलकर द्रव्येन्द्रिय हैं । यहा पर निर्वृत्ति शब्दका अर्थ रचना है, और वह रचना इस प्रकार है कि अङ्गोपाङ्गनाम कर्मके उदयसे इन्द्रियोके अवयव होते है, और निर्माणकर्मके उदयसे शरीरके प्रदेशोकी रचना होती है । इस रीतिसे अङ्गोपाङ्गनाम तथा निर्माणकर्म इन दोनों कर्मविशेषोसे द्रव्येन्द्रियकी रचना होती है । द्रव्येन्द्रियोकी रचना अङ्गोपाङ्ग तथा निर्माणकर्मके आधीन होती है । तात्पर्य यह कि नेत्र आदि इन्द्रियोंकी बाह्याभ्यन्तर रचनाको द्रव्येन्द्रिय कहते है । बाह्य तथा अभ्यन्तर भेदसे उपकरण दो प्रकारका है। यह उपकरण निर्वर्तित (रचित) इन्द्रियोका अनुपघात और अनुग्रहसे उपकारी होता है। अर्थात् रचित अङ्गोका किसी प्रकारसे उपघात नहीं होने दे वह बाह्य, और उनको निजर कार्योमे प्रवृत्त होनेमें जिसका अनुग्रह होता है, वह अभ्यन्तर उपकरण है । जैसे,:— आंखका बाह्य उपकरण अक्षि पलक आदि है, अभ्यन्तर आलोकादिका दोषरहित आगमन आदि । इस प्रकार उपकरण सहायक व उपकारी होता है ॥ १७ ॥

लब्ध्युपयोगौ भावेन्द्रियम् ॥ १८ ॥

सूत्रार्थः—लब्धि तथा उपयोग ये दोनो भावेन्द्रिय है ।

भाष्यम्—लब्धिरुपयोगश्च भावेन्द्रियं भवति । लब्धिर्नाम गतिजात्यादिनामकर्मजनिता तदावरणीयकर्मक्षयोपशमजनिता चेन्द्रियाश्रयकर्मोदयनिर्वृत्ता च जीवस्य भवति । सा पञ्चविधा । तद्यथा । स्पर्शनेन्द्रियलब्धिः रसनेन्द्रियलब्धिः घ्राणेन्द्रियलब्धिः **चक्षुरि**न्द्रियलब्धिः श्रोत्रेन्द्रियलब्धिरिति ॥

विशेषव्याख्या—लब्धि वह है, जो जीवके गति तथा जातिआदि कर्मोंसे तथा उनके अर्थात् गतिजात्यादिके आवरण करनेवाले जो कर्म है, **उनके क्षयो**पशमसे और इन्द्रियोंके आश्रयभूत कर्मोके उदयसे उत्पन्न हो । वह जीवकी **लब्धि** पांच प्रकारकी है; जैसे,'—स्पर्शनेन्द्रिय लब्धि १, रसनेन्द्रिय लब्धि २, घ्राणेन्द्रिय लब्धि ३, चक्षुरिन्द्रिय लब्धि ४, और श्रोत्रेन्द्रिय लब्धि ५ ॥ १८ ॥

उपयोगः स्पर्शादिषु ॥ १९ ॥

सूत्रार्थः—स्पर्श, रसनादिमे उपयोग होता है।

भाष्यम्—स्पर्शादिषु मतिज्ञानोपयोग इत्यर्थः। उक्तमेतदुपयोगो लक्षणम्। उपयोगः प्रणिधानमायोगस्तद्भावः परिणाम इत्यर्थः॥ एषां च सत्यां निर्वृत्तावुपकरणोपयोगौ भवतः। सत्यां च लब्धौ निर्वृत्त्युपकरणोपयोगा भवन्ति। निर्वृत्त्यादीनामेकतराभावे विषयालोचनं न भवति।

विशेषव्याख्या—स्पर्शादि इन्द्रियोंके विषयमें मतिज्ञानका उपयोग होता है। और यह वार्ता तो पूर्व प्रसङ्गमें कह ही आये है, कि उपयोग जीवका लक्षण होता है। उपयोग, प्रणिधान, आयोग, सद्भाव तथा परिणाम ये सब प्रायः एकार्थवाचक है। निर्वृत्तिके उपयोग होने पर ही इनके उपकरण तथा उपयोग होते है। और लब्धिके होने-पर निर्वृत्ति, उपकरण, तथा उपयोग होते है। और निर्वृत्ति, उपकरण, तथा उपयोग इनमेसे किसी एकके न होने पर विषयका ज्ञान नहीं होता॥ १९॥

अत्राह। उक्तं भवता पञ्चेन्द्रियाणीति। तत्कानि तानीन्द्रियाणीत्युच्यते—

अब यहांपर कहते है कि आपने पांच इन्द्रिया तो कहीं, परन्तु वे पांच इन्द्रिया कौन२ है? इसलिये अग्रिमसूत्र कहते है—

स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि ॥ २० ॥

सूत्रार्थः—स्पर्शन, रसन, घ्राण, चक्षु तथा श्रोत्र ये पाच इन्द्रियां है।

भाष्यम्—स्पर्शनं रसन घ्राण चक्षुः श्रोत्रमित्येतानि पञ्चेन्द्रियाणि॥

विशेषव्याख्या—जिसके द्वारा स्पर्श होता है, अर्थात् जिससे शीतोष्ण तथा मृदु कठोर आदि स्पर्शका ज्ञान होता है, वह स्पर्शन इन्द्रिय है। ऐसे ही जिसके द्वारा मिष्ट तिक्त आदिका ज्ञान होता है, वह रसन इन्द्रिय है। जिसके द्वारा सुगन्ध दुर्गन्धादिका ज्ञान होता है, वह घ्राण (नासिका) इन्द्रिय है। जिसके द्वारा श्वेतपीतादि रूपका ज्ञान होता है, वह चक्षुरिन्द्रिय (नेत्र) है। तथा जिसके द्वारा शब्दका ज्ञान होता है, वह श्रोत्र इन्द्रिय है॥ २०॥

स्पर्शरसगन्धवर्णशब्दास्तेषामर्थाः ॥ २१ ॥[1]

सूत्रार्थः—स्पर्श, रस आदि पदार्थ स्पर्शन आदि इन्द्रियोंके अर्थ (विषय) है।

भाष्यम्—एतेषामिन्द्रियाणामेते स्पर्शादयोऽर्था भवन्ति यथासङ्ख्यम्॥

विशेषव्याख्या—स्पर्शन इन्द्रियका अर्थ स्पर्श है, क्योंकि स्पर्शन इन्द्रियके सिवाय और किसी इन्द्रियके द्वारा स्पर्श पदार्थका ज्ञान नहीं होता। रसना इन्द्रियका अर्थ रस,

---

1 किसी २ के मतमें यह मूलसूत्र नहीं है, और कोई २ कहते है कि ये मूलसूत्र ही है भाष्य नहीं।

(मिष्ट, तिक्तादि) है। घ्राण इन्द्रियका विषय गन्ध है, चक्षुष् इन्द्रियका विषय वर्ण (श्वेतपीतादिरूप) है। और श्रोत्र इन्द्रियका विषय शब्द है॥ २१॥

श्रुतमनिन्द्रियस्य॥ २२॥

सूत्रार्थः—श्रुतज्ञान अनिन्द्रिय अर्थात् मनका विषय है।

भाष्यम्—श्रुतज्ञानं द्विविधमनेकद्वादशविधं नोइन्द्रियस्यार्थः।

विशेषव्याख्या—दो भेद, अनेक भेद, तथा द्वादशभेद जिस श्रुतज्ञानके कहे है, वह अनिन्द्रिय (नोइन्द्रिय) अर्थात् मनका विषय है॥ २२॥

अत्राह। उक्तं भवता पृथिव्यब्वनस्पतितेजोवायवो द्वीन्द्रियादयश्च नव जीवनिकायाः। पञ्चेन्द्रियाणि चेति। तात्कि कस्येन्द्रियमिति। अत्रोच्यते।

अब कहते है कि आपने पृथिवी, अप्, वनस्पति, तेज, वायु और द्वीन्द्रिय आदि अर्थात् पृथिवीसे लेकर वायु पर्यन्त पांच, और द्वीन्द्रिय, त्रीन्द्रिय, चतुरिन्द्रिय तथा पंचेन्द्रिय ये चार इस रीतिसे नव प्रकारके जीवनिकाय कहे और पंचेन्द्रिय भी कहा; सो इनमें किसके कौन २ इन्द्रिय है अर्थात्, किस जीवके कितनी और कौन २ इन्द्रियां होती है? इसलिये अग्रिमसूत्र कहते है।

वाय्वन्तानामेकम्॥ २३॥

सूत्रार्थः—पृथ्वीसे लेकर वायुपर्यन्त जीवोंके केवल एक ही इन्द्रिय है।

भाष्यम्—पृथिव्यादीनां वाय्वन्तानां जीवनिकायानामेकमेवेन्द्रियं सूत्रक्रमप्रामाण्यात्प्रथमं स्पर्शनमेवेत्यर्थ.।

विशेषव्याख्या—पृथिवी, अप्, तेज, वायु और वनस्पति इन पांचों जीवसमूहोंको एक ही इन्द्रिय है; और वह भी सूत्रक्रमप्रामाण्यसे प्रथम अर्थात् स्पर्शन इन्द्रिय पृथिवीकायिक आदि जीवोंमें है॥ २३॥

कृमिपिपीलिकाभ्रमरमनुष्यादीनामेकैकवृद्धानि॥ २४॥

सूत्रार्थः—कृमि, पिपीलिका, भ्रमर तथा मनुष्यादि जीवोंके एक २ इन्द्रिय अधिक है।

भाष्यम्—कृम्यादीनां पिपीलिकादीनां भ्रमरादीनां मनुष्यादीनां च यथासङ्ख्यमेकैकवृद्धानीन्द्रियाणि भवन्ति। यथाक्रमं। तद्यथा। कृम्यादीनां अपादिक–नूपुरक–गण्डूपद–शङ्ख–शुक्तिका–शम्बूका-जलोका-प्रभृतीनामेकेन्द्रियेभ्यः पृथिव्यादिभ्य एकेन वृद्धे स्पर्शनरसनेन्द्रिये भवत'। ततोऽप्येकेन वृद्धानि पिपीलिका-रोहिणिका-उपचिका-कुन्थु-तुंबुरुक-त्रपुसबीज-कर्पासास्थिका–शतपद्युत्पतक-तृणपत्र-काष्ठहारकप्रभृतीनां त्रीणि स्पर्शनरसनघ्राणानि। ततोऽप्येकेन वृद्धानि भ्रमर-वटर-सारङ्ग-मक्षिका पुत्तिका-दंश-मशक-वृश्चिक-नन्द्यावर्त-कीट-पतङ्गादीनां चत्वारि स्पर्शनरसनघ्राणचक्षूंषि। शेषाणां च तिर्यग्योनिजानां मत्स्योरगभुजङ्ग-पक्षि-चतुष्पदानां सर्वेषां च नारकमनुष्यदेवानां पञ्चेन्द्रियाणीति॥

विशेषव्याख्या—कृमि आदि अर्थात् कृमित्व जाति सहित जीवोंकी स्पर्शनसे अधिक एक रसन इन्द्रिय और है । जैसे अपादिक (पादरहित), नपुरक (कृमिविशेष), गण्डूपद (केंचुआ), शंख, शुक्तिका (सीपविशेष), शम्बूका (घोंघा), जलोका (जोंक) आदि कृमियोके पृथिवी आदिसे एक इन्द्रिय अधिक है । अर्थात् इनको स्पर्शन और रसन ये दो इन्द्रिया है । और कृमिआदिसे भी एक अधिक पिपीलिका आदिके है । पिपीलिका आदि शब्दसे जैसे, –रोहिणिका, उपचिका (दीमक), कुन्थु, तुंबुरुक, त्रिपुसबीज, कर्पासास्थिका, शतपद्युत्पतक, तृणपत्र, और काष्ठहारक आदि गृहीत है। इनके तीन अर्थात् स्पर्शन, रसन, और घ्राण इन्द्रिय है । और उन पिपीलिकादिसे भी भ्रमर, वटर, सारङ्ग, मक्षिका, पुत्तिका, दंश, मशक, वृश्चिक, नन्द्यावर्त, कीट और पतङ्गादिके एक अधिक अर्थात् चार इन्द्रिय स्पर्शन, रसन, घ्राण तथा चक्षु है । और उनमे भी अधिक शेष तिर्य्यग्योनिवाले मत्स्य, भुजङ्ग, पक्षी, चतुष्पद्पशु और नारक, मनुष्य तथा देव आदिके पांचों इन्द्रियां अर्थात् स्पर्शन, रसन, घ्राण, चक्षु और श्रोत्र होती है ॥ २४ ॥

अत्राह । उक्तं भवता द्विविधा जीवा' । समनस्का अमनस्काश्चेति । तत्र के समनस्का इति । अत्रोच्यते—

यहांपर कहते है, कि आपने समनम्क तथा अमनस्क भेदसे दो प्रकारके जीव कहे हैं, उनमेसे समनस्क कौन है? यह बतलानेकेलिये अग्रिमसूत्र कहते है—

संज्ञिनः समनस्काः ॥ २५ ॥

सूत्रार्थः—संज्ञी जीव समनस्क है ।

भाष्यम्—संप्रधारणसंज्ञायां संज्ञिनो जीवा समनस्का भवन्ति । सर्वे नारकदेवा गर्भव्युत्क्रान्तयश्च मनुष्यास्तिर्यग्योनिजाश्च केचित् ॥ ईहापोहयुक्ता गुणदोषविचारणात्मिका सप्रधारणसंज्ञा । ता प्रति संज्ञिनो विवक्षिता । अन्यथा ह्याहारभयमैथुनपरिग्रहसंज्ञाभि. सर्व एव जीवा' संज्ञिन इति ॥

विशेषव्याख्या—संप्रधारणसंज्ञाके होनेपर जो सज्ञी जीव है. वे ही समनस्क है । अर्थात् सप्रधारणस्वरूप जो संज्ञा है उस संज्ञाके होनेसे जो सज्ञी (सज्ञा ज्ञान रखनेवाले) है, वे ही समनस्क अर्थात् मनसहित है । सम्पूर्ण नारक (नरकके जीव) देव, गर्भसे बहिर्गत मनुष्य, तथा कोई २ तिर्यग्योनिसे उत्पन्न जीव संज्ञी होनेसे समनस्क है । यहांपर ईहा तथा अपोहसे युक्त अर्थात् गहन वा गूढ विषयोंमे कल्पनाशक्तिसे युक्त गुण और दोषके विचारणस्वरूप जो ज्ञानरूपशक्तिविशेष है, वही संप्रधारण रूप सज्ञा है । उसी संज्ञाके प्रति यहा सज्ञीपदसे विवक्षित है । अन्यथा आहार, भय, मैथुन तथा परिग्रहरूप संज्ञाओंसे सब ही जीव संज्ञी हो सक्ते है ॥ २५ ॥

विग्रहगतौ कर्मयोगः ॥ २६ ॥

सूत्रार्थः—विग्रहगतिमे कर्मयोग होता है ।

भाष्यम्—विग्रहगतिसमापन्नस्य जीवस्य कर्मकृत एव योगो भवति । कर्मशरीरयोग इ-त्यर्थः । अन्यत्र तु यथोक्तः कायवाङ्मनोयोग इत्यर्थः ॥

विशेषव्याख्या—विग्रह गतिमे प्राप्त जो जीव है, अर्थात् जीव जब एक शरीरसे अन्य शरीरकेलिये गतिमे समापन्न है, तब इसको कर्मकृत ही योग अर्थात् कार्मोण शरीर ही योग होता है । और विग्रहगतिसे अन्यत्र तो काय, वाक् और मनका योग होता है ॥ २६ ॥

अनुश्रेणि गतिः ॥ २७ ॥

सूत्रार्थः—जीवोंकी गति श्रेणीके अनुसार होती है ।

भाष्यम—सर्वा गतिर्जीवानां पुद्गलानां चाकाशप्रदेशानुश्रेणि भवति विश्रेणिर्न भवतीति गतिनियम इति ।

विशेषव्याख्या—जीव तथा पुद्गलोंकी सम्पूर्ण गति आकाशप्रदेशकी श्रेणीके अनु-सार ही होती है । श्रेणीके विरुद्ध नही होती । यह गतिका नियम है ॥ २७ ॥

अविग्रहा जीवस्य ॥ २८ ॥

सूत्रार्थः—जीवकी अविग्रहगति होती है ।

भाष्यम—सिध्यमानगतिर्जीवस्य नियतमविग्रहा भवतीति ।

विशेषव्याख्या—जीवकी जो सिध्यमान गति है, वह नियमपूर्वक अविग्रह अर्थात् कुटिलता रहित होती है ॥ २८ ॥

विग्रहवती च संसारिणः प्राक् चतुर्भ्यः ॥ २९ ॥

सूत्रार्थः—अन्य जातिमे संक्रमण करनेमे संसारी जीवकी गति चार समयके पहिले विग्रहवती तथा अविग्रहा भी होती है ।

भाष्यम्—जात्यन्तरसंक्रान्तौ संसारिणो जीवस्य विग्रहवती चाविग्रहा च गतिर्भवति उप-पातक्षेत्रवशात् । तिर्यगूर्ध्वमधश्च प्राक् चतुर्भ्य इति । येषां विग्रहवती तेषां विग्रहाः प्राक् चतुर्भ्यो भवन्ति । अविग्रहा एकविग्रहा द्विविग्रहा त्रिविग्रहा इत्येताश्चतुःसमयपराश्चतुर्विधा गतयो भवन्ति । परतो न संभवन्ति । प्रतिघाताभावाद्विग्रहनिमित्ताभावाच्च । विग्रहो वक्रितं विग्रहोऽवग्रहः श्रेण्यन्तरसंक्रान्तिरित्यनर्थान्तरम् । पुद्गलानामप्येवमेव ॥

विशेषव्याख्या—जिस समय ससारी जीव एक जातिके शरीरको त्यागकर अन्य जा-तिके शरीर आदिमें संक्रमण करने लगता है, उस समय चतुर्थ समयके पूर्व **विग्रहवती** गति होती है । उपपात क्षेत्रके (जन्मस्थानके) वशसे तिर्यक् (तिरछा) ऊर्द्ध्व, तथा **अधोभाग**मे गति

होती है। "प्राक् चतुर्भ्यः" इसका यह तात्पर्य है कि जिनकी विग्रहवती गति होती है, उनके विग्रहचतुर्थ समयके पूर्व ही होते है। अविग्रहा अर्थात् विग्रहशून्य, एकविग्रहा (एक विग्रह-वाली) द्विविग्रहा (दो विग्रहवाली) तथा त्रिविग्रहा (तीन विग्रहवाली) ये सब 'चतुःसमय-परा' चार प्रकारकी जीवकी गति होती है। चतुर्थ समयके आगे विग्रहवती गति नही होती। इसके परे उस प्रकारकी गतिका सभव ही नही है। क्योंकि आगे प्रतिघातका अभाव है और विग्रहके निमित्तका भी अभाव है। यहांपर विग्रहका अर्थ वक्रित (टेढा) है। विग्रह, अवग्रह, श्रेण्यन्तरसक्रान्ति अर्थात् सरलश्रेणीको त्यागके वक्रश्रेणीसे गमन-ये सब एकार्थवाचक शब्द है। ससारी जीवोंके समान पुद्गलोंकी भी इसी प्रकारकी गति होती है॥ २९॥

शरीरिणां च जीवानां विग्रहवती चाविग्रहवती च प्रयोगपरिणामवशात्। न तु तत्र वि-ग्रहनियम इति॥

शरीरधारी जीवोंकी विग्रहवती तथा अविग्रहा दोनों प्रकारकी गति प्रयोगके परिणा-मवशसे होती है, वहांपर विग्रहका नियम नही है, किन्तु प्रयोगके परिणामके आधीन है।

अत्राह। अथ विग्रहस्य किं परिमाणमिति। अत्रोच्यते। क्षेत्रतो भाज्यम्। कालतस्तु--

अब कहते है कि विग्रहका क्या परिणाम है? इसपर कहते है कि क्षेत्रकी अपेक्षासे भाज्य (प्राप्य) है। और कालसे तो—

एकसमयोऽविग्रहः॥ ३०॥

सूत्रार्थः—विग्रहरहित गति एक ही समयमे होती है।

भाष्यम्—एकसमयोऽविग्रहो भवति। अविग्रहा गतिरालोकान्तादप्येकेन समयेन भ-वति। एकविग्रहा द्वाभ्याम्। द्विविग्रहा त्रिभि.। त्रिविग्रहा चतुर्भिरिति। अत्र भङ्गप्ररू-पणा कार्येति॥

विशेषव्याख्या—विग्रहशून्यगति लोकके अन्ततक एक ही समयमे होती है। और जिसमें एक विग्रह हो वह गति दो समयोंसे, जिसमे दो विग्रह हों वह तीन समयोंमे होती है, और जिसमे तीन विग्रह गति हों वह चार समयोंके द्वारा होती है। यहांपर भंगरूपसे निरूपण करना चाहिये। अर्थात् विग्रह रहित तो एक समयसे होती है, और एक आदि विग्रहवाली दो आदि समयोंमे, इत्यादि॥ ३०॥

एकं द्वौ वानाहारकः॥ ३१॥

सूत्रार्थः—एक वा दो समयतक जीव अनाहारक रहता है।

भाष्यम्—विग्रहगतिसमापन्नो जीव एकं वा समयं द्वौ वा समयावनाहारको भवति। शेषं कालमनुसमयमाहारयति। कथमेकं द्वौ वानाहारको न बहूनीत्यत्र भङ्गप्ररूपणा कार्या॥

विशेषव्याख्या—विग्रह गतिमे संप्राप्त जो जीव है, वह एक अथवा दो समयतक

तो अनाहारक रहता है, और शेष कालमें प्रतिसमयमें आहारक होता है। यह अर्थ कैसे हुआ? ऐसी यदि शका हो तो यहां भी "एक वा दो समयतक तो अनाहारक होता है न कि बहुत समय पर्यन्त" इस प्रकार भंगसे सूत्रार्थकी व्याख्या करनी चाहिये ॥ ३१ ॥

अत्राह। एवमिदानीं भवक्षये जीवोऽविग्रहया विग्रहवत्या वा गत्या गतः कथं पुनर्जायत इति अत्रोच्यते। उपपातक्षेत्रं स्वकर्मवशात्प्राप्त शरीरार्थं पुद्गलग्रहणं करोति। सकषायत्वाज्जीवः कर्मणो योग्यान्पुद्गलानादत्त इति। कायवाङ्मनःप्राणापानाः पुद्गलानामुपकारः। नामप्रत्ययाः सर्वतो योगविशेषादिति वक्ष्यामः। तज्जन्म। तच्च त्रिविधम्। तद्यथा—

अब यहांपर 'इस प्रकार जब इस समय एक भवका क्षय हो गया, तब अविग्रह वा विग्रहवती गतिसे यह जीव पुनः कैसे उत्पन्न होता है? इसका उत्तर कहते है। निज उत्पत्तिके क्षेत्रपर अपने कर्मोके वशीभूत होकर जब यह जीव प्राप्त होता है, तब अपने शरीरके अर्थ पुद्गलोंको ग्रहण करता है। "कषाय सहित होनेसे कर्मोके योग्य पुद्गलोंको जीव ग्रहण करता है" काय, वाक्, मन तथा प्राण अपान ये सब जीवोके ऊपर पुद्गलोंके उपकार है। तथा नाम है कारण जिसको, ऐसा सर्वत्र योग विशेषसे सूक्ष्म एक क्षेत्रावगाहमे स्थित आत्माके प्रदेशोमें अनन्तानन्त है, इत्यादि आगे कहेगे। यहां कर्मोके योग्य शरीरकी रचनाकेलिये पुद्गलोंका ग्रहण करना जन्म है। वह जन्म तीन प्रकारका है। यथा;—

सम्मूर्छनगर्भोपपाता जन्म ॥ ३२ ॥

सम्मूर्छनं गर्भ उपपात इत्येतत्त्रिविधं जन्म।

सूत्रार्थः—समूर्छन, गर्भ, और उपपात ये तीन प्रकारके जन्म है ॥ ३२ ॥

सचित्तशीतसंवृत्ताः सेतरा मिश्राश्चैकशस्तद्योनयः ॥ ३३ ॥

सूत्रार्थः—जीवोके ये जो तीन प्रकारके जन्म कहे है, उनके सचित्त आदि, तथा सचित्तादिके विपक्षी अचित्त आदि, और मिश्र अर्थात् सचित्ताचित्त आदि एक २ योनि होती है।

संसारे जीवानामस्य त्रिविधस्य जन्मन एता सचित्तादय सप्रतिपक्षा मिश्राश्चैकशो योनयो भवन्ति। तद्यथा। सचित्ता अचित्ता सचित्ताचित्ता शीता उष्णा शीतोष्णा संवृत्ता विवृत्ता संवृत्तविवृत्ता इति। तत्र देवनारकानामचित्ता योनिः। गर्भजन्मना मिश्रा। त्रिविधान्येषाम् ॥ गर्भजन्मनां देवानां च शीतोष्णा। तैजसकायस्योष्णा। त्रिविधान्येषाम् ॥ नारकैकेन्द्रियदेवानां संवृत्ता। गर्भजन्मनां मिश्रा। विवृत्तान्येषामिति ॥

विशेषव्याख्या—इस संसारमे जीवोका जो त्रिविध जन्म अभी कहा है, उसके ये अर्थात् सचित्तादि, उनके विरोधी अचित्तादि, तथा मिश्र सचित्ताचित्तादि एक २ योनि होती है। जैसे; सचित्ता, अचित्ता और सचित्ताचित्ता, तथा शीता, उष्णा और शीतोष्णा, ऐसे ही

संवृत्ता, असंवृत्ता अथवा विवृत्ता, और मिश्र अर्थात् सवृत्तविवृत्ता । उनमे देव तथा नारकी जीवोंकी अचित्तायोनि होती है। गर्भसे जन्म होनेवालोंकी मिश्रा होती है। और इनसे जो शेष रहे, उनकी तीनों प्रकारकी योनि होती है । गर्भसे जन्मवाले जीवोंकी तथा देवोंकी शीतोष्णा है । तेज.कायिकवालोंकी उष्णा योनि है । और अन्य जो शेष है उनकी त्रिविध योनि है । नारकजीव, एकेन्द्रियजीव, तथा देव इनकी सवृत्ता योनि है । गर्भसे उत्पन्न होनेवालोंकी मिश्रा अर्थात्, सवृतविवृत्ता योनि है, और इनमे जो अन्य है उनकी विवृत्ता है ॥ ३३ ॥

जराय्वण्डपोतजानां गर्भः ॥ ३४ ॥

सूत्रार्थः—जरायुज, अडज और पोतज इनका गर्भरूप जन्म होता है ।

भाष्यम्—जरायुजानां मनुष्य गो-महिषाजाविकाश्व-खरोष्ट्र-मृग चमर-वराह-गवय-सिह-व्याघ्रर्क्ष-द्वीपि-श्व शृगाल-मार्जारादीनाम । अण्डजानां सर्प-गोधा-कृकलाश-गृहकोकिलिका-मत्स्य-कूर्म-नक्र-शिशुमारादीना पक्षिणा च लोमपक्षाणा हस-चाप-शुक-गृध्र श्येन पारावत-काक-मयूर-मद्गु-बक-बलाकादीनां । पोतजानां शल्लक हस्ति-श्वाविल्लापक-शश-शारिका-नकुल-मूषिकादीनां पक्षिणां च चर्मपक्षाणां जलूका-वल्गुलि-भारण्ड–पक्षिविरालादीना गर्भो जन्मेति ॥

विशेषव्याख्याः—जरायु अर्थात् मनुष्य, गो महिष (भैंस), अजा (बकरी), अविक (भेड़), अश्व (घोडा), खर (गधा), ऊट, मृग, चमर, शूकर, गवय (नीलगाय), सिह, व्याघ्र, भालू, गेंडा, कुत्ता, श्रगाल, और मार्जार (बिल्ली) आदि । अण्डज अर्थात्, सर्प, गोह, कृकलाश (गिर गिठान व छिपकली) गृहकोकिलिका, मत्स्य, कछुआ, मगर, घड़ियाल आदि जलचर । अनेक प्रकारके पक्षी, लोम पक्षवाले, हंस, नीलकण्ठ, गृध्र (गीध), श्येन (बाज), कबूतर, काक, मोर, टिट्टिम, बक, तथा बलाका आदि । तथा पोतज अर्थात् शाही (सेई), हाथी, श्वाविल्लापक, शश सारिका, नकुल, मूषिक, चर्मपक्षवाले पक्षी, जलूका, बल्गुली, तथा भारण्डपक्षी विडालआदिका भी गर्भ ही जन्म है ॥ ३४ ॥

नारकदेवानामुपपातः ॥ ३५ ॥

सूत्रार्थः—नारक तथा देवोके उपपात जन्म है ॥ ३५ ॥

भाष्यम्—नारकाणां देवानां चोपपातो जन्मेति ।

शेषाणां सम्मूर्छनम् ॥ ३६ ॥

सूत्रार्थः—जरायुज, अडज, पोतज, नारक तथा देव इनके अतिरिक्त शेष जीवोंका सम्मूर्छन जन्म है ।

भाष्यम्—जराय्वण्डपोतजनारकदेवेभ्य शेषाणां सम्मूर्छनं जन्म । उभयावधारणं चात्र भवति । जरायुजादीनामेव गर्भः । गर्भ एव जरायुजादीनाम् । नारकदेवानामेवोपपातः । उपपात एव नारकदेवानाम । शेषाणामेव सम्मूर्छनम् । सम्मूर्छनमेव शेषाणाम ॥

विशेषव्याख्या—इस सूत्रसे दो प्रकारके नियमोंका निश्चय होता है, एक तो यह कि जरायुज आदि जीवोंका ही गर्भ होता है, और दूसरा यह कि गर्भ ही जरायुज आदिका होता है। ऐसे ही नारक देवोंका ही उपपात होता है और उपपात ही नारक देवोंका होता है। तथा जरायुज आदिसे जो शेष रहें, उन्हीका संमूर्छन है अथवा सम्मूर्छन ही उनका होता है ॥ ३६ ॥

औदारिकवैक्रियाहारकतैजसकार्मणानि शरीराणि ॥ ३७ ॥

सूत्रार्थः—औदारिक वैक्रियक आदि पाच प्रकारके शरीर होते है।

भाष्यम्—औदारिकं वैक्रियं आहारकं तैजसं कार्मणमित्येतानि पञ्च शरीराणि संसारिणां जीवानां भवन्ति।

विशेषव्याख्या—संसारी जीवोंके औदारिक, वैक्रियक, आहारक, तैजस, तथा कार्मण ये पांचप्रकारके शरीर होते है ॥ ३७ ॥

तेषां परं परं सूक्ष्मम् ॥ ३८ ॥

सूत्रार्थः—उनमेंसे आगे २ के सूक्ष्म होते है।

भाष्यम्—तेषामौदारिकादिशरीराणां परं परं सूक्ष्मं वेदितव्यम् । तद्यथा । औदारिकाद्वैक्रियं सूक्ष्मम् । वैक्रियादाहारकम् । आहारकात्तैजसम् । तैजसात्कार्मणमिति ॥

विशेषव्याख्या—उन औदारिक आदि पाच शरीरोंमेसे परं परं अर्थात् आगे २ के पूर्व २ की अपेक्षासे सूक्ष्म जानना चाहिये। जैसे, औदारिककी अपेक्षासे वैक्रियक सूक्ष्म है, वैक्रियककी अपेक्षासे आहारक सूक्ष्म है, आहारकसे तैजस और तैजससे भी कार्मण सूक्ष्म है ॥ ३८ ॥

प्रदेशतोऽसङ्ख्येयगुणं प्राक् तैजसात् ॥ ३९ ॥

सूत्रार्थः—और उन औदारिक आदि शरीरोंमे प्रदेशोंकी अपेक्षासे तैजससे पूर्व २ के शरीर असङ्ख्येयगुणें है।

भाष्यम्—तेषां शरीराणा परं परमेव प्रदेशतोऽसङ्ख्येयगुणं भवति प्राक् तैजसात्। औदारिकशरीरप्रदेशेभ्यो वैक्रियशरीरप्रदेशा असङ्ख्येयगुणाः। वैक्रियशरीरप्रदेशेभ्य आहारकशरीरप्रदेशा असङ्ख्येयगुणा इति ॥

विशेषव्याख्या—उन पूर्वोक्त शरीरोंमे प्रदेशकी अपेक्षासे तैजसके पूर्वके तीन शरीर पर पर असंख्येयगुणे है। जैसे औदारिक शरीरके प्रदेशोंकी अपेक्षासे वैक्रियक शरीरके प्रदेश असंख्येयगुणें है। तथा वैक्रियक शरीरके प्रदेशोंकी अपेक्षासे आहारक शरीरके प्रदेश भी असंख्येयगुणें है ॥ ३९ ॥

अनन्तगुणे परे ॥ ४० ॥

सूत्रार्थः—आहारकसे परे जो दो शरीर है, वे पूर्व २ से अनन्तगुणे है।

भाष्यम्—परे द्वे शरीरे तैजसकार्मणे पूर्वत पूर्वत' प्रदेशार्थतयानन्तगुणे भवतः । आहारकात्तैजसं प्रदेशतोऽनन्तगुणम् । तैजसात्कार्मणमनन्तगुणमिति ।

विशेषव्याख्या—पूर्व तीन शरीरोंसे परे जो दो शरीर तैजस और कार्मण है, वे पूर्व २ प्रदेशोंकी अपेक्षासे अनन्तगुणें प्रदेशवाले है । जैसे आहारकके प्रदेशोंकी अपेक्षासे तैजस शरीरके प्रदेश अनन्तगुणें है, और तैजस शरीरके प्रदेशोंकी अपेक्षासे कार्मण शरीरके प्रदेश अनन्तगुणें है ॥ ४० ॥

अप्रतिघाते ॥ ४१ ॥

सूत्रार्थः—और ये अन्तके दो शरीर अप्रतिघात है ।

भाष्यम्—एते द्वे शरीरे तैजसकार्मणे अन्यत्र लोकान्तात्सर्वत्राप्रतिघाते भवतः ।

विशेषव्याख्या—पूर्व सूत्रसे परेका सम्बन्ध इसमे भी आता है, इसलिये ये अन्तिम दो शरीर अप्रतिघात अर्थात् प्रतिघातशून्य है । तात्पर्य यह कि ये दो तैजस और कार्मण कही किसीमे नही रुकते, और न ये किसीको रोकते है । परन्तु यह व्यवस्था लोकान्त तक है अर्थात् लोकके अन्तपर्यन्त इनकी गति है, लोकान्तके आगे इनका प्रतिघात हो जाता है ॥ ४१ ॥

अनादिसम्बन्धे च ॥ ४२ ॥

सूत्रार्थः—और इन दोनोंके साथ जीवका अनादि सम्बन्ध भी है ।

भाष्यम्—ताभ्यां तैजसकार्मणाभ्यामनादिसम्बन्धो जीवस्येत्यनादिसम्बन्ध इति ।

विशेषव्याख्या—तैजस तथा कार्माण शरीर जो है, उन दोनोंके साथ जीवका सम्बन्ध अनादिकालसे चला आता है ॥ ४२ ॥

सर्वस्य ॥ ४३ ॥

सूत्रार्थः—तैजस तथा कार्माण ये दो शरीर सम्पूर्ण संसारी जीवोंके होते है ।

भाष्यम्—सर्वस्य चैते तैजसकार्मणे शरीरे संसारिणो जीवस्य भवत. । एके त्वाचार्या नयवादापेक्षं व्याचक्षते । कार्मणमेवैकमनादिसम्बन्धम् । तेनैवैकेन जीवस्यानादि सम्बन्धो भवतीति । तैजस तु लब्ध्यपेक्षं भवति । सा च तैजसलब्धिर्न सर्वस्य कस्यचिदेव भवति । क्रोधप्रसादनिमित्तौ शापानुग्रहौ प्रति तेजोनिसर्गशीतरश्मिनिसर्गकरं तथा भ्राजिष्णुप्रभासमुदयच्छायानिर्वर्तक तैजस शरीरेषु मणिज्वलनज्योतिष्कविमानवदिति ।

विशेषव्याख्या—सम्पूर्ण संसारी जीवमात्रका तेजस तथा कार्मण शरीरसे अनादि सम्बन्ध है । यह सूत्रका अर्थ है, किन्तु कोई २ आचार्य नयवादकी अपेक्षासे व्याख्यान करते है । वे कहते है, कि एक कार्मणका ही अनादि सम्बन्ध है । वही एक शरीर ऐसा है, जिसके साथ जीवका अनादि सम्बन्ध है । और तैजस शरीर तो लब्धिकी अपेक्षा रखता है और वह किसीको ही होता है । क्योंकि तैजसलब्धि जीवमात्रको नही होती किसी २ को होती है । तथा क्रोध और प्रसादके (प्रसन्नताके) कारण जो शाप और

अनुग्रह है, उनके प्रति अर्थात् उनकेलिये तेजका उत्पत्तिस्थान और चन्द्रमाके स्वभावका सम्पादक तथा अति दैदीप्यमान सूर्यकी उदय होती हुई प्रभाकी छायाका उत्पादक शरीरोंमें यह तैजस ऐसे है, जैसे मणियोसे दैदीप्यमान ज्योतिष्क विमान ॥ ४३ ॥

तदादीनि[1] भाज्यानि युगपदेकस्याऽऽचतुर्भ्यः ॥ ४४ ॥

सूत्रार्थः—उन दोनोंको आदिलेके एक कालमे एक जीवके चार शरीर पर्यन्त प्राप्य हैं ।

भाष्यम्—ते आदिनी एषामिति तदादीनि । तैजसकार्मणे यावत्संसारभाविनी आदि कृत्वा शेषाणि युगपदेकस्य जीवस्य भाजान्याचतुर्भ्य. । तद्यथा । तैजसकार्मणे वा स्याताम् । तैजसकार्मणौदारिकाणि वा स्यु. । तैजसकार्मणवैक्रियाणि वा स्यु: । तैजसकार्मणौदारिकवैक्रियाणि वा स्यु' । तैजसकार्मणौदारिकाहारकाणि वा स्यु ॥ कार्मणमेव वा स्यात् । कार्मणौदारिके वा स्याताम् । कार्मणवैक्रिये वा स्याताम् । कार्मणौदारिकवैक्रियाणि वा स्यु' । कार्मणौदारिकाहारकाणि वा स्यु. । कार्मणतैजसौदारिकवैक्रियाणि वा स्यु' । कार्मणतैजसौदारिकाहारकाणि वा स्यु: । न तु कदाचिद्युगपत्पञ्च भवन्ति । नापि वैक्रियाहारके युगपद्भवत. स्वामिविशेषादिति वक्ष्यते ॥

विशेषव्याख्या—तैजस तथा कर्माण जिनकी आदिमे है, ऐसे शेष शरीर एक कालमें एक जीवके चार तक भाज्य (विकल्प अथवा प्राप्य) है । तैजस और कार्माण तो ससारी मात्र सब जीवोंमे होनेवाले है, उन्हीको आदि लेकर एक कालमें एक जीवको चार शरीरपर्यन्त विकल्पनीय है । जैसे जिसके दो ही शरीरकी योग्यता है, उसके तैजस और कार्माण हो सक्ते है । जिसको तीन हो सक्ते है, उसके तैजस कार्मण और औदारिक हो सक्ते हैं, अथवा तैजस, कार्मण, और वैक्रियक हो सक्ते है । और चारकी योग्यतामे तैजस, कार्मण, औदारिक और वैक्रियक हो सक्ते है, अथवा तैजस, कार्मण औदारिक और आहारक हो सक्ते है । अथवा तैजसके अनादि सम्बन्धताके खंडन पक्षमें एक ही शरीर जब अनादि सम्बन्ध है, तब केवल कार्मण ही एक हो सक्ता है । दो

---

१ '**तदादीनि भाज्यानि,** इत्यादि सूत्रकी व्याख्या करते हुए भाष्यकारने 'ते आदिनी एषाम्, ऐसा समासका विग्रह किया है । इससे यह ज्ञात होता है कि पूर्व प्रसगसे प्रस्तुत जो तैजस और कार्मण है, वे 'के ते आदिनी, इस द्विवचनान्त पदसे यहा विवक्षित है, अतएव उन्हीको मेढीभूत करके "तैजसकार्मणे यावत्ससारभाविनो,, ऐसा विवरण किया है । अतएव उन दोनोको आदिलेके चार शरीरतक एक कालमें एक जीवको विकल्पनीय है, और ऊपर कहे हुए पाच विकल्प करना जब तैजस अनादिसम्बन्ध रूपसे एक आचार्यके मतमे खण्डन किया है, तब तो एक जीवको एक कालमे तीन ही हो सक्ते है, और 'ते' द्विवचनान्त विग्रहसे आचार्यका यह अभिप्राय है कि आश्रयरूपसे तैजस है, अथवा 'तत् कार्मण आदि एषा तानि तदादीनि, ऐसी व्याख्या करना और सात विकल्प करना ।

की सत्तामें कार्मण और औदारिक हो सक्ते है अथवा कार्मण और वैक्रियक हो सक्ते है। तथा तीनकी योग्यतामें कार्मण, औदारिक, और वैक्रियक हो सक्ते है वा कार्मण, औदारिक और आहारक हो सक्ते है। और चारकी योग्यतामें कार्मण, तैजस, औदारिक और वैक्रियक हो सक्ते है, अथवा कार्मण, तैजस, औदारिक और आहारक हो सक्ते है। परन्तु कदाचित् भी एक कालमें एक ही जीवके पांचों शरीर नही होते। और वैक्रियक तथा आहारक भी एक कालमें नही होते। क्योंकि वैक्रियक तथा आहारकके स्वामीमें विशेष (भेद) है। यह विषय हम आगे कहेंगे ॥ ४४ ॥

निरुपभोगमन्त्यम् ॥ ४५ ॥

सूत्रार्थः—अन्तका जो शरीर है, वह उपभोगसे रहित है।

भाष्यम्—अन्त्यमिति सूत्रक्रमप्रामाण्यात्कार्मणमाह। तन्निरुपभोगम्। न सुखदुःखे तेनोपभुज्येते न तेन कर्म बध्यते न वेद्यते नापि निर्जीर्यत इत्यर्थः ॥ शेषाणि तु सोपभोगानि। यस्मात्सुखदुःखे तैरुपभुज्येते कर्म बध्यते वेद्यते निर्जीर्यते च तस्मात्सोपभोगानीति।

विशेषव्याख्या—यहापर 'अन्त्य, शब्दसे "औदारिकवैक्रियकाहारकतैजसकार्मणानि शरीराणि" इस सूत्रके प्रामाण्यसे सबके अन्तमें होनेवाले कार्मण शरीरको आचार्य कहते है। इस हेतुसे वह कार्मण शरीर निरुपभोग है, अर्थात उपभोगसे वर्जित है, उसके द्वारा सुख अथवा दुःखका उपभोग नही होता। कर्मोका बन्धन भी कार्मण शरीरसे नहीं होता, कर्मका ज्ञान भी उससे नही होता, कर्मोकी जीर्णता भी उससे नही होती। और कार्मणको छोडके शेष जो औदारिक आदि चार शरीर है, वे उपभोगसहित है, क्योंकि उनके द्वारा सुख तथा दुःखका उपभोग होता है। कर्मोका बन्धन होता है, कर्मोका लाभ वा ज्ञान होता है, तथा कर्मोंकी जीर्णता भी होती है, अर्थात् कर्मोकी निर्जरा भी शेष शरीरोसे होती है। इस हेतुसे वे आदिके चार शरीर उपभोग सहित है ॥ ४५ ॥

अत्राह। एषां पञ्चानामपि शरीराणां सम्मूर्छनादिषु त्रिषु जन्मसु किं क जायत इति। अत्रोच्यते।

अब यहांपर कहते है कि इन औदारिक आदि पांचों शरीरोंमेंसे सम्मूर्छन गर्भ तथा उपपात ये जो तीन प्रकारके जन्म कहे है, उनमे कौन शरीर कहा अर्थात् किस प्रकारके जन्मसे उत्पन्न होता है? यहा कहते है,—

गर्भसम्मूर्छनजमाद्यम् ॥ ४६ ॥

सूत्रार्थः—आदिका शरीर गर्भ तथा सम्मूर्छन रूप जन्मसे उत्पन्न होता है।

भाष्यम्—आद्यमिति सूत्रक्रमप्रामाण्यादौदारिकमाह। तद्गर्भे सम्मूर्छने वा जायते।

विशेषव्याख्या—यहां भी सूत्रक्रमके प्रामाण्यसे 'आद्य, शब्दसे आदिमें होनेवाले

औदारिक शरीरको आचार्य कहते है, वह आद्य औदारिकशरीर गर्भ और सम्मूर्छनरूप जन्मसे उत्पन्न होता है ॥ ४६ ॥

वैक्रियमौपपातिकम् ॥ ४७ ॥

सूत्रार्थः—वैक्रियक शरीर उपपातरूप जन्ममे उत्पन्न होता है ।

भाष्यम्—वैक्रियशरीरमौपपातिकं भवति । नारकाणां देवानां चेति ।

विशेषव्याख्या—वैक्रियक शरीर उपपात जो जन्मका तीसरा प्रकार है, उसमे उत्पन्न होता है । और उपपातरूप जन्ममे वैक्रियक शरीर नारक जीव तथा देवोंका होता है । क्योंकि उपपात जन्म नारकी तथा देवोका होता है, यह पूर्वमे कह चुके है ॥ ४७ ॥

लब्धिप्रत्ययं च ॥ ४८ ॥

सूत्रार्थः—और वैक्रियक शरीर लब्धि प्रत्यय भी है ।

भाष्यम्—लब्धिप्रत्ययं च वैक्रियशरीरं भवति । तिर्यग्योनीनां मनुष्याणां चेति ।

विशेषव्याख्या—वैक्रियक शरीर उपपात स्वरूप जन्मसे होता है, और वह वैक्रियक लब्धि प्रत्यय भी है अर्थात् उसके उत्पन्न होनेमे लब्धि कारण है । और वह लब्धि वैक्रियक, तिर्यग्योनिज तथा मनुष्योंको होती है ॥ ४८ ॥

शुभं विशुद्धमव्याघाति चाहारकं चतुर्दशपूर्वधरस्यैव ॥ ४९ ॥

सूत्रार्थः—तथा आहारक शरीर शुभ, विशुद्ध और अव्याघाति होता है, और वह चतुर्दशपूर्वके धारियोके ही होता है ।

भाष्यम्—शुभमिति शुभद्रव्योपचितं शुभपरिणामं चेत्यर्थः । विशुद्धमिति विशुद्धद्रव्योपचितमसावद्यं चेत्यर्थः । अव्याघातीति आहारकं शरीरं न व्याहन्ति न व्याहन्यते चेत्यर्थः । तच्चतुर्दशपूर्वधर एव कस्मिंश्चिदर्थे कृच्छ्रेऽत्यन्तसूक्ष्मे सन्देहमापन्नो निश्चयाधिगमार्थं क्षेत्रान्तरितस्य भगवतोऽर्हतः पादमूलमौदारिकेण शरीरेणाशक्यगमनं मत्वा लब्धिप्रत्ययमेवोत्पादयति दृष्ट्वा भगवन्तं छिन्नसंशयः पुनरागत्य व्युत्सृजत्यन्तर्मुहूर्तस्य ॥

सूत्रार्थः—जम्बूद्वीपादि शुभनामवाले द्वीप और लवणसमुद्रादि शुभनामवाले समुद्र है।

भाष्यम्—जम्बूद्वीपादयो द्वीपा लवणादयश्च समुद्राः शुभनामान इति । यावन्ति लोके शुभानि नामानि तन्नामान इत्यर्थः । शुभान्येव वा नामान्येषामिति ते शुभनामान. । द्वीपादनन्तरः समुद्रः समुद्रादनन्तरो द्वीपो यथासङ्ख्यम् । तद्यथा । जम्बूद्वीपो द्वीपो लवणोदः समुद्रः धातकीखण्डो द्वीप. कालोदः समुद्रः पुष्करवरो द्वीप. पुष्करोदः समुद्र वरुणवरो द्वीपो वरुणोदः समुद्रः क्षीरवरो द्वीप. क्षीरोदः समुद्रो घृतवरो द्वीपो घृतोद. समुद्रः इक्षुवरो

द्वीप इक्षुवरोदः समुद्रः नन्दीश्वरो द्वीपो नन्दीश्वरवरोदः समुद्र' अरुणवरो द्वीपोऽरुणवरोदः समुद्र इत्येवमसङ्ख्येया द्वीपसमुद्राः स्वयम्भूरमणपर्यन्ता वेदितव्या इति ॥

विशेषव्याख्या—जम्बूद्वीपसे आदि लेके द्वीप और लवणसमुद्रसे आदि लेके समुद्र ये शुभनामवाले है । इसका यह तात्पर्य है कि लोकमें जितने शुभनाम है, उन नामोंसे ये युक्त है । शुभ नामवाले, इसका यह तात्पर्य है कि इनके शुभ ही नाम है अशुभ नही । द्वीपके अनन्तर समुद्र और समुद्रके अनन्तर द्वीपसमुद्र है, इसप्रकार यथासंख्य समझना चाहिये । यथा,'–जम्बूद्वीप नामक द्वीप है, और उसके अनन्तर लवणोद नामक समुद्र है, उसके पश्चात् पुन धातकीखण्ड नामक द्वीप है, उसके अनन्तर पुनः कालोद नामक समुद्र है, पुनः पुष्करवरद्वीप है, पुन पुष्करोदनामक समुद्र है, पुन वरुणवरद्वीप है, पुनः वरुणोद नामक समुद्र है, पुन क्षीरवर नामक द्वीप है और क्षीरोद समुद्र है, पुनः घृतवर नामक द्वीप है, पुनः घृतोद नामक समुद्र है, पुनः इक्षुवर नामक द्वीप है, पुन इक्षुवरोद नामक समुद्र है, पुन. नन्दीश्वर नामक द्वीप है, पुन नन्दीश्वरवरोद समुद्र है; पुनः अरुणवर नामक द्वीप है, और पुनः उसके अनन्तर अरुणवरोद नामक समुद्र है; इस प्रकार असख्येय द्वीप समुद्र स्वयम्भूरमण पर्यन्त जानने चाहिये ॥ ७ ॥

द्विर्द्विर्विष्कम्भाः पूर्वपूर्वपरिक्षेपिणो वलयाकृतयः ॥ ८ ॥

सूत्रार्थ—ये द्वीप समुद्र द्विगुण २ विष्कभके धारण करनेवाले है, तथा पूर्व पूर्व द्वीप समुद्रको पर २ के द्वीपसमुद्र चारों ओरसे घेरे है, और सब ही वलयाकार (वृत्ताकार) है ।

भाष्यम्—सर्वे चैते द्वीपसमुद्रा यथाक्रममादितो द्विर्द्विर्विष्कम्भाः पूर्वपूर्वपरिक्षेपिणो वलयाकृतयः प्रत्येतव्याः । तद्यथा । योजनशतसहस्रविष्कम्भो जम्बूद्वीपस्य वक्ष्यते । तद्द्विगुणो लवणजलसमुद्रस्य । लवणजलसमुद्रविष्कम्भाद्द्विगुणो धातकीखण्डद्वीपस्य । इत्येवमास्वयम्भूरमणसमुद्रादिति ॥

विशेषव्याख्या—प्रथम जम्बूद्वीपसे आदि लेके द्वीप और समुद्र सब यथाक्रमसे द्विगुण २ व्यास प्रमाण होते गये है, और पर २ के द्वीप समुद्र पूर्व २ द्वीप समुद्रको चारों ओरसे घेरे है । और वलय (कटक अर्थात् कडे) के आकारके है, ऐसा जानना चाहिये । जैसे, एक सहस्रयोजन अर्थात् एकलक्ष योजन विष्कंभ (विस्तार) जम्बूद्वीपका कहेंगे । और जम्बूद्वीपसे द्विगुण विष्कंभ लवणसमुद्रका है, और लवणसमुद्रके विष्कंभसे द्विगुण विष्कंभ धातकीखंडका है । इस प्रकार पूर्व २ से पर २ द्विगुण विष्कंभवाले द्वीप समुद्र स्वयभूरमण पर्यन्त जानने चाहिये ।

पूर्वपूर्वपरिक्षेपिणः । सर्वे पूर्वपूर्वपरिक्षेपिणः प्रत्येतव्या. । जम्बूद्वीपो लवणसमुद्रेण परिक्षिप्तः । लवणजलसमुद्रो धातकीखण्डेन परिक्षिप्तः । धातकीखण्डद्वीपः कालोदसमुद्रेण परि-

क्षिप्तः। कालोदसमुद्रः पुष्करवरद्वीपार्धेन परिक्षिप्तः। पुष्करद्वीपार्धं मानुषोत्तरेण पर्वतेन परिक्षिप्तम्। पुष्करवरद्वीपः पुस्करवरोदेन समुद्रेण परिक्षिप्तः। एवमास्वयम्भूरमणात्समुद्रादिति॥

पूर्व २ का परिक्षेप करनेवाले है, इसका तात्पर्य यह है, कि सब द्वीप समुद्र अपनेसे पूर्व २ को चारों ओरसे घेरे है। जैसे; प्रथम जम्बूद्वीप अपनेसे द्विगुण विष्कभवाले लवणोदसमुद्रसे चारों ओरसे घिरा है, और लवणोदसमुद्र अपनेसे द्विगुण परिमाणवाले धातकीखंडसे घिरा है। ऐसे ही धातकीखंडद्वीप कालोदसमुद्रसे घिरा है। कालोदसमुद्र पुष्करवरद्वीपसे घिरा है। पुष्करार्द्ध मानुषोत्तरपर्वतसे घिरा है। और पुष्करवर द्वीप पुष्करवरसमुद्रसे घिरा है। इसी प्रकार स्वयंभूरमण पर्यन्त द्वीप समुद्र पूर्व २ पर २ से घिरे है।

वलयाकृतय। सर्वे च ते वलयाकृतयः सह मानुषोत्तरणेति॥

'वलयाकृतय.' इसका यह अभिप्राय है, कि सब द्वीप समुद्र मानुषोत्तरपर्वत सहित वलयके आकार है॥ ८॥

तन्मध्ये मेरुनाभिर्वृत्तो योजनशतसहस्रविष्कम्भो जम्बूद्वीपः॥ ९॥

सूत्रार्थः—उन द्वीपसमुद्रोंके मध्यमे मेरुपर्वत ही है नाभि जिसकी ऐसा, तथा वृत्ताकार एकलक्ष योजन विष्कभवाला जम्बूद्वीप है।

भाष्य—तेषां द्वीपसमुद्राणां मध्ये तन्मध्ये॥ मेरुनाभिः। मेरुरस्य नाभ्यामिति मेरुर्वास्य नाभिरिति मेरुनाभि.। मेरुरस्य मध्य इत्यर्थः॥ सर्वद्वीपसमुद्राभ्यन्तरो वृत्त कुलालचक्राकृतिर्योजनशतसहस्रविष्कम्भो जम्बूद्वीपः। वृत्तग्रहणं नियमार्थम्। लवणादयो वलयवृत्ता जम्बूद्वीपस्तु प्रतरवृत्त इति। यथा गम्येत वलयाकृतिभिश्चतुरस्रत्र्यस्रयोरपि परिक्षेपो विद्यते तथा च माभूदिति॥

विशेषव्याख्या—पूर्वोक्त असंख्य द्वीप और समुद्रोंके मध्यमे मेरुपर्वतरूप नाभियुक्त, प्रतरवृत्त एकलाख योजन विष्कभयुक्त जम्बूद्वीप है। वहांपर **'मेरुनाभि'** इस पदसे मेरु जिसकी नाभिमे है, अथवा मेरु जिसकी नाभि है, यह आशय है। दोनोंप्रकारके समाससे मेरु जिसके मध्यमे है, यह अभिप्राय है। सब द्वीप और समुद्रोके आभ्यन्तर वृत्ताकार अर्थात् कुलालके चक्रसदृश आकारवान् शतसहस्र (लाख) योजन विष्कभ सहित जम्बूद्वीप है। यहा पर वृत्त कहना इस नियमके अर्थ है कि, लवणसे आदि लेके द्वीप समुद्र वलयाकार वृत्त है। और जम्बूद्वीप प्रतरवृत्त है। यह कथन इसलिये है कि, कदाचित् ऐसा ज्ञान न हो जावे कि वलयाकार पदार्थोको चतुष्कोण और त्रिकोणोंका भी परिवेष्टन (घिराव) होता है, जो कि न होना चाहिये।

मेरुरपि काञ्चनस्थालनाभिरिव वृत्तो योजनसहस्रमधोधरणितलमवगाढो नवनवत्यु

च्छ्रितो दशाधो विस्तृतः सहस्रमुपरीति । त्रिकाण्डस्त्रिलोकप्रविभक्तमूर्तिश्चतुर्भिर्वनैर्भद्रशालनन्दनसौमनसपाण्डकैः परिवृत्त. । तत्र शुद्धपृथिव्युपलवज्रशर्कराबहुलं योजनसहस्रमेकं प्रथमं काण्डम् । द्वितीयं त्रिषष्टिसहस्राणि रजतजातरूपाङ्कस्फटिकबहुलम् । तृतीयं षट्त्रिंशत्सहस्राणि जम्बूनदबहुलम् । वैडूर्यबहुला चास्य चूलिका चत्वारिंशद्योजनान्युच्छ्रायेण मूले द्वादशविष्कम्भेण मध्येऽष्टावुपरि चत्वारीति । मूले वलयपरिक्षेपि भद्रशालवनम् । भद्रशालवनात्पञ्च योजनशतान्यारुह्य तावत्प्रतिक्रान्तिविस्तृतं नन्दनम् । ततोऽर्धत्रिषष्टिसहस्राण्यारुह्य पञ्चयोजनशतप्रतिक्रान्तिविस्तृतमेव सौमनसम् । ततोऽपि षट्त्रिंशत्सहस्राण्यारुह्य चतुर्नवतिचतु:शतप्रतिक्रान्तिविस्तृतं पाण्डकवनमिति । नन्दनसौमनसाभ्यामेकादशैकादशसहस्राण्यारुह्य प्रदेशपरिहाणिर्विष्कम्भस्येति ॥

मेरु भी काञ्चन (सुवर्ण) के थारकी नाभिके समान वृत्ताकार सहस्र योजन पृथिवीमें प्रविष्ट, निन्नानवे सहस्र योजन उंचा, दश सहस्र योजन अधोभागमें विस्तृत, और सहस्र योजन ऊपर विस्तारयुक्त है । तथा तीन कांड सहित, तीनों लोकोंको प्रविभक्तमूर्ति अर्थात् विभाग करनेवाला और भद्रशाल, नन्दन, सौमनस, तथा पाण्डुक नामक चार वनोंसे घिरा है । उन तीनों काडो (विभागों) मेंसे प्रथमकाड शुद्धपृथिवी, पाषाण (बहुमूल्य पाषाण), वज्र (हीरकादि) तथा शर्करा (वालू) से प्राय. पूर्ण और एक सहस्र योजन प्रमाण सहित है । और द्वितीयकांड प्रायः रौप्य, सुवर्ण तथा स्फटिक मणिसे पूर्ण त्रेसठसहस्र योजन प्रमाण सहित है । तथा तृतीयकांड प्राय· जम्बूनदनामक उत्तम सुवर्णसे पूर्ण और छत्तीससहस्र योजन प्रमाण सहित है । और चवालीस योजन ऊंची, मूलभागमें बारह योजन विस्तारसहित, मध्यभागमें आठ और ऊपर चार योजन विष्कंभसहित इस मेरुकी चूलिका है । और मूल भागमें भद्रशालवन उसको वेष्टित किये (घेरे) है । और भद्रशालसे पांचसौ योजन और चढके वहां तक-प्रतिक्रान्ति (प्रतिव्याप्ति वा प्रतिबिम्ब) से विस्तृत नन्दनवन है । और उसके पश्चात् साढे त्रेसठ सहस्र योजन आगे चढके पांच ही सौ योजन प्रतिक्रान्तिसे विस्तृत सौमनस वन है । और उस सौमनससे भी छत्तीस सहस्र योजन और आगे चढके चारसौ चौरानवे योजन पर्यन्त प्रतिक्रान्तिसे विस्तृत पाण्डकवन है । और नन्दन तथा सौमनस इन दोनोंसे ग्यारह २ सहस्र योजन चढके विष्कंभके[1] प्रमाणकी परिहाणि अर्थात् न्यूनता है ॥ ९ ॥

१ यह मेरु सर्वत्र सम प्रमाणसे नहीं है, किन्तु प्रदेशप्रमाणकी परिहाणिसे न्यून होता गया है, इस विषयको दर्शाते है × × × × × × नन्दनवनसे ऊपर और सौमनसके नीचे मध्यमें ग्यारह २ सहस्र योजन चढके एक सहस्र योजन विष्कभकी न्यूनता होती जाती है । और सौमनसके ऊपर तथा नन्दनके नीचे इन आचार्य-(सूरि)ने नहीं कहीं । × × × और यह परिहाणि (न्यूनता) जो आचार्यने कही है, वह गणितके अनुसार किञ्चित भी विश्वासके योग्य नहीं है । क्योंकि सौमनस वनमे अभ्यन्तरका विष्कभ तीन सहस्र दो सौ बहत्तर योजन तथा ग्यारहके आठ भाग है । ३२७२ ८/११ । और बाह्यविष्कभ चार हजार दो सौ बहत्तर योजन तथा ग्यारहके आठ भाग है । ४२७२ ८/११ । और आचार्य कथित परिहाणिसे

तत्र भरतहैमवतहरिविदेहरम्यकहैरण्यवतैरावतवर्षाः क्षेत्राणि ॥ १० ॥

सूत्रार्थः—उस जम्बूद्वीपमे भरत हैमवतादि सात वर्षधर क्षेत्र है ।

भाष्यम्—तत्र जम्बूद्वीपे भरतं हैमवतं हरयो(?)विदेहा रम्यकं हैरण्यवतमैरावतमिति सप्त वंशाः क्षेत्राणि भवन्ति । भरतस्योत्तरतो हैमवतं हैमवतस्योत्तरतो हरय इत्येवं शेषाः । वंशा वर्षा वास्या इति चैषां गुणत. पर्यायनामानि भवन्ति । सर्वेषां चैषां व्यवहारनयापेक्षादादित्यकृतादिग्नियमादुत्तरतो मेरुर्भवति । लोकमध्यावस्थितं चाष्टप्रदेशं रुचकं दिग्नियमहेतु प्रतीत्य यथासम्भवं भवतीति ॥

विशेषव्याख्या—जम्बूद्वीपमे भरत १, हैमवत २, हरि ३, विदेह ४, रम्यक ५, हैरण्यवत ६, और ऐरावत ७, ये सात वंशधर क्षेत्र है । भरतके उत्तर हैमवत है, और हैमवतके उत्तर हरिनामक क्षेत्र है । इस प्रकार रम्यकादि भी पूर्व २ के उत्तर समझ लेना चाहिये । वंश, वर्ष, तथा वास्य ये इन क्षेत्रोंके गुणसे पर्याय नाम है, अर्थात् ये सात वंशधरपर्वत, वर्षधरपर्वत अथवा वास्यधरपर्वत कहे जा सकते है । और व्यवहार नयकी अपेक्षासे, सूर्यकृत दिशाके नियमसे, इन भरत हैमवत आदि सब क्षेत्रोमे मेरु उत्तर दिशामें है । परन्तु लोकके मध्यमे स्थित रुचकाष्ट प्रदेशोंको दिशाओंका हेतु मानकर यथासम्भव निश्चय दिग्विभाग होता है ॥ १० ॥

तद्विभाजिनः पूर्वापरायता हिमवन्महाहिमवन्निषधनीलरुक्मिशिखरिणो वर्षधरपर्वताः ॥ ११ ॥

सूत्रार्थः—उन भरतादि क्षेत्रोंका विभाग करनेवाले पूर्व पश्चिम चौडे हिमवत् आदि छह वर्षधरपर्वत है ।

भाष्यम्—तेषां वर्षाणां विभक्तारो हिमवान महाहिमवान् निषधो नीलो रुक्मी शिखरी इत्येते षड्वर्षधराः पर्वताः । भरतस्य हैमवतस्य च विभक्ता हिमवान् हैमवतस्य हरिवर्षस्य च विभक्ता महाहिमवानित्येवं शेषा ॥

विशेषव्याख्या—पूर्वमें जो भरत, हैमवत, आदि क्षेत्र कहे है, उनको विभक्त अर्थात् पृथक् २ करनेवाले हिमवान्, महा हिमवान्, निषध, नील, रुक्मी, और शिखरी ये छह वर्षधर पर्वत है । उनमें भरत तथा हैमवतको पृथक् करनेवाला हिमवान् पर्वत है । और हैमवत तथा हरिका विभाग करनेवाला महाहिमवान् । ऐसे ही शेष भी

कोई भी विष्कभ नहीं आता । और वह बाह्य तथा आभ्यन्तरके विष्कभ प्रमाण असत्य नहीं हो सक्ते, क्योकि शास्त्रमे पढा है । और आर्षानुसारी गणितशास्त्रवेत्ता परिहाणिको और प्रकारसे वर्णन करते है । मेरु ऊपर एकलक्ष योजन ऊचा है । अपचयन्यूननादिसे रहित सहस्र योजन भूमिमे गडा हुआ अदृश्य है ।

जान लेना। अर्थात् हरि तथा विदेहका विभाजक निषध है, विदेह तथा रम्यकका विभाजक नील है । रम्यक हैरण्यवतका रुक्मी है, और हैरण्यवत तथा ऐरावत वर्षका विभाजक शिखरी पर्वत है ॥ ११ ॥

तत्र पञ्च योजनशतानि षड्विंशानि षट् चैकोनविंशतिभागा भरतविष्कम्भः । स द्विर्द्विर्हिमवद्धैमवतादीनामा विदेहेभ्यः । परतो विदेहेभ्योऽर्धार्धहीनाः ॥ पञ्चविंशतियोजनान्यवगाढो योजनशतोच्छ्रायो हिमवान् । तद्विर्महाहिमवान् । तद्विर्निषध इति ॥

उनमेसे पाचसौ छब्बीस योजन और छहके उन्नीसवें भाग ($५२६\frac{६}{१९}$) विष्कंभ प्रमाण सहित भरतवर्ष है । आगे हिमवत आदि पर्वत तथा हेमवत आदि क्षेत्रोंके विष्कम विदेहक्षेत्र पर्यन्त दूने २ होते चले गये है, और विदेहसे परे (आगे) अर्ध अर्ध न्यून होते गये है । उन पच्चीस योजन विस्तृत और शतयोजन ऊंचा हिमवान् है, और उसका भी दूना नि f है ।

भरतवर्षस्य योजनानां चतुर्दशसहस्राणि चत्वारि शतान्येकसप्ततानि षट् च भागा विशेषतो ज्या । इषुर्यथोक्तो विष्कम्भः । धनुःकाष्ठं चतुर्दशसहस्राणि शतानि पञ्चाष्टाविंशान्येकादश च भागाः साधिकाः ॥

और चौदह सहस्र चारसौ योजन तथा इकहत्तरमे छह भाग ($१४४००\frac{६}{७१}$ योजन) भरतवर्षकी ज्या[1] प्रत्यञ्चा अथवा जीवा है । इषु अर्थात् वाणका विष्कभ $५२६\frac{६}{१९}$ योजन कहा है । और धनुष्काष्ठ अर्थात् चापकी परिधि चौदह सहस्र पांचसौ और कुछ अधिक अट्ठाईसमे ग्यारह भाग योजन विष्कंभ ($१४५००\frac{११}{२८}$) है ।

भरतक्षेत्रमध्ये पूर्वापरायत उभयतः समुद्रमवगाढो वैताढ्यपर्वत. षड् योजनानि सक्रोशानि धरणिमवगाढः पञ्चाशद्विस्तरत. पञ्चविंशत्युच्छ्रित ॥

भरतवर्षमे पूर्वसे पश्चिमकी ओर लम्बा पड़ा हुआ दो ओरके समुद्रमे प्रविष्ट वैताढ्य (वैताढ्यवा विजयार्ध) पर्वत है, जो कि कुछ कोश अधिक छह योजन पृथिवीमें प्रविष्ट है । पचास योजन विस्तृत और पच्चीस योजन ऊंचा है ।

विदेहेषु निषधस्योत्तरतो मन्दरस्य दक्षिणत काञ्चनपर्वतशतेन चित्रकूटेन विचित्रकूटेन चोपशोभिता देवकुरवो विष्कम्भेणैकादश योजनसहस्राण्यष्टौ च शतानि द्विचत्वारिंशानि द्वौ च भागौ । एवमेवोत्तरेणोत्तरा. कुरवश्चित्रकूटविचित्रकूटहीना द्वाभ्या च काञ्चनाभ्यामेव यमकपर्वताभ्यां विराजिताः ॥

विदेहवर्षमें निषध पर्वतके उत्तर, मन्दरके दक्षिण काञ्चनमय शतपर्वत सहित चित्रकूट तथा विचित्रकूटसे उपशोभित देवकुरु भोगभूमि है । जो कि ग्यारह हजार आठसौ और बियालीसमे दो भाग ($११८००\frac{२}{४२}$) योजन विष्कभ प्रमाण सहित है । इसी प्रकार

---

[1] धनुषकी डोरीके तुल्य रेखा.

उत्तरकी ओर **उत्तरकुरु** है, किन्तु वे चित्रकूट तथा विचित्रकूटोंसे हीन हैं, परन्तु काञ्चनमय **यमक** नाम दो पर्वतोंसे वे **उत्तरकुरु** शोभित हैं।

विदेहा मन्दरदेवकुरूत्तरकुरुभिर्विभक्ताः क्षेत्रान्तरवद्भवन्ति। पूर्वे चापरे च। पूर्वेषु षोडश चक्रवर्तिविजया नदीपर्वतविभक्ताः परस्परागमाः अपरेऽप्येवंलक्षणाः षोडशैव॥

मन्दर, देवकुरु, तथा उत्तर कुरुओंसे अन्य क्षेत्रोंके सदृश विदेह भी विभक्त (पृथक् किये हुए) है। और उनकी **पूर्वविदेह** तथा **अपरविदेह** ऐसी सञ्ज्ञा है। पूर्वमें सोलह विदेह है, जो कि चक्रवर्तीविजय तथा नदी और पर्वतोंसे विभक्त परस्पर है। और अपर विदेह भी इसीप्रकार लक्षणयुक्त सोलह ही है।

तुल्यायामविष्कम्भावगाहोच्छ्रायौ दक्षिणोत्तरौ वैताढ्यौ तथा हिमवच्छिखरिणौ महाहिमवद्रुक्मिणौ निषधनीलौ चेति॥ हरि

दक्षिण तथा उत्तरके वैताढ्य विस्तार, विष्कंभ, अवगाह तथा उंचाईमे समान है। ऐसे ही हिमवत् और शिखरी समान है। महाहिमवत् आदि रुक्मी समान है, तथा निषध और नील समान है।

क्षुद्रमन्दरास्तु चत्वारोऽपि धातकीखण्डकपुष्करार्धका महामन्दरात्पञ्चदशभिर्योजनसहस्रैर्हीनोच्छ्रायाः। षड्भिर्योजनशतैर्धरणितले हीनविष्कम्भा। तेषां प्रथमं काण्डं महामन्दरतुल्यम्। द्वितीयं सप्तभिर्हीनम्। तृतीयमष्टाभि। भद्रशालनन्दनवने महामन्दरवत्। ततो अर्धषट्पञ्चाशद्योजनसहस्राणि सौमनसं पञ्चशतं विस्तृतम्। ततोऽष्टाविंशतिसहस्राणिचतुर्नवति चतुःशत विस्तृतमेव पाण्डकं भवति। उपरि चाधश्च विष्कम्भोऽवगाहश्च तुल्यो महामन्दरेण। चूलिका चेति॥

और चारों क्षुद्रमन्दर, **धातकीखण्डक** और **पुष्करार्धक** अर्थात् धातकीखण्ड तथा पुष्करार्धमे होनेवाले, महामन्दरसे पन्द्रहसहस्र योजन न्यून ऊंचे हैं। और छहसौ योजन धरणीतलमें भी न्यून विष्कभ है। उन क्षुद्रमन्दरोंका **प्रथमकांड** महामंदरके तुल्य है। द्वितीयकाड सातसे न्यून है। और तृतीयकांड आठसे **हीन** है। भद्रशाल तथा नन्दनवन महामन्दरके समान है। उसके पश्चात् साढ़े छप्पन हजार योजन लम्बा तथा पांचसौ योजन विस्तृत सौमनसवन है। और उसके अनन्तर **अट्ठाईस** हजार योजन लम्बा और चारसौ चौरानवे योजन विस्तृत (चौडा) **पाण्डकवन** है। इसका ऊपर तथा नीचेका विष्कंभ और अवगाह भी महामन्दरके तुल्य है। और चूलिका भी उसीके समान है।

विष्कम्भकृतेर्दशगुणाया मूलं वृत्तपरिक्षेपः। स विष्कम्भपादाभ्यस्तो गणितम्। इच्छावगाहोनावगाहाभ्यस्तस्य विष्कम्भस्य चतुर्गुणस्य मूलं ज्या। ज्याविष्कम्भयोर्वर्गविशेषमूलं विष्कम्भाच्छोध्यं शेषार्धमिषुः। इषुवर्गस्य षड्गुणस्य ज्यावर्गयुतस्य कृतस्य मूलं धनुःकाष्ठम्। ज्यावर्गचतुर्भागयुक्तमिषुवर्गमिषुविभक्तं तत्प्रकृतिवृत्तविष्कम्भः। उदग्धनुःकाष्ठाद्दक्षिणं शोध्यं शेषार्धं बाहुरिति॥

विष्कंभकृत दशगुणका मूल वृत्तपरिक्षेप है; और वह वृत्तपरिक्षेप विष्कंभपादाभ्यस्त गणित है । इच्छावगाह ऊनावगाहाभ्यस्त चतुर्गुण विष्कंभका मूल ज्या है । ज्या और विष्कंभका वर्ग विशेष मूल विष्कंभसे शोधनीय है । शेषार्ध इषु है । षड्गुण ज्या वर्ग-युक्त इषु वर्गकृतका षड्गुणमूल धनुःकाष्ठ है । और ज्या वर्गका चतुर्भागयुक्त और इषुसे विभक्त जो इषु वर्ग है, वह प्रकृतिवृत्त विष्कंभ है । और उदग्धनुःकाष्ठसे दक्षिण शोधनीय है । और शेषार्ध बाहु है ।[1]

अनेन करणाभ्युपायेन सर्वक्षेत्राणां सर्वपर्वतानामायामविष्कम्भज्येषुधनुःकाष्ठपरिमाणानि ज्ञातव्यानि ॥

इस कारणरूप उपायसे सब क्षेत्रोंके तथा सब पर्वतोंके आयाम, विष्कंभ, ज्या, इषु, और धनुःकाष्ठ रूप परिमाण जानने चाहिये[2] ।

द्विर्धातकीखण्डे ॥ १२ ॥

सूत्रार्थः—जम्बूद्वीपमें जो मन्दर तथा वंशधर पर्वतादि कहे है, वे सब धातकीं खण्डमें द्विगुण २ है ।

भाष्यम्—एते मन्दरवंशवर्षधरा जम्बूद्वीपेऽभिहिता एते द्विगुणा धातकीखण्डे द्वाभ्यामिष्वाकारपर्वताभ्यां दक्षिणोत्तरायताभ्यां विभक्ताः । एभिरेव नामभिर्जम्बूद्वीपकसमसङ्ख्याः पूर्वार्धे चापरार्धे च चक्रारकसंस्थिता निषधसमोच्छ्रायाः कालोदलवणजलस्पर्शिनो वंशधराः सेष्वाकाराः । अरविवरसंस्थिता वंशा इति ॥

विशेषव्याख्या—जम्बूद्वीपमें जो मन्दर तथा वर्षधरपर्वतादि कथन किये है, वे सब धातकीखण्डमें दक्षिणसे उत्तरकी ओर लम्बायमान् दो इषुके आकारवाले इष्वाकार पर्वतोंसे विभक्त द्विगुण है । तथा धातकीखण्डके पूर्वार्द्ध और अपरार्द्धमे भी इन्ही पूर्वोक्त नामोंसे संयुक्त, जम्बूद्वीपके समान सख्यायुक्त, चक्रमे (पहियेमे) आरकके समान स्थित, निषधपर्वतके तुल्य ऊंचे, कालोद और लवणसमुद्रके जलको स्पर्श करनेवाले, अर्थात् कालोदसे लवणसमुद्र तक विस्तृत, और इष्वाकार ये वंशधरपर्वत है । अरोके विवरोंमे (छिद्रोंमे) स्थितके समान है, इस कारणसे ये वंश कहे जाते है ॥१२॥

---

१ ये गणितके पारिभाषिक शब्द है, हमारी समझमें पूर्णरूपसे नहीं आये ।

२ इस विषयमें बहुतसे विद्वान् स्वय और भी अनेक सूत्रोंकी रचना करके उनका व्याख्यान करते है । विस्तार न हो, इसलिये आचार्यने सक्षेपसे यह तत्त्व सग्रह किया है, और इसी हेतुसे शास्त्रनिपुण जन विस्ताररूपसे जो सूत्रोका कथन है, वह प्राचीन नहीं है, ऐसा कहते है । और विस्तार ही इष्ट है, तो लक्ष ग्रन्थकी, परिभाषारूपसे जम्बूद्वीपका विस्तार करें, तो भी क्या विस्तार हुआ? अर्थात् कुछ नहीं । अथवा विस्तारार्थीको उन आचार्योंके रचित सूत्रोसे बहुत गुणयुक्त सिद्धान्त क्या निकल आता है? इस हेतु उनका अभिप्राय उपेक्षाके योग्य है ।

पुष्करार्धे च ॥ १३ ॥

सूत्रार्थः—जैसे धातकीखण्डमे मन्दरादिकोंकी संख्यादि विषय कहे, वैसे ही पुष्करार्धमें भी समझना चाहिये ।

भाष्यम्—यश्च धातकीखण्डे मन्दरादीनां सेष्वाकारपर्वतानां सङ्ख्याविषयनियमः स एव पुष्करार्धे वेदितव्यः ॥

विशेषव्याख्या—मन्दरादि तथा इषुके आकारसहित वर्षधरपर्वतोंका जो द्विगुण संख्यादिका नियम वर्णन किया है, वही नियम पुष्करार्द्ध द्वीपमें जानना चाहिये ।

ततः परं मानुषोत्तरो नाम पर्वतो मानुषलोकपरिक्षेपी सुनगरप्राकारवृत्तः पुष्करवरद्वीपार्धविनिविष्टः काञ्चनमयः सप्तदशैकविंशतियोजनशतान्युच्छ्रितश्चत्वारि त्रिंशानि क्रोशं चाधो धरणीतलमवगाढो योजनसहस्रं द्वाविंशमधस्ताद्विस्तृतः सप्तशतानि त्रयोविंशानि मध्ये चत्वारि चतुर्विंशान्युपरीति ॥

उसके अनन्तर **मानुषोत्तर** पर्वत है, जो कि मनुष्य लोकको घेरे हुए है, तथा उत्तम नगरके प्राकार (कोट)के सदृश वृत्ताकार, पुष्करार्ध द्वीपमें प्रविष्ट, सुवर्णमय, सत्रह सौ इक्कीस योजन ऊंचा, एक कोस अधिक चारसौ तीस (तेतीस) योजन पृथ्वीके अधो भागमे नीचा, एक हजार बाईस योजन नीचेके अर्थात् मूलके विस्तारसहित और सातसौ तेईस योजन मध्यभागमें और चारसौ चोवीस योजन उपरिभागमे ऐसा मानुषोत्तर पर्वत है ।

न कदाचिदस्मात्परतो जन्मतः संहरणतो वा चारणविद्याधरर्द्धिप्राप्ता अपि मनुष्या भूतपूर्वा भवन्ति भविष्यन्ति च । अन्यत्र समुद्घातोपपाताभ्याम् । अत एव च मानुषोत्तर इत्युच्यते ॥

इस मानुषोत्तर पर्वतसे परे कदाचित् भी जन्मसे अथवा संहरणसे चारण विद्याधर, और ऋद्धि प्राप्त मनुष्य पूर्वकालमें न हुए और न होंगे, अर्थात्, इस पर्वतके आगे चारणादि न कभी जन्मे न मरे और न जन्मेंगे न मरेंगे । किन्तु यह नियम समुद्घात और उपपातको छोडके है, अर्थात् समुद्घात और उपपात वाले मानुषोत्तरपर्वतके आगे भी जा सक्ते है । इस कारण इसका नाम मानुषोत्तर[१] है ।

तदेवमर्वाङ्मानुषोत्तरस्यार्धतृतीया द्वीपाः समुद्रद्वय पञ्चमन्दराः पञ्चत्रिंशत्क्षेत्राणि त्रिंशद्वर्षधरपर्वताः पञ्च देवकुरवः पञ्चोत्तराः कुरवः शतं षष्ट्यधिकं चक्रवर्तिविजयानां द्वे शते पञ्चपञ्चाशदधिके जनपदानामन्तरद्वीपाः षट्पञ्चाशदिति ॥

इस रीतिसे मानुषोत्तरपर्वतके पूर्व ढाई द्वीप, दो समुद्र, पांच मन्दर, पैंतीस क्षेत्र,

---

१ जो इस भाष्यको विद्याधर ऋद्धिप्राप्तोके गमनके निषेधमें लगाते है, उनको आगमका विरोध है, क्योंकि सब चारणादि तथा ऋद्धिप्राप्तोका गमन मानुषोत्तरके आगे भी शास्त्रोंमें कहा है, परन्तु जन्ममरण बाहिर नहीं होता ।

तीस वर्षधरपर्वत, पांच देवकुरु, पांच उत्तरकुरु, एक सौ साठ चक्रवर्त्तिविजय, दो सौ पचपन जनपद और छप्पन अन्तरद्वीप है ॥ १३ ॥

अत्राह । उक्तं भवता मानुषस्य स्वभावमार्दवार्जवत्वं चेति तत्र के मनुष्याः क्व चेति । अत्रोच्यते—

अब यहां पर कहते हैं कि, अपने मानुषके स्वभाव मार्दव (मृदुता) आर्जव (सरलता) तो कहे, परन्तु वहां मनुष्य कौन है और कहां रहते है? इसके उत्तरकेलिये यहां अग्रिम सूत्र कहते है,—

प्राग्मानुषोत्तरान्मनुष्याः ॥ १४ ॥

सूत्रार्थः—मानुषोत्तरपर्वतके पूर्व ही अन्तरद्वीपोमे तथा पैतीस क्षेत्रोंमें जन्मसे मनुष्य होते है ।

भाष्यम्—प्राग्मानुषोत्तरात्पर्वतात्पञ्चत्रिंशत्सु क्षेत्रेषु सान्तरद्वीपेषु जन्मतो मनुष्या भवन्ति । संहरणविद्यर्द्धियोगात्तु सर्वेष्वर्धतृतीयेषु द्वीपेषु समुद्रद्वये च समन्दरशिखरेष्विति ॥

विशेषव्याख्या—पूर्वमें जिस मानुषोत्तर पर्वतका वर्णन किया है, उसके पूर्व ही अन्तर द्वीपों सहित पैतीस क्षेत्रोंमे जन्म धारण करके मनुष्य होते है, अर्थात् मनुष्योंका जन्म मानुषोत्तर पर्वतके पूर्व ही होता है । और सहरण तथा विद्या ऋद्धिके योगसे तो मन्दरके शिखरोंसहित ढाई द्वीपोंमे और दोनों समुद्रोमें भी मनुष्योंके गमनादि होते है ।

भारतका हैमवतका इत्येवमादयः क्षेत्रविभागेन । जम्बूद्वीपका लवणका इत्येवमादयो द्वीपसमुद्रविभागेनेति ॥

और उन क्षेत्रोंके विभागसे भारतक, हैमवतक, अर्थात् भरत वा हेमवत आदि क्षेत्रोंमें होनेवाले इत्यादि संज्ञा होती है । और जम्बूद्वीपक तथा लवणक इत्यादि संज्ञा द्वीप तथा समुद्रके विभागसे होती है ॥ १४ ॥

आर्या म्लिशश्च[1] ॥ १५ ॥

सूत्रार्थः—मनुष्योके आर्य और म्लिश अथवा म्लेच्छ ये दो भेद है ।

भाष्यम्—द्विविधा मनुष्या भवन्ति । आर्या म्लिशश्च ॥ तत्रार्याः षड्विधाः । क्षेत्रार्या जात्यार्याः कुलार्याः कर्मार्याः शिल्पार्या भाषार्या इति । तत्र क्षेत्रार्याः पञ्चदशसु कर्मभूमिषु जाताः । तद्यथा । भरतेष्वर्धषड्विंशतिषु जनपदेषु जाता. शेषेषु च चक्रवर्तिविजयेषु । जात्यार्या इक्ष्वाकवो विदेहा हरयोऽम्बष्ठाः ज्ञाताः कुरवो बुंबुनाला उग्रा भोगा राजन्या इत्येवमादयः । कुलार्याः कुलकराश्चक्रवर्तिनो बलदेवा वासुदेवा ये चान्ये आतृतीयादापञ्चमादासप्तमाद्वा कुलकरेभ्यो वा विशुद्धान्वयप्रकृतयः । कर्मार्या यजनयाजनाध्ययनाध्यापनप्रयोगकृषिलिपिवाणिज्ययोनिपोषणवृत्तयः । शिल्पार्यास्तन्तुवायकुलालनापिततुन्नवायदेवटादयोऽल्पसावद्या

---

1 म्लेच्छाश्चेत्यपि पाठः ।

आगर्हिता जीवाः । भाषार्या नाम ये शिष्टभाषानियतवर्णं लोकरूढस्पष्टशब्दं पञ्चविधानामप्यार्याणां संव्यवहारं भाषन्ते ॥

विशेषव्याख्या—मनुष्य दो प्रकारके है, आर्य और म्लिश । उनमेंसे आर्य छह प्रकारके है, क्षेत्रार्य, जात्यार्य, कुलार्य, कर्मार्य, शिल्पार्य, तथा भाषार्य । इनमेंसे **क्षेत्रार्य** वे हैं, जो पन्द्रह प्रकारकी कर्म भूमियोंमें उत्पन्न है, जैसे भारतवर्षके साढ़े छब्बीस जनपदोंमें तथा शेष चक्रवर्तीविजयोंमें उत्पन्न हुए मनुष्य । अर्थात् आर्यक्षेत्रोंमें उत्पन्न होनेसे उनकी आर्य संज्ञा हुई है । और **जात्यार्य** अर्थात् जातिसे आर्य; जैसे इक्ष्वाकु, विदेह, हरि, अम्बष्ट, ज्ञात, कुरु, वुंवुनाल, उग्र, भोग, तथा राजन्य इत्यादि । कुलसे आर्य; जैसे कुलकर, चक्रवर्ती, बलदेव और वासुदेव, अथवा और जो कुलकरोंके तीसरेसे आरंभ करके पंचमसे आदिलेके अथवा सप्तमकुलसे जो उत्पन्न हुए है, जिनका विशुद्धकुल और प्रकृति है, वे सब **कुलार्य** है । तथा **कर्मार्य** अर्थात् कर्मसे आर्य, जैसे, यजन (यज्ञकरना) याजन (यज्ञकराना), अध्ययन, अध्यापन आदि प्रयोग करनेवाले तथा कृषि (खेती), लिपि (लेखन), वाणिज्य (व्यापार), आदि योनि पोषणकी वृत्ति करनेवाले सब **कर्म्मार्य** हैं । और तन्तुवाय (कपड़े बुननेवाले), कुलाल (कुंभार), नापित (नाई), तुन्नवाय (सूत कातनेवाले), और देवट आदि जो अल्पपापयुक्त अथवा अनिन्दित जीविका करनेवाले है, वे **शिल्पार्य** है । और **भाषार्य** वे है, जो शिष्टभाषाके नियत वर्णोंसे बने हुए और लोकमें प्रसिद्ध स्पष्ट शब्दोंको जिनको कि पूर्वोक्त पांच प्रकारके आर्य व्यवहारमे लाते है, भाषण करते है ।

अतो विपरीता म्लिश । तद्यथा । हिमवतश्चतसृषु विदिक्षु त्रीणि योजनशतानि लवणसमुद्रमवगाह्य चतसृणां मनुष्यविजातीना चत्वारोऽन्तरद्वीपा भवन्ति त्रियोजनशतविष्कम्भायामाः । तद्यथा । एकोरुकाणामाभाषकाणां लाङ्गूलिकानां वैषाणिकानामिति ॥ चत्वारि योजनशतान्यवगाह्य चतुर्योजनशतायामविष्कम्भा एवान्तरद्वीपाः । तद्यथा । हयकर्णानां गजकर्णानां गोकर्णानां शष्कुलिकर्णानामिति ॥ पञ्चशतान्यवगाह्य पञ्चयोजनशतायामविष्कम्भा एवान्तरद्वीपाः । तद्यथा । गजमुखानां व्याघ्रमुखानामादर्शमुखानां गोमुखानामिति ॥ षड्योजनशतान्यवगाह्य तावदायामविष्कम्भा एवान्तरद्वीपा. । तद्यथा । अश्वमुखानां हस्तिमुखानां सिहमुखानां व्याघ्रमुखानामिति ॥ सप्त योजनशतान्यवगाह्य तावदायामविष्कम्भा एवान्तरद्वीपाः । तद्यथा । अश्वकर्णसिंहकर्णहस्तिकर्णकर्णप्रावरणनामानः ॥ अष्टौ योजनशतान्यवगाह्याष्टयोजनशतायामविष्कम्भा एवान्तरद्वीपाः । तद्यथा । उल्कामुखविद्युज्जिह्वमेषमुखविद्युद्दन्तनामान. ॥ नवयोजनशतायामविष्कम्भा एवान्तरद्वीपा भवन्ति । तद्यथा । घनदन्तगूढदन्तविशिष्टदन्तशुद्धदन्तनामान· ॥ एकोरुकाणामेकोरुकद्वीपः । एवं शेषाणामपि स्वनामभिस्तुल्यनामानो वेदितव्याः ॥ शिखरिणोऽप्येवमेवेत्येवं षट्पञ्चाशदिति ॥

और इनके विरुद्ध म्लिश अर्थात् म्लेच्छ है । जैसे, हिमवानपर्वतकी चारों विदिशाओंमें तीनसौ योजन लवणसमुद्रमें प्रवेश करके, चार मनुष्योंकी विजातियों (निंद्य

जातियों)के निवासार्थ तीनसौ योजन लम्बे चौड़े चार ही अन्तरद्वीप है। जैसे, एकोरुक अर्थात् एकजंघावालोंका, अभापकोंका, लाङ्गूलिकों अर्थात् पुच्छवालोंका, तथा वैषाणिकों अर्थात् सींगवालोंका अन्तरद्वीप। और चारसौ योजन प्रवेशकरके चारसौ योजन ही आयाम तथा विष्कंभसहित चार अन्तरद्वीप है। जैसे, हयकर्ण, गजकर्ण, गोकर्ण, शष्कुलिकर्णवालोंके। तथा पांचसौ योजन प्रवेश करके पांचसौ ही योजन आयाम तथा विष्कंभसहित अन्तरद्वीप है। जैसे, गजमुख, व्याघ्रमुख, आदर्शमुख तथा गोमुखवालोंके। और छहसौ योजन प्रवेश करके छहसौ योजन ही आयाम तथा विष्कंभ प्रमाणवाले अन्तरद्वीप है। जैसे, अश्वमुख, हस्तिमुख, सिहमुख तथा व्याघ्रमुखवालोंके। और ऐसे ही सातसौ योजन प्रवेश करके सात ही सौ योजन आयाम विष्कंभ प्रमाण अन्तरद्वीप है, जैसे, अश्वकर्ण, सिहकर्ण, हस्तिकर्ण, और कर्णप्रावरणोंके। और ऐसे ही आठसौ योजन प्रवेश करके आठसौ योजन आयाम तथा विष्कंभप्रमाणसहित ही अन्तरद्वीप है। जैसे, उल्कामुख, विद्युज्जिव्ह, मेघमुख, और विद्युद्दन्तोंके। तथा नव सौ योजन प्रवेश करके नव सौ योजन विस्तार विष्कंभसहित अन्तर द्वीप है। जैसे; घनदन्त, गूढ़दन्त, विशिष्टदन्त, तथा शुद्धदन्तोंके। अब यहां यह जानना आवश्यक है कि, एकोरुक संज्ञक म्लेच्छोंका **एकोरुक** नाम अन्तरद्वीप है, आभाषकोंका **आभाषक;** इसी प्रकार शेष अन्य म्लेच्छोंके उसी २ नामके अर्थात् जो उनके नाम है, उसी नामके अन्तरद्वीप जानने चाहिये। इसी प्रकार छप्पन अन्तरद्वीप शिखरीपर्वत सम्बन्धी भी जानने चाहिये[1] ॥ १५ ॥

भरतैरावतविदेहाः कर्मभूमयोऽन्यत्र देवकुरूत्तरकुरुभ्यः ॥ १६ ॥

सूत्रार्थः—मनुष्यक्षेत्रोंमे भरत, ऐरावत तथा विदेह ये कर्म भूमियां हैं, देवकुरु तथा उत्तरकुरुको छोड़ करके।

भाष्यम्—मनुष्यक्षेत्रे भरतैरावतविदेहाः पञ्चदश कर्मभूमयो भवन्ति। अन्यत्र देवकुरूत्तरकुरुभ्यः। संसारदुर्गान्तगमकस्य सम्यग्दर्शनज्ञानचारित्रात्मकस्य मोक्षमार्गस्य ज्ञातारः कर्त्तार उपदेष्टारश्च भगवन्तः परमर्षयस्तीर्थकरा अत्रोत्पद्यन्ते। अत्रैव जाता सिद्ध्यन्ति नान्यत्र। अतो निर्वाणाय कर्मणः सिद्धिभूमय. कर्मभूमय इति। शेषासु विशतिर्वशाः सान्तरद्वीपा अकर्मभूमयो भवन्ति। देवकुरूत्तरकुरवस्तु कर्मभूम्यभ्यन्तरा अप्यकर्मभूमय इति ॥

विशेषव्याख्या—मानुषोत्तर पर्वतके पूर्व जो मनुष्यक्षेत्र वर्णन किया है, उसमे भरत, ऐरावत तथा विदेहमे पंचदश कर्मभूमि है, किन्तु इनके अभ्यन्तर जो देवकुरु तथा उत्त-

---

१ यह अन्तर द्वीपका भाष्य प्राय नष्ट होगया है, कई दुर्विदग्ध छयानवे अन्तर द्वीप भाष्यमे लिखते है, परन्तु यह अनार्ष है, क्योकि आर्ष जीवागमादि ५६ ही मिलता है। वाचक परपरासे यह भेद नहीं है, क्योंकि सूत्रका उल्लघन नहीं होता। इस लिये इष्ट सिद्धात भाष्यको नष्ट किया है।

रकुरु भोगभूमियां हैं, उन्हें छोड करके। अर्थात् ये दोनों कर्मभूमि नही हैं। संसाररूपी अति भयंकर दुर्गके अन्तको प्राप्त करनेवाला सम्यग्दर्शन, सम्यग्ज्ञान तथा सम्यक् चारित्र स्वरूप जो मोक्षमार्ग है, उसके जाननेवाले, करनेवाले तथा उपदेशदाता भगवान् परमर्षि तीर्थंकर इन्हीं कर्मभूमियोंमें उत्पन्न होते है। और इन्ही कर्मभूमियोंमें उत्पन्न हुए जीव सिद्धि अर्थात् मोक्षसिद्धिको प्राप्त होते है, दूसरी भूमियोंसे नही। अतएव कर्मभूमि, निर्वाणकेलिये जो कर्म है, उनकी सिद्धिकी भूमि है। और इनसे शेष जो अन्तरद्वीप सहित बीस वंश अर्थात् क्षेत्र हैं, वे अकर्मभूमि है। और देवकुरु तथा उत्तरकुरु कर्मभूमियोंके अभ्यन्तर प्रविष्ट होने पर भी अकर्मभूमि है ॥ १६ ॥

नृस्थिती परापरे त्रिपल्योपमान्तर्मुहूर्ते ॥ १७ ॥

भाष्यम्—नरो नरा मनुष्या मानुषा इत्यनर्थान्तरम्। मनुष्याणां परा स्थितिस्त्रीणिपल्योपमान्यपरान्तर्मुहूर्तेति ॥

सूत्रार्थः—नृ, नर, तथा मनुष्य, मानुप इन शब्दोका एक ही अर्थ है। मनुष्योंकी परा अर्थात् उत्कृष्टस्थिति तीनपल्यकी है, और अपरा अर्थात् जघन्यस्थिति अन्तमुहूर्त पर्यन्त है ॥ १७ ॥

[1]तिर्यग्योनीनां च ॥ १८ ॥

सूत्रार्थः—जो तिर्यग्योनिसे उत्पन्न होते है, उनकी भी उत्कृष्टस्थिति तीनपल्य और जघन्य अन्तर्मुहूर्त है।

भाष्यम्—तिर्यग्योनिजानां च परापरे स्थिती त्रिपल्योपमान्तर्मुहूर्ते भवतो यथासङ्ख्यमेव। पृथक्करण यथासङ्ख्यदोषविनिवृत्त्यर्थम्। इतरथा इदमेकमेव सूत्रमभविष्यदुभयत्र चोभे यथासङ्ख्यं स्यातामिति ॥

विशेषव्याख्या—तिर्यग्योनिसे उत्पन्न होनेवाले जीवोंकी भी परास्थिति तीन पल्योपम है, और अपरास्थिति अन्तर्मुहूर्त पर्यन्त है। परा तथा अपराका, और त्रिपल्योपम तथा अन्तर्मुहूर्तका यथासांख्य है। अर्थात् परास्थिति त्रिपल्योपम है, और अपरा अन्तर्मुहूर्त है। और "नृस्थिती,, इत्यादिसूत्र तथा "तिर्यग्योनिजानां च' इस सूत्रको यथासख्य दोषकी निवृतिकेलिये पृथक् २ किया है। अन्यथा एक सूत्र होता, और मनुष्योंकी परास्थिति त्रिपल्योपम होती है, और तिर्यग्योनिजोंकी अपरा अन्तर्मुहूर्त कालतककी स्थिति है, ऐसा यथासंख्य बोध हो जाता।

द्विविधा चैषां मनुष्यतिर्यग्योनिजानां स्थिति.। भवस्थिति· कायस्थितिश्च। मनुष्याणां यथोक्ते त्रिपल्योपमान्तर्मुहूर्ते परापरे भवस्थिती। कायस्थितिस्तु परा सप्ताष्टौ वा भवग्रहणानि ॥ तिर्यग्योनिजानां च यथोक्ते समासत· परापरे भवस्थिती। व्यासतस्तु शुद्धपृथि-

१ तिर्यग्योनिजानां चेत्यपि पाठ.।

वीकायस्य परा द्वादशवर्षसहस्राणि । खरपृथिवीकायस्य द्वाविंशतिः । अप्कायस्य सप्त । वायुकायस्य त्रीणि । तेज.कायस्य त्रीणि रात्रिदिनानि । वनस्पतिकायस्य दशवर्षसहस्राणि । एषां कायस्थितिरसङ्ख्येया अवसर्पिण्युत्सर्पिण्यो वनस्पतिकायस्यानन्ताः । द्वीन्द्रियाणां भवस्थितिर्द्वादशवर्षाणि । त्रीन्द्रियाणामेकोनपञ्चाशद्रात्रिंदिनानि । चतुरिन्द्रियाणां षण्मासाः । एषां कायस्थितिः सङ्ख्येयानि वर्षसहस्राणि । पञ्चेन्द्रियतिर्यग्योनिजाः पञ्चविधाः । तद्यथा । मत्स्या उरगाः परिसर्पाः पक्षिणश्चतुष्पदा इति । तत्र मत्स्यानामुरगाणां भुजगानां च पूर्वकोट्येव पक्षिणां पल्योपमासङ्ख्येयभागश्चतुष्पदानां त्रीणि पल्योपमानि गर्भजानां स्थितिः । तत्र मत्स्यानां भवस्थितिः पूर्वकोटिस्त्रिपञ्चाशदुरगाणां द्विचत्वारिंशद्भुजगानां द्विसप्ततिः पक्षिणां स्थलचराणां चतुरशीतिर्वर्षसहस्राणि सम्मूर्छिनानां भवस्थितिः । एषां कायस्थितिः सप्ताष्टौ भवग्रहणानि । सर्वेषां मनुष्यतिर्यग्योनिजानां कायस्थितिरप्यपरान्तर्मुहूर्तैवेति ॥

इति तत्त्वार्थाधिगमे लोकप्रज्ञप्तिर्नामा तृतीयोध्यायः समाप्त ॥

और मनुष्य तथा तिर्यग्योनिवालोंकी स्थितिके पुनः दो भेद होते है, एक भवस्थिति दूसरी कायस्थिति । सो मनुष्योकी परा तथा अपरा भवस्थिति पूर्वोक्त रीतिसे ही होती है । जैसे परा भवस्थिति त्रिपल्योपम होती है, अपरा भवस्थिति अन्तर्मुहूर्तकाल पर्यन्त होती है । और कायस्थिति जो परा है, वह सात व आठ भवग्रहण पर्यन्त रहती है । और तिर्यग्योनिजोकी समास व समष्टिरूपसे परापर भवस्थिति पूर्वोक्त रूपसे है । और पृथक् २ रूपसे तो शुद्ध पृथिवीकायकी परास्थिति बारहहजार वर्ष पर्यन्त है, और खर पृथिवीकायकी परास्थिति बावीसहजार वर्ष पर्यन्त है । तथा अप्कायकी सात, वायुकायकी तीन तथा तैजसकायकी तीन रात दिनकी स्थिति है । और वनस्पतिकायकी दशहजार वर्ष है । तथा इनकी कायस्थिति भी असखेय है । और वनस्पतिकायकी अनन्त अवसर्पिणी और उत्सर्पिणी है । दो इन्द्रियवालोंकी भवस्थिति बारहवर्ष पर्यन्त है । तीन इन्द्रियवालोंकी एक कम पचास अर्थात् उनचास रातदिन है । चार इन्द्रियवालोंकी छह महिना है, और इनकी कायस्थिति सख्येय सहस्रवर्ष पर्यन्त है । पांच इन्द्रियवाले तिर्यग्योनिजोके पांच भेद है, यथा, मत्स्य, उरग, परिसर्प (चारों ओर फिसलके चलनेवाले), पक्षी और चतुष्पद (चौपाये) । इनमेसे मत्स्य, उरग और भुजगोंकी एकपूर्वकोटि ही स्थिति है । पक्षियोंकी पल्योपम असख्येयभाग, और गर्भज चतुष्पदोंकी तीन पल्योपम स्थिति है । उनमे मत्स्योंकी भवस्थिति पूर्वकोटि है, उरगोंकी तिरपन, भुजगोंकी व्यालीस, पक्षियोंकी बहत्तर है । और स्थलचारी समूर्छनजन्मवालोंकी चौरासी सहस्र वर्ष भवस्थिति है । और इन सबकी कायस्थिति सात वा आठ भवग्रहण पर्यन्त है । और सम्पूर्ण मनुष्य तथा तिर्यग्योनिजोंकी अपरा कायस्थिति अन्तर्मुहूर्त ही है ।

इति द्विवेदुपनामकाचार्य्यपदवीधारिठाकुरप्रसादशर्मविरचितभाषाटीकासमलङ्कृते तत्त्वार्थाधिगमसूत्रभाष्ये तृतीयोऽध्यायः ॥ ३ ॥

अथ चतुर्थोऽध्यायः ।

अत्राह । उक्तं भवता भवप्रत्ययोऽवधिर्नारकदेवानामिति । तथौदयिकेषु भावेषु देवगतिरिति । केवलिश्रुतसङ्घधर्मदेवावर्णवादो दर्शनमोहस्य । सरागसंयमादयो देवस्य । नारकसम्मूर्छिनो नपुंसकानि । न देवा. । तत्र के देवाः । कतिविधा वेति । अत्रोच्यते—

अब यहांपर कहते है कि "भवप्रत्यय अर्थात् भव वा जन्मनिमित्तक अवधिज्ञान देव तथा नारक जीवोंको होता है" (अ० १ सू० २२)। "औदयिक भावोंमे देवगति है अर्थात् इक्कीस प्रकारके औदयिक भावोंमे देवगति भी एक है" (अ०२ सू० ६)। "केवली भगवान्, शास्त्र, चार प्रकारके संघ, धर्म और भवनवासी आदि देवोंका अवर्णवाद दर्शनमोहके आस्रवका हेतु है" (अ० ६ सू० १४) । "सराग संयमादि देवायुके कारण है" (अ० ६ सू० २०)। "नारकजीव तथा सम्मूर्च्छन जन्मवाले नपुंसक होते है । देव नही होते" (अ० २ सू० ५०–५१) । इत्यादि स्थलोमे आपने देव शब्दका प्रयोग किया । अब प्रश्न यह है कि, देव कौन है? और उनके भेद कितने है? उत्तरमे यहां सूत्र कहते हैं:,–

देवाश्चतुर्निकायाः ॥ १ ॥

सूत्रार्थः—देव चार निकायोंसे संयुक्त है ।

भाष्यम्—देवाश्चतुर्निकाया भवन्ति । तान्परस्माद्वक्ष्यामः ॥

विशेषव्याख्या— देवोंके चार निकाय है, उन चारोंको हम आगे कहेंगे । यहां पर निकाय शब्दका अर्थ समानधर्मवाले प्राणियोंका समूह वा संघ है ।

तृतीयः पीतलेश्यः ॥ २ ॥

सूत्रार्थः—तृतीय निकाय पीतलेश्यावाला है ।

भाष्यम्—तेषां चतुर्णां देवनिकायानां तृतीयो देवनिकायः पीतलेश्य एव भवति । कश्चासौ । ज्योतिष्क इति ॥

विशेषव्याख्या—देवोंके जो चार निकाय अर्थात् समुदाय है, उनमेंसे जो तीसरा समुदाय है, उसके पीतलेश्या ही है । वह तीसरा निकाय ज्योतिष्कदेवोंका है, अर्थात् तीसरे निकायवाले जो ज्योतिष्कदेव है, वे पीतलेश्यावाले होते है ।

दशाष्टपञ्चद्वादशविकल्पाः कल्पोपपन्नपर्यन्ताः ॥ ३ ॥

सूत्रार्थः—वे देवनिकाय कल्पोपपन्नपर्यन्त क्रमसे दश, आठ, पांच और बारह भेद युक्त है ।

भाष्यम्—ते च देवनिकाया यथासङ्ख्यमेवं विकल्पा भवन्ति । तद्यथा । दशविकल्पा भवनवासिनोऽसुरादयो वक्ष्यन्ते । अष्टविकल्पा व्यन्तराः किन्नरादयः । पञ्चविकल्पा ज्योतिष्काः सूर्यादयः । द्वादशविकल्पा वैमानिकाः कल्पोपपन्नपर्यन्ताः सौधर्मादिष्विति ॥

विशेषव्याख्या—पूर्वमें जो चार निकाय देवोंके कहे है, वे यथासंख्य नियमसे इस प्रकार विकल्प अर्थात् भेदयुक्त है। यथा, प्रथम भवनवासीदेवोंके दश भेद है; वे दश-भेद असुरादिक आगे कहे जावेंगे। द्वितीय व्यन्तरदेवोंके किन्नरादि आठ भेद है। तृतीय ज्योतिष्कदेवोंके सूर्यादि पाच भेद है। और चतुर्थ वैमानिकदेवोंके सौधर्मादि बारह भेद है। इस प्रकार कल्पोपपन्न अर्थात् स्वर्गवासी देवों पर्यन्त ही भेद है।

इन्द्रसामानिकत्रायस्त्रिंशपारिषद्यात्मरक्षलोकपालानीकप्रकीर्ण-काभियोग्यकिल्बिषिकाश्चैकशः ॥ ४ ॥

सूत्रार्थः—पूर्वोक्त निकायोमे प्रत्येकके इन्द्र सामानिकादि दश २ भेद है।

भाष्यम्—एकैकशश्चैतेषु देवनिकायेषु देवा दशविधा भवन्ति। तद्यथा। इन्द्राः सामानिका त्रायस्त्रिंशा' पारिषद्याः आत्मरक्षाः लोकपालाः अनीकानि अनीकाधिपतयः प्रकीर्णका' आभियोग्या' किल्बिषिकाश्चेति। तत्रेन्द्रा. भवनवासिव्यन्तरज्योतिष्कविमानाधिपतय। इन्द्रसमाना' सामानिका अमात्यपितृगुरूपाध्यायमहत्तरवत् केवलमिन्द्रत्वहीनाः। त्रायस्त्रिंशा मन्त्रिपुरोहितस्थानीया। पारिषद्या वयस्यस्थानीया'। आत्मरक्षा' शिरोरक्षस्थानीयाः। लोकपाला आरक्षिकार्थचरस्थानीया'। अनीकाधिपतयो दण्डनायकस्थानीयाः। अनीकान्यनीकस्थानीयान्येव। प्रकीर्णका' पौरजनपदस्थानीयाः। आभियोग्या दासस्थानीया'। किल्बिषिका अन्तस्थस्थानीया इति॥

विशेषव्याख्या—उन देव निकायोंमे एक २ मे दश २ भेद सहित देव होते है। यथा;–इन्द्र, सामानिक, त्रायस्त्रिंश, पारिषद्य, आत्मरक्ष, लोकपाल[1], अनीक[2] वा अनीकाधिपति, प्रकीर्णक, आभियोग्य और किल्बिषिक। ये इन दश भेदोंमें जो इन्द्र है, वे भवनवासी, व्यन्तर, ज्योतिष्क और विमान प्रत्येकके अधिपति है, अर्थात् प्रत्येक समुदायके अधिपति वा स्वामीको **इन्द्र** कहते है। **सामानिक** इन्द्रके समान होते है, अर्थात् जो अमात्य पिता, गुरु, उपाध्यायोंके सदृश महत्त्व वा महिमायुक्त होते है. केवल इन्द्रत्व उनमें नहीं होता, वे **सामानिक** है। मंत्री पुरोहितादिकोंके स्थानापन्न **त्रायस्त्रिंश** है। वयस्य अर्थात् मित्रोंके स्थानापन्न **पारिषद्य** है। शिरकी रक्षा करनेवालोंके स्थानापन्न **आत्मरक्ष** है। जैसे राजाओंके यहा आरक्षक अर्थचर कोतवालादि है, वैसे ही **लोकपाल** है।

---

१ जो निज विषयमे सधि तथा रक्षामे नियत है, चौरादिको जो पकडते है, जैसे राजाओके यहा कोतवालादिक होते है, उन्हींके स्थानापन्न लोकपाल है।

२ सूत्रमे केवल '**अनीक**' ही का ग्रहण किया है, और भाष्यमे '**अनीकानि**' लिखके '**अनीकाधिपतय.**' (अनीकके अधिपत) ऐसा भी लिखा है, परन्तु यहा '**अनीक**' तथा '**अनीकाधिपति**' इन दोनोसे एक ही तात्पर्य है। इसी विचारसे भाष्यकारने '**अनीकानि**' इसका विवरण (टीका) '**अनीकाधिपतयः**' यह किया है, न कि '**अनीक**' और '**अनीकाधिपत**' दो भेद कहे हे। और ऐसा न माननेसे दश भेद **जो कहे** है, उनका विरोध होगा, क्योंकि **अनीकाधिपति**को भिन्न माननेसे ११ भेद होते है।

अनीकाधिपति दण्डनायक अर्थात् माजिष्ट्रेटके स्थानापन्न है, और **अनीक** अर्थात् सेनाके स्थानापन्न **अनीक** है। **प्रकीर्णक** पुरवासी तथा जनपद (राज्यकी प्रजा) के स्थानापन्न है। **आभियोग्य** दासोंके स्थानापन्न है। और **किल्विषिक** अन्तस्थ अर्थात् शूद्र व नीच जातिके स्थानापन्न है।

त्रायस्त्रिंशलोकपालवर्ज्या व्यन्तरज्योतिष्काः ॥ ५ ॥

सूत्रार्थः—व्यन्तर और ज्योतिष्कदेव त्रायस्त्रिंश और लोकपाल वर्जित है।

भाष्यम्—व्यन्तरा ज्योतिष्काश्चाष्टविधा भवन्ति त्रायस्त्रिंशलोकपालवर्ज्या इति ॥

विशेषव्याख्या—चार निकायोंमेंसे व्यन्तर तथा ज्योतिष्क इन दो निकायोंमें त्रायस्त्रिंश और लोकपालवर्जित आठ ही भेद है। अर्थात् व्यन्तर ज्योतिष्कोंमें त्रायस्त्रिंश लोकपाल नही होते।

पूर्वयोर्द्वीन्द्राः ॥ ६ ॥

सूत्रार्थः—पूर्वके दो निकायोंमे दो २ इन्द्र है।

भाष्यम्—पूर्वयोर्देवनिकाययोर्भवनवासिव्यन्तरयोर्देवविकल्पानां द्वौ द्वाविन्द्रौ भवतः। तद्यथा। भवनवासिषु तावद्द्वौ असुरकुमाराणामिन्द्रौ भवतश्चमरो बलिश्च। नागकुमाराणां धरणो भूतानन्दश्च। विद्युत्कुमाराणां हरिर्हरिसहश्च। सुपर्णकुमाराणां वेणुदेवो वेणुदारी च। अग्निकुमाराणामग्निशिखोऽग्निमाणवश्च। वातकुमाराणां वेलम्ब प्रभञ्जनश्च। स्तनितकुमाराणां सुघोषो महाघोषश्च। उदधिकुमाराणां जलकान्तो जलप्रभश्च। द्वीपकुमाराणां पूर्णोऽवशिष्टश्च। दिक्कुमाराणाममितोऽमितवाहनश्चेति ॥ व्यन्तरेष्वपि द्वौ किन्नराणामिन्द्रौ किन्नरः किम्पुरुषश्च। किम्पुरुषाणा सत्पुरुषो महापुरुषश्च। महोरगाणामतिकायो महाकायश्च। गन्धर्वाणां गीतरतिर्गीतयशाश्च। यक्षाणां पूर्णभद्रो मणिभद्रश्च। राक्षसानां भीमो महाभीमश्च। भूतानां प्रतिरूपोऽतिरूपश्च। पिशाचानां कालो महाकालश्चेति ॥ ज्योतिष्काणां तु बहवः सूर्याश्चन्द्रमसश्च ॥ वैमानिकानामेकैक एव। तद्यथा। सौधर्मे शक्रः। ऐशाने ईशानः। सनत्कुमारे सनत्कुमार इति। एवं सर्वकल्पेषु स्वकल्पाह्वा. । परतस्त्विन्द्रादयो दश विशेषा न सन्ति। सर्वे एव स्वतन्त्रा इति ॥

विशेषव्याख्या—पूर्वकथित चार निकायोंमेसे पूर्वके जो दो निकाय भवनवासी और व्यन्तर है, उनमे दो २ इन्द्र है। यथा, भवनवासियोंमें असुरकुमारोंके दो इन्द्र है, एक **चमर** और दूसरा **बलि**। नागकुमारोंके **धरण** और **भूतानन्द**। विद्युतकुमारोंके **हरि** और **हरिसह**। सुपर्णकुमारोंके **वेणुदेव** और **वेणुदारी**। अग्निकुमारोंके **अग्निशिख** और **अग्निमाणव**। वातकुमारोंके **वेलम्ब** और **प्रभंजन**। स्तनितकुमारोंके **सुघोष** और **महाघोष**। उदधिकुमारोंके **जलकान्त** और **जलप्रभ**। द्वीपकुमारोंके **पूर्ण** तथा **अवशिष्ट**। दिक्कुमारोंके **अमित** और **वाहन**। और व्यन्तरोंमें भी किन्नरोंके दो इन्द्र है, एक **किन्नर** और दूसरा **किम्पुरुष**। किम्पुरुषोंके **सत्पुरुष** और **महापुरुष**। महोरगोंके

अतिकाय और **महाकाय** । गन्धर्वोंके **गीतिरति** और **गीतियश** । यक्षोंके **पूर्णभद्र** और **महाभद्र** और राक्षसोंके **भीम** और **महाभीम** । भूतोंके **प्रतिरूप** और **अतिरूप** । और पिशाचोंके **काल महाकाल** नामके दो इन्द्र है । इस प्रकार भवनवासी और व्यन्तरोंके भेदोमे प्रत्येकके दो २ इन्द्र बतलाये । शेष दो निकायोंमेसे ज्योतिष्कोंमे अनेक **सूर्य** तथा **चन्द्रमा** इन्द्र है । और वैमानिकोंमे एक एक ही इन्द्र है । यथा, सौधर्ममें **शक्र** इन्द्र है । ऐशानस्वर्गमें **ईशान** इन्द्र है । सनत्कुमारस्वर्गमें **सनत्कुमार** इन्द्र है । इसी प्रकार सर्व कल्पोमें उसी २ कल्पके स्वनामके इन्द्र है । परन्तु कल्पोंके आगे इन्द्रादि दश भेद नही है, वहा तो सब ही स्वतत्र है ।

पीतान्तलेश्याः ॥ ७ ॥

सूत्रार्थः—पूर्वके दो निकायोमे पीतान्त लेश्या होती है ।

भाष्यम्—पूर्वयोर्निकाययोर्देवानां पीतान्ताश्चतस्रो लेश्या भवन्ति ॥

विशेषव्याख्या—पूर्वके जो भवनवासी और व्यन्तर ये दो निकाय है, उन निकायके देवोंको आरंभसे लेकर पीतपर्यन्त चार लेश्या होती है । अर्थात् उनको कृष्णा, नीला, कापोता और पीता ये चार लेश्या होती है ॥ ७ ॥

कायप्रवीचारा आ ऐशानात् ॥ ८ ॥

सूत्रार्थः—ऐशान स्वर्गपर्यन्त देवोंके कायप्रवीचार है ।

भाष्यम्—भवनवास्यादयो देवा आ ऐशानात्कायप्रवीचारा भवन्ति । **कायेन प्रवीचार** एषामिति कायप्रवीचारा' । प्रवीचारो नाम मैथुनविषयोपसेवनम । ते हि संक्लिष्टकर्माणो मनुष्यवन्मैथुनसुखमनुप्रलीयमानास्तीव्रानुशयाः कायसंक्लेशजं सर्वाङ्गीणं स्पर्शसुखमवाप्य प्रीतिमुपलभन्त इति ॥

विशेषव्याख्या—भवनवासी देवोंसे आदि लेकर ऐशानस्वर्ग तकके देव कायप्रवीचार है । काय अर्थात शरीरसे जिनका प्रवीचार है, वे कायप्रवीचार । और मैथुन विषयका जो उपसेवन सो प्रवीचार, यह कायप्रवीचारका अर्थ है । साराश शरीरकेद्वारा मैथुनविषयका जो उपभोग, संभोग अथवा उपसेवन करते है, वे कायप्रवीचार है । ये अर्थात् भवनवासीयोंसे लेकर ऐशानकल्प तकके देव निश्चयकरके संक्लिष्टकर्मवाले है; अतएव मनुष्योंके समान मैथुनके सुखको अनुभवन करते हुए तीव्रकामनासे युक्त होकर कायसम्बन्धी क्लेशजन्य सम्पूर्ण अंगोका जो स्पर्श है, उस स्पर्शजनितसुखको प्राप्त होकर प्रीतिको प्राप्त होते है ।

शेषाः स्पर्शरूपशब्दमनःप्रवीचारा द्वयोर्द्वयोः ॥ ९ ॥

सूत्रार्थः—शेष आठ कल्पोंके देवोंमेसे दो २ कल्पोंके देव यथासंख्य करके क्रमसे स्पर्श, रूप, शब्द तथा मनसे प्रवीचार करनेवाले है ।

भाष्यम्—ऐशानादूर्ध्वं शेषाः कल्पोपपन्ना देवा द्वयोर्द्वयोः कल्पयोः स्पर्शरूपशब्दमनःप्रवीचारा भवन्ति यथासङ्ख्यम् । तद्यथा । सनत्कुमारमाहेन्द्रयोर्देवान्मैथुनसुखप्रेप्सूनुत्पन्नास्थान्विदित्वा देव्य उपतिष्ठन्ते । ताः स्पृष्ट्वैव च ते प्रीतिमुपलभन्ते विनिवृत्तास्थाश्च भवन्ति ॥ तथा ब्रह्मलोकलान्तकयोर्देवानेवंभूतोत्पन्नास्थान्विदित्वा देव्यो दिव्यानि स्वभावभास्वराणि सर्वाङ्गमनोहराणि शृङ्गारोदाराभिजाताकारविलासान्युज्ज्वलचारुवेषाभरणानि स्वानि रूपाणि दर्शयन्ति । तानि दृष्ट्वैव ते प्रीतिमुपलभन्ते निवृत्तास्थाश्च भवन्ति ॥ तथा महाशुक्रसहस्रारयोर्देवानुत्पन्नप्रवीचारास्थान्विदित्वा देव्यः श्रुतिविषयसुखानत्यन्तमनोहराञ् शृङ्गारोदाराभिजातविलासाभिलापच्छेदतलतालाभरणरवमिश्रान्हसितकथितगीतशब्दानुदीरयन्ति । तान्श्रुत्वैव ते प्रीतिमुपलभन्ते निवृत्तास्थाश्च भवन्ति ॥ आनतप्राणतारणाच्युतकल्पवासिनो देवाः प्रवीचारायोत्पन्नास्था देवीः सकल्पयन्ति संकल्पमात्रेणैव ते परां प्रीतिमुपलभन्ते विनिवृत्तास्थाश्च भवन्ति ॥ एभिश्च प्रवीचारैः परतः परतः प्रीतिप्रकर्षविशेषोऽनुपमगुणो भवति प्रवीचारिणामल्पसंक्लेशत्वात् । स्थितिप्रभावाभिरधिका इति वक्ष्यते ॥

विशेषव्याख्या—ऊपर कहे हुए ईशानस्वर्गसे ऊपर शेष जो कल्पोपपन्न देव हैं। ये दो २ कल्पोंके क्रमसे स्पर्श, रूप, शब्द तथा मनसे प्रवीचार अर्थात् मैथुन सेवन करनेवाले हैं। सो इस प्रकार कि, **सनत्कुमार** तथा **माहेन्द्र** कल्पोंके देवोंको मैथुन सुखके अभिलाषी तथा उत्पन्न आस्था (आशा वा कामना) सहित जानकर देवी अर्थात् देवाङ्गना उनके निकट आकर उपस्थित होती है । उन देवियोंको स्पर्श करनेसे ही वे देव प्रीतिको प्राप्त होते है और कामनानिवृत भी हो जाते है । ऐसे ही **ब्रह्मलोक** तथा **लोकान्तक**के देवोंको देवाङ्गनाये दिव्य, स्वभावसे ही प्रकाशशील, सर्वाङ्गमनोहर, शृंगारके उत्तम आकार विलासोंमे पूर्ण, तथा उज्ज्वल और रमणीय वेष (वस्त्रादि) और भूषणादि युक्त अपने रूपोंको दिखाती है । वे देव उनके अति मनोहर रूपको देखते ही प्रीतिको प्राप्त होते है, तथा कामनासे भी निवृत हो जाते है । इसी प्रकार **महाशुक्र** तथा **सहस्रार** स्वर्गके देवोंको उत्पन्न मैथुनकी कामनासहित जानकर देविया उनके निकट आकर उपस्थित होती है, और उनके सम्मुख श्रवण विषयको सुखदायक, अत्यन्त मनोहर शृगार, उदार (उत्कृष्ट) अभिजात विलास अभिलाप छेद तलतालयुक्त, आभूषणोके शब्द सहित, हसित कथित गीतके शब्दोंको उच्चारण करती है । उन्ही शब्दोंके श्रवणमात्रसे वे प्रीतिको प्राप्त होते है और कामनासे भी रहित हो जाते है । और **आनत, प्राणत** तथा **आरण, अच्युत** कल्पोंके जो देव है, उन्हें जिस समय मैथुन सेवनकी कामना होती है, उसी समय वे देवियोंका सकल्प करते है, और केवल अपने मनके सकल्पमात्रसे ही परमप्रीतिको प्राप्त होते है, और मैथुनकी कामनासे भी निवृत हो जाते है । इन शरीर, स्पर्श, रूप, शब्द तथा मनकेद्वारा मैथुनके उपसेवनोंसे आगे २ के देवोंके प्रीतिका प्रकर्ष विशेष अनुपम गुण है । क्योंकि आगे २ के मैथुनसेवि-

योंके अल्पसंक्लेश है । और स्थितिप्रभावादिसे भी अधिक अधिक हैं, ऐसा आगे कहेंगे (अ० ४ सू० २१) ।

परेऽप्रवीचाराः ॥ १० ॥

सूत्रार्थः—कल्पोपपन्नसे परे जो देव है, वे अप्रवीचार है ।

भाष्यम्—कल्पोपपन्नेभ्य परे देवा अप्रवीचारा भवन्ति । अल्पसंक्लेशत्वात् स्वस्थाः शीतीभूताः । पञ्चविधप्रवीचारोद्भवादपि प्रीतिविशेषादपरिमितगुणप्रीतिप्रकर्षा. परमसुखतृप्ता एव भवन्ति ॥

अत्राह । उक्तं भवता देवाश्चतुर्निकाया दशाष्टपञ्चद्वादशविकल्पा इत्युक्ते निकायाः के के चैषा विकल्पा इति । अत्रोच्यते । चत्वारो देवनिकायाः । तद्यथा । भवनवासिनो व्यन्तरा ज्योतिष्का वैमानिका इति ॥ तत्र—

विशेषव्याख्या—यहां पर्यन्त तो आरंभमे लेके कल्पोपपन्नपर्यन्त देवोंके प्रवीचारका वर्णन किया, अब इसके पश्चात् कल्पसे परे अर्थात् कल्पातीतकी व्यवस्था कहते है कि—कल्पोपपन्नोसे परे जो देव है वे अप्रवीचार होते है, अर्थात् उनके मैथुन सेवन नही होता । क्योंकि इन देवोके संक्लेश अथवा संक्लिष्टकर्म अल्प होते है, अतएव वे स्वस्थ, शान्त और सदा शीतलभूत रहते है । पाच प्रकारके प्रवीचारद्वारा अर्थात् काय, स्पर्श, रूप, शब्द तथा मनोजन्य मैथुन सेवनकेद्वारा उत्पन्न जो प्रीतिविशेष है, उसमे भी अपरिमितगुण अर्थात् पूर्वोक्त पंचविध मैथुनोसे जो आनन्द होता है, उससे अपरिमित–अनन्तगुण प्रीति वा आनन्दकी अधिकतायुक्त ये देवगण होते है, अतएव परमसुखतृप्त ही रहते है ॥ १० ॥

अब यहां कहते है कि, आपने देवोके चार निकाय कहे और क्रमसे प्रथम निकाय दश भेद, द्वितीय आठ भेद, तृतीय पांच भेद और चतुर्थ बारह भेदसहित है, यह भी कहा, तब चारों निकाय कौन २ है? तथा उनके दश, आठ, पाच तथा बारह विकल्प भी कौन २ है । इसका समाधान यहा कहते है । चार देव निकाय है । सो इस प्रकार कि, १ भवनवासी, २ व्यन्तर, ३ ज्योतिष्क और ४ वैमानिक । इनमे-

भवनवासिनोऽसुरनागविद्युत्सुपर्णाग्निवातस्तनितोदधिद्वीपदिक्कुमाराः ॥ ११ ॥

सूत्रार्थः—भवनवासियोके असुरकुमार, नागकुमार, विद्युतकुमारादि दश भेद हैं ।

भाष्यम्—प्रथमो देवनिकायो भवनवासिनः । इमानि चैषां विधानानि भवन्ति । तद्यथा असुरकुमारा नागकुमारा विद्युत्कुमारा सुपर्णकुमारा अग्निकुमारा वातकुमारा. स्तनितकुमारा उदधिकुमारा द्वीपकुमारा दिक्कुमारा इति । कुमारवदेते कान्तदर्शनाः सुकुमारा मृदुमधुरललितगतयः शृङ्गाराभिजातरूपविक्रिया. कुमारवच्चोद्धतरूपवेषभाषाभरणप्रहरणा-

वरणयानवाहनाः कुमारवच्चोल्बणरागाः क्रीडनपराश्चेत्यतः कुमारा इत्युच्यन्ते। असुरकुमारावासेष्वसुरकुमाराः प्रतिवसन्ति शेषास्तु भवनेषु। महामन्दरस्य दक्षिणोत्तरयोर्दिग्विभागयोर्बह्वीपु योजनशतसहस्रकोटीकोटीष्वावासा भवनानि च दक्षिणार्धाधिपतीनामुत्तरार्धाधिपतीनां च यथास्वं भवन्ति। तत्र भवनानि रत्नप्रभायां बाहल्यार्धमवगाह्य मध्ये भवन्ति। भवनेषु वसन्तीति भवनवासिनः॥

विशेषव्याख्या—चारों निकायोंमेंसे प्रथम निकाय भवनवासी हैं। उनके भेद ये है। यथा; असुरकुमार १, नागकुमार २, विद्युत्कुमार ३, सुपर्णकुमार ४, अग्निकुमार ५, वातकुमार ६, स्तनितकुमार ७, उदधिकुमार ८, द्वीपकुमार ९ और दिक्कुमार १०। ये सब कुमारोंके समान रमणीयदर्शन, सुकुमार, मृदु, मधुर तथा ललित गतिवाले, शृंगार सहित सुन्दर रूप विक्रियायुक्त होते है। और कुमारोके तुल्य उद्धत रूप, वेष, भाषा, आभरण, अस्त्रशस्त्रादि प्रहरण, वस्त्र तथा यान वाहनादि युक्त होते है। और कुमारोके ही समान इनका व्यक्त अर्थात् स्पष्टराग क्रीडामें तत्पर रहता है, अतएव इन्हें कुमार कहते है। इनमे असुरकुमार, असुरकुमारोके आवासमें रहते है, और शेष भवनोंमें निवास करते है। महामन्दरके दक्षिण और उत्तर दिग्विभागोंमें अनेक लाखयोजन कोटी कोटीयोंमें **असुरकुमारोंके** आवास है, और भवन भी दक्षिणार्धाधिपतियोंके और उत्तरार्धाधिपतियोके यथास्व है। वहां रत्नप्रभामें बहलभागके अर्ध मध्यमें प्रवेशकरके मध्यमें भवन है। भवनोंमें जो रहते है, उन्हें भवनवासी कहते है।

भवप्रत्ययाश्चैषामिमा नामकर्मनियमात्स्वजातिविशेषनियता विक्रिया भवन्ति। तद्यथा। गम्भीराः श्रीमन्तः काला महाकाया रत्नोत्कटमुकुटभास्वराश्चूडामणिचिह्ना असुरकुमारा भवन्ति। शिरोमुखेष्वधिकप्रतिरूपा कृष्णश्यामा मृदुललितगतयः शिरस्सु फणिचिह्ना नागकुमाराः। स्निग्धा भ्राजिष्णवोऽवदाता वज्रचिह्ना विद्युत्कुमाराः। अधिकरूपग्रीवोरस्काः श्यामावदाता गरुडचिह्नाः सुपर्णकुमाराः। मानोन्मानप्रमाणयुक्ता भास्वन्तोऽवदाता घटचिह्ना अग्निकुमारा भवन्ति। स्थिरपीनवृत्तगात्रा निमग्नोदरा अश्वचिह्ना अवदाता वातकुमाराः। स्निग्धाः स्निग्धगम्भीरानुनादमहास्वनाः कृष्णा वर्धमानचिह्नाः स्तनितकुमाराः। ऊरुकटिष्वधिकप्रतिरूपाः कृष्णश्यामा मकरचिह्नाः उदधिकुमाराः। उरःस्कन्धबाहुग्रहस्तेष्वधिकप्रतिरूपाः श्यामावदाताः सिंहचिह्ना द्वीपकुमाराः। जङ्घाग्रपादेष्वधिकप्रतिरूपाः श्यामा हस्तिचिह्ना दिक्कुमाराः। सर्वे विविधवस्त्राभरणप्रहरणावरणा भवन्तीति॥

भवप्रत्ययसे अर्थात् देवयोनिमें जन्म लेनेके कारणसे तथा नामकर्मके नियमसे निज जाति विशेषमें नियत ऐसी विक्रिया इन देवोके होती है। सो इस प्रकार कि,—गंभीर, श्रीमन्त अर्थात् शोभादि ऐश्वर्ययुक्त, काले, महाकाय, रत्नजटित मुकुटोंसे प्रकाशशील चूडामणिसे चिह्नित **असुरकुमार** होते है। शिर और मुखोमें प्रतिरूप कृष्ण, श्याम, मृदु तथा ललित गतिवाले शिरमें नागसे चिह्नित **नागकुमार** होते है। चिक्कण, प्रकाशशील,

भास्वर शुक्लवर्ण, तथा वज्रोंसे चिह्नित **विद्युत्कुमार** होते है। अतिसुन्दर ग्रीवा (गला) तथा वक्षस्थल (छाती) से भूषित, श्याम तथा शुद्ध वर्ण, तथा गरुडसे चिह्नित **सुपर्णकुमार** होते हैं। मान–ऊर्ध्वमान और प्रमाण–युक्त, प्रकाशशील, शुद्ध शुक्लवर्ण, और घटसे चिह्नित **अग्निकुमार** होते है। स्थिर–स्थूल तथा वर्तुलाकार शरीरधारी, निमग्न अर्थात् नमित उदरसहित, शुद्ध वर्ण, और अश्वसे चिह्नित **वातकुमार** होते है। चिक्कण, स्निग्ध, गम्भीर, प्रतिध्वनि और महानाद–संयुक्त, कृष्णवर्ण, और वर्धमानचिह्नयुक्त **स्तनितकुमार** होते है। जंघा तथा कटिप्रदेशमे अधिक सुन्दर, कृष्ण श्यामवर्ण, तथा मकरसे चिह्नित **उदधिकुमार** होते है। वक्षस्थल, कन्धा, बाहू, और अग्र हस्तोंके विषे अधिक सुन्दर, श्याम शुद्ध वर्ण, तथा सिंहसे चिह्नित **द्वीपकुमार** होते है। और जघा, और अग्रपादोंमे अधिक सौन्दर्य्य–सहित. श्यामवर्ण और हस्तियोंसे चिह्नित **दिक्कुमार** होते है। सब ए दशो कुमार अनेक प्रकारके वस्त्र, आभूषण तथा शस्त्र–अस्त्र–आदिसे सम्पन्न होते है॥

व्यन्तराः किन्नरकिम्पुरुषमहोरगगन्धर्वयक्षराक्षसभूतपिशाचाः॥१२॥

सूत्रार्थः—द्वितीय व्यन्तरनिकाय है और उसके किन्नर आदि आठ भेद है।

भाष्यम्—अष्टविधो द्वितीयो देवनिकायः। एतानि चास्य विधानानि भवन्ति। अधस्तिर्यगूर्ध्वं च त्रिष्वपि लोकेषु भवननगरेष्वावासेषु च प्रतिवसन्ति। यस्माच्चाधस्तिर्यगूर्ध्वं च त्रीनपि लोकान् स्पृशन्तः स्वातन्त्र्यात्पराभियोगाच्च प्रायेण प्रतिपतन्त्यनियतगतिप्रचारा मनुष्यानपि केचिद्भृत्यवदुपचरन्ति विविधेषु च शैलकन्दरान्तरवनविवरादिषु प्रतिवसन्त्यतो व्यन्तरा इत्युच्यन्ते।

विशेषव्याख्या—अब द्वितीय जो निकाय है वह व्यन्तर है। और उसके भेद आठ ये है। जैसे–किन्नर १ किम्पुरुष २ महोरग ३ गन्धर्व ४ यक्ष ५ राक्षस ६ भूत ७ और पिशाच ८। ये[1] अधोभागमे, तिर्य्यग्भागमे, तथा ऊर्ध्वभागमे, तीनो लोकोंमे, भवनोंमें, नगरोंमे, तथा आवासोंमे ये व्यन्तर देव निवास करते है। इस हेतुसे कि अधोभागमें, तिर्य्यग्भागमे, और ऊर्ध्वभागमें तीनो लोकोंको स्पर्श करते हुए स्वतंत्रतासे, और दूसरेके अभियोगसे प्रायः अनियत गतिके प्रचारसे चारो ओर गिरते घूमते रहते है, और कोई २ मनुष्योंकी भी भृत्यके समान सेवा करते है; तथा विविध (अनेक) प्रकारके पर्वत, कन्दरा, अन्तर्वन और विवर आदिमें निवास करते रहते है, इस हेतुसे ये व्यन्तर कहे जाते है॥

तत्र किन्नरा दशविधाः। तद्यथा—किन्नराः किम्पुरुषाः किपुरुषोत्तमाः किन्नरोत्तमा हृदयंगमा रूपशालिनोऽनिन्दिता मनोरमा रतिप्रिया रतिश्रेष्ठा इति॥ किम्पुरुषा दशविधाः।

१ रत्नप्रभा भूमिका सहस्र योजन अवगाढ जो प्रथमकाण्ड उसके नीचे ऊपर शत २ (सौ २) योजन छोडके मध्यमें असख्येय लक्ष भूमिनगर तथा आवास है। जो व्यन्तरोंके निवासस्थान है।

तद्यथा—पुरुषाः सत्पुरुषा महापुरुषाः पुरुषवृषभाः पुरुषोत्तमा अतिपुरुषा मरुदेवा मरुतो मेरुप्रभा यशस्वन्त इति ॥ महोरगा दशविधा । तद्यथा—भुजगा भोगशालिनो महाकाया अतिकायाः स्कन्धशालिनो मनोरमा महावेगा महेष्वक्षा मेरुकान्ता भास्वन्त इति ॥ गान्धर्वा द्वादशविधाः । तद्यथा—हाहा-हूहू-तुम्बुरवो नारदा ऋषिवादिका भूतवादिकाः कादम्बा महाकादम्बा रैवता विश्वावसवो गीतरतयो गीतयशस इति ॥ यक्षास्त्रयोदशविधाः । तद्यथा पूर्णभद्रा माणिभद्राः श्वेतभद्रा हरिभद्राः सुमनोभद्रा व्यतिपातिकभद्रा सुभद्रा सर्वतोभद्रा मनुष्ययक्षा वनाधिपतयो वनाहारा रूपयक्षा यक्षोत्तमा इति ॥ सप्तविधा राक्षसाः । तद्यथा–भीमा महाभीमा विघ्ना विनायका जलराक्षसा राक्षसराक्षसा ब्रह्मराक्षसा इति ॥ भूता नवविधा । तद्यथा—सुरूपा. प्रतिरूपा अतिरूपा भूतोत्तमा स्कन्दिका महास्कन्दिका महावेगाः प्रतिच्छन्ना आकाशगा इति ॥ पिशाचाः पञ्चदशविधाः । तद्यथा —कूष्माण्डाः पटका जोषा आह्नकाः काला महाकालाश्चौक्षा अचौक्षास्तालपिशाचा मुखरपिशाचा अधस्तारका देहा महाविदेहास्तूष्णीका वनपिशाचा इति ॥

सूत्रार्थ—विशेषव्याख्या—दर्शनमोह तथा अन्तराय नाम कर्मप्रकृतियोंके उदयमे यथासख्य (क्रम) से दर्शनपरीषह तथा अलाभपरीषह होते हैं । अर्थात् दर्शनमोह प्रकृतिके उदयमे तो अदर्शनपरीषह (दर्शनाभाव) होता है और लाभाऽन्तरायके उदयमें अलाभपरीषह होता है ॥ १४ ॥

चारित्रमोहे नाग्न्यारतिस्त्रीनिषद्याक्रोशयाचनासत्कारपुरस्काराः१५

भाष्यम्—चारित्रमोहोदये एते नाग्न्यादयः सप्त परीषहा भवन्ति ।

सूत्रार्थ—विशेषव्याख्या—चारित्रमोहनीय कर्मप्रकृतिके उदयमे नाग्न्य आदि सप्त (सात) परीषह होते है । अर्थात् चारित्रमोहनीय प्रकृति जब उदयको प्राप्त होती है तब नाग्न्यपरीषह, अरतिपरीषह, स्त्रीपरीषह, निषद्यापरीषह, आक्रोशपरीषह, याचनापरीषह, तथा सत्कारपुरस्कारपरीषह होते है ॥ १५ ॥

वेदनीये शेषाः ॥ १६ ॥

भाष्यम्—वेदनीयोदये शेषा एकादश परीषहा भवन्ति ये जिने संभवन्तीत्युक्तम् । कुतः शेषाः । एभ्यः प्रज्ञाज्ञानादर्शनालाभनाग्न्यारतिस्त्रीनिषद्याक्रोशयाचनासत्कारपुरस्कारेभ्य इति ।

सूत्रार्थ-विशेषव्याख्या—वेदनीय कर्मप्रकृतिके उदयमें शेष (बाकी) परीषह जो कि जिन भगवान्मे होते है वे होते है इनमें शेषत्व कहांसे है इसका अभिप्राय यह है कि ज्ञानावरण

प्रकृतिके उदयमें प्रज्ञा तथा अज्ञान, दर्शनमोहनीय तथा अन्तरायके उदयमें अदर्शन तथा अलाभ चार ये, और चारित्रमोहनीयके उदयमें नाग्न्य आदि सात=४+७=११। अर्थात् प्रज्ञा, अज्ञान, अदर्शन, अलाभ, नाग्न्य, अरति, स्त्री, निषद्या, आक्रोश, याचन, और सत्कार-पुरस्कार इन ग्यारहसे जो शेष ग्यारह रह गये वे वेदनीय कर्मप्रकृतिके उदयमे जो कि जिनमे कहे गये है, होते है ॥ १६ ॥

एकादयो भाज्या युगपदेकोनविंशतेः ॥ १७ ॥

भाष्यम्—एषां द्वाविंशतेः परीषहाणामेकादयो भजनीया युगपदेकस्मिन् जीवे आ एकोन-विंशतेः। अत्र शीतोष्णपरीषहौ युगपन्न भवतः। अत्यन्तविरोधित्वात्। तथा चर्याशय्यानि-षद्यापरीषहाणामेकस्य संभवे द्वयोरभावः।

सूत्रार्थ–विशेषव्याख्या—इन बाईस २२ परीषहोंके मध्यमे एकही कालमे एक पुरुषमे एक आदिका विभाग करना उचित है। अर्थात् एकही समय एक पुरुषमे एकसे लेकर उन्नीस १९ तक होसकते है। तात्पर्य्य यह कि किसीमे एक परीषह होता है किसीमे दो, किसीमे तीन, इस क्रमसे उन्नीसपर्य्यन्त होसकते है। परन्तु यहांपर यह भी जानना योग्य है कि एक कालमे एकही पुरुषमे शीतपरीषह तथा उष्ण परीषह ये दोनों नही होते, क्योंकि शीत तथा उष्णका परस्पर अत्यन्त विरोध है। ऐसे ही चर्य्या, शय्या, तथा निषद्या, इन तीन परीषहोंमेसे जब एककी सत्ताका सम्भव होता है तब शेष दोनोंका अभावही रहता है; क्योंकि चर्य्या (गति), शय्या (शयन) और निषद्या (स्थिति), इनमे भी विरोध होनेसे जब गमन होगा, तब शयन तथा स्थिति वा निषद्या (खडा होना) नही होसकता। इसीप्रकार जब शय्या होगी तब निषद्या तथा चर्य्या न होगी, तथा जब चर्य्या होगी तब निषद्या तथा शय्या न होगी ॥ १७ ॥

सामायिकच्छेदोपस्थाप्यपरिहारविशुद्धिसूक्ष्मसंपराययथाख्यातानि चारित्रम् ॥ १८ ॥

सामायिकसंयमः छेदोपस्थाप्यसंयमः परिहारविशुद्धिसंयमः सूक्ष्मसंपरायसंयमः यथा-ख्यातसंयम इति पञ्चविधं चारित्रम् तत्पुलाकादिषु विस्तरेण वक्ष्यामः।

सूत्रार्थ—सामायिकसंयम, छेदोपस्थाप्यसंयम, परिहारविशुद्धिसंयम, सूक्ष्मसंप-रायसंयम, और यथाख्यातसंयम, यह पाच प्रकारका चारित्र है। पुलाकादिप्रकरणमे इन चारित्रोंको विस्तारपूर्वक कहेंगे ॥ १८ ॥

अनशनावमौदर्यवृत्तिपरिसंख्यानरसपरित्यागविविक्तशय्यासनकायक्लेशा बाह्यं तपः ॥ १९ ॥

सूत्रार्थ—अनशनादि छे प्रकारका बाह्य तप है।

भाष्यम्—अनशनम् अवमौदर्यंवृत्तिपरिसङ्ख्यानं रसपरित्यागः विविक्तशय्यासनता काय-

क्लेश इत्येतत्षड्विधं बाह्यं तपः। सम्यग्योगनिग्रहो गुप्तिरित्यतः प्रभृति सम्यगित्यनुवर्तते । संयमरक्षणार्थं कर्मनिर्जरार्थं च चतुर्थषष्ठाष्टमादि सम्यगनशनं तप. ॥

विशेषव्याख्या—अनशन (भोजनाभाव अथवा उपवास), अवमौदर्य्य (न्यूनाहारता), वृत्तिपरिसंख्यान (जीविकाका नियम), रसपरित्याग (उत्तम स्वादिष्ट पदार्थोंका त्याग), विविक्तशय्यासनता (एकान्तमें शयन तथा आसन) और कायक्लेश (शरीरको क्लेश देना) यह छ. प्रकारका बाह्य तप है । **'सम्यग्योगनिग्रहो गुप्तिः'** (अध्या० ९ सू० ४) इस सूत्रसे यहांपर **"सम्यक्"** इस पदकी अनुवृत्ति होती है, अर्थात् सम्यक् पद इस सूत्रमे आता है । इससे यह अर्थ है कि जो संयमकी रक्षाके लिये तथा कर्मोंकी निर्जरा (हानि वा नाश)के लिये चतुर्थ, षष्ठ (छठे) वा अष्टम आदि समयोंमे उपवास करना है वह सम्यक् अनशन (उत्तम उपवास) रूप बाह्य तप है ।

अवमौदर्यम् अवममित्यूननाम । अवममुदरमस्य अवमोदरः अवमोदरस्य भावः अवमौदर्यम् । उत्कृष्टावकृष्टौ वर्जयित्वा मध्यमेन कवलेन त्रिविधमवमौदर्यं भवति । तद्यथा । अल्पाहारावमौदर्यमुपार्धावमौदर्यं प्रमाणप्राप्तात्किंचिदूनावमौदर्यमिति कवलपरिसङ्ख्यानं च प्राग्द्वात्रिंशद्भ्य. कवलेभ्य ॥

अवमौदर्य्य "अवम" यह न्यून (कम) वाची नाम है, अर्थात् अवम इसका अर्थ न्यून है, इस लिये अवम (न्यून) अर्थात् खाली है उदर पेट जिसका वह अवमोदर है और अवमोदरका जो भाव है वह अवमौदर्य्य है । अर्थात् उदरका भारीपन न होना । उत्कृष्ट तथा अवकृष्टको अर्थात् सर्वोत्कृष्टता तथा सर्व न्यूनताको त्यागकर मध्य कवल (मध्यम कवलाहार) से तीन प्रकारका अवमौदर्य्य होता है । जैसे–अल्पाहार अवमौदर्य्य (अल्प भोजनसे पेटका हलकापना), उपार्धावमौदर्य्य (अर्द्धभोजनसे अवमौदर्य्य), तथा प्रमाणसे जो प्राप्त है उससे अवमौदर्य्य (पेटकी न्यूनता) और इसमे कवलों (ग्रासों) की परिसंख्या (गणना) करनी होती है, जैसे बत्तीस कवलोंमे न्यून आहार करना ।

वृत्तिपरिसङ्ख्यानमनेकविधम् । तद्यथा । उत्क्षिप्तान्तप्रान्तचर्यादीना सक्तुकुल्माषौदनादीनां चान्यतममभिगृह्यावशेषस्य प्रत्याख्यानम् ॥

तृतीय वृत्तिपरिसङ्ख्यानरूप बाह्य तप अनेक प्रकारका है । जैसे उत्क्षिप्त, तथा प्रान्त, चर्य्या आदिमेसे, और सक्तु (सत्तू), कुल्माष, अर्द्धपरिपक्व गेहूँ चने आदि मिश्रित (मिलित अन्न) तथा ओदन (भात) इनमेसे किसी एकको ग्रहण करके दूसरोंका त्याग ।

रसपरित्यागोऽनेकविधः । तद्यथा । मद्यमांसमधुनवनीतादीनां रसविकृतीनां प्रत्याख्यानविरसरूक्षाद्यभिग्रहश्च ॥

ऐसेही रसपरित्याग चतुर्थ बाह्य तप भी अनेक प्रकारका है । जैसे–मद्य, मांस, मधु, तथा स्त्री आदि रसविकारोंका त्याग, और कुरस रूक्ष आदि पदार्थोंका ग्रहण करना । तथा पञ्चम बाह्य तप विविक्त शय्यासनता है, जिसका तात्पर्य्य यह है कि एकान्त सब-

प्रकारकी बाधाओंरहित, संसर्गशून्य तथा स्त्री, पशु और नपुंसक जीवोंसे वर्जित, जो शून्य गृह, देवालय, सभा तथा पर्वतकी गुहा (गुफा) हैं, इनमेसे किसी एकका समाधिके लिये आश्रय लेना, अर्थात् इन स्थानोंमेसे किसी एकमें निवास करके समाधिमे निमग्न रहना ॥

विविक्तशय्यासनता नाम एकान्तेऽनाबाधेऽसंसक्ते स्त्रीपशुषण्डकविवर्जिते शून्यागारदेवकुलसभापर्वतगुहादीनामन्यतमे समाध्यर्थं संलीनता ॥

कायक्लेशोऽनेकविधः । तद्यथा । स्थानवीरासनोत्कडुकासनैकपार्श्वदण्डायतशयनातापनाप्रावृतादीनि सम्यक्प्रयुक्तानि बाह्यं तपः । अस्मात्षड्विधादपि बाह्यात्तपसः सङ्गत्यागशरीरलाघवेन्द्रियविजयसंयमरक्षणकर्मनिर्जरा भवन्ति ॥

षष्ठ बाह्य तप कायक्लेश भी अनेक प्रकारका है । जैसे, स्थान (कायक्लेशदायक किसी प्रकारकी स्थिति), वीरासन (आसनविशेष), उत्कडु (ट्ठ) क आसन, पार्श्व तथा दण्डायत शयन, घर्म (घाम वा धूप) स्थानमे स्थिति, तथा आवरण (छप्पर) आदि वृष्टि आदिके निरोध करनेके पदार्थोंसे वर्जित स्थानमें निवास आदि, ये सब उत्तम रूपसे किये हुए बाह्य तप है । इस छ प्रकारके भी बाह्य तपमे सगका त्याग, शरीरकी लघुता, इन्द्रियोंका जीतना, संयमोंकी रक्षा और कर्मनिर्जरारूप फल होते है ॥ १९ ॥

प्रायश्चित्तविनयवैयावृत्त्यस्वाध्यायव्युत्सर्गध्यानान्युत्तरम् ॥ २० ॥

भाष्यम्—सूत्रक्रमप्रामाण्यादुत्तरमित्यभ्यन्तरमाह । प्रायश्चित्तं विनयो वैयावृत्त्यं स्वाध्यायो व्युत्सर्गो ध्यानमित्येतत्षड्विधमाभ्यन्तरं तपः ॥

सूत्रार्थ—विशेषव्याख्या—सूत्रके क्रमके प्रमाणसे उत्तरके जो तप है वे आभ्यन्तर है ऐसा कहते है । तात्पर्य्य यह है कि अनशन आदि जो छ. तप बाह्य कहे है उनके उत्तर (आगे) के प्रायश्चित्त आदि छ. तप आभ्यन्तर (भीतर) आत्मासे सम्बन्ध रखनेवाले, अथवा अनशन आदि षट् बाह्य (बहिरङ्ग) तप है, और उनके उत्तरके प्रायश्चित्त आदि छः आभ्यन्तर (अन्तरङ्ग) है । वे क्रमसे प्रायश्चित्त, विनय, वैयावृत्त्य, स्वाध्याय, व्युत्सर्ग, तथा ध्यान ये ६ आभ्यन्तर तप हैं ॥ २० ॥

नवचतुर्दशपंचद्विभेदं यथाक्रमं प्राग्ध्यानात् ॥ २१ ॥

भाष्यम्—तदाभ्यन्तरं तपः नवचतुर्दशपञ्चद्विभेदं भवति यथाक्रमं प्राग्ध्यानात् । इत उत्तरं यद्वक्ष्यामः । तद्यथा ।

सूत्रार्थ—विशेषव्याख्या—वह आभ्यन्तर तप ध्यानके पूर्व नव (नौ), चार, दश, पांच तथा द्वि (दो) भेद सहित यथाक्रमसे जानना चाहिये, अर्थात् प्रायश्चित्त ९ भेद सहित है, विनय ४ भेद, वैयावृत्त्य १० भेद, स्वाध्याय ५ भेद, तथा व्युत्सर्ग २ भेदसहित है । अब इसके अनन्तर उन भेदोंको कहैगे । जैसेः—

आलोचनप्रतिक्रमणतदुभयविवेकव्युत्सर्गतपश्छेदपरिहारोपस्थापनानि ॥ २२ ॥

भाष्यम्—प्रायश्चित्तं नवभेदम् । तद्यथा । आलोचनं प्रतिक्रमणं आलोचनप्रतिक्रमणे विवेकः व्युत्सर्गः तपः छेदः परिहारः उपस्थापनमिति ॥

सूत्रार्थ—विशेषव्याख्या—प्रायश्चित्त नामक आभ्यन्तर तप नौ ९ भेद सहित है। जैसे–आलोचन १ प्रतिक्रमण २ आलोचनप्रतिक्रमण ३ विवेक ४ व्युत्सर्ग ५ तप ६ छेद ७ परिहार ८ और उपस्थापन ९ ॥

आलोचनं प्रकटनं प्रकाशनमाख्यानं प्रादुष्करणमित्यनर्थान्तरम् । प्रतिक्रमणं मिथ्यादुष्कृतसंप्रयुक्तः प्रत्यवमर्शः प्रत्याख्यानं कायोत्सर्गकरणं च । एतदुभयमालोचनप्रतिक्रमणे । विवेको विवेचन विशोधनं प्रत्युपेक्षणमित्यनर्थान्तरम् । स एष संसक्तान्नपानोपकरणादिषु भवति । व्युत्सर्गः प्रतिष्ठापनमित्यनर्थान्तरम् । एषोऽप्यनेषणीयान्नपानोपकरणादिष्वशङ्कनीयविवेकेषु च भवति । तपो बाह्यमनशनादि प्रकीर्णं चानेकविधं चन्द्रप्रतिमादि । छेदोऽपवर्तनमपहार इत्यनर्थान्तरम् । स प्रव्रज्यादिवसपक्षमाससंवत्सराणामन्यतमानाम् भवति । परिहारो मासिकादिः । उपस्थापनं पुनर्दीक्षणं पुनश्चरण पुनर्व्रतारोपणमित्यनर्थान्तरम् । तदेतन्नवविधं प्रायश्चित्त देशं कालं शक्ति संहननं संयमविराधनां च कायेन्द्रियजातिगुणोत्कर्षकृतां च प्राप्य विशुद्ध्यर्थं यथार्हं दीयते चाचर्यते च । चिती संज्ञानविशुद्ध्योर्धातुः तस्य चित्तमिति भवति निष्ठान्तमौणादिक च ॥

एवमेभिरालोचनादिभिः कृच्छ्रैस्तपोविशेषैर्जनितातप्रमादः तं व्यतिक्रमं प्रायश्चेतयति चेतयंश्च न पुनराचरतीति । ततः प्रायश्चित्तम् । अपराधो वा प्रायस्तेन विशुध्यत इति । अतश्च प्रायश्चित्तमिति ॥

आलोचन, प्रकटन (लोगोंको अपना कृत्य प्रकट करदेना), प्रकाशन, आख्यान, तथा प्रादुष्करण, ये सब एकार्थवाचक अर्थात् पर्य्यायशब्द है १ । प्रतिक्रमण–मिथ्या पापके कारणसे आलोचना, अर्थात् मिथ्या दुष्कृतके कारणसे जो अवमर्श वा परामर्श वा आलोचना और उसका प्रत्याख्यान (त्याग) तथा शरीरत्याग है उसको प्रतिक्रमण कहते है २ और इन पूर्वोक्त दोनोंको मिलाके आलोचन प्रतिक्रमण कहते है ३ । और, विवेक विवेचन, विशोधन, तथा प्रत्युपेक्षण ये सब एकार्थवाचक शब्द हैं । अर्थात् किसी विषयके विवेचन अथवा विशेष शोधनको विवेक कहते है ४ । और यह विवेक वा विवेचन संसक्त अर्थात् मिलित वा किसीसे सम्बद्ध अन्न, पान तथा वस्त्र आदि सामग्रियोंके विषयमें होता है । तथा व्युत्सर्ग और प्रतिष्ठापन ये दोनों शब्द भी एक अर्थके वाचक है, अर्थात् प्रतिष्ठापनको व्युत्सर्ग कहते है ५ । यह भी अभिलाषा न करनेके योग्य अन्न (भोजन), पान तथा अन्य प्रकारकी सामग्रियोंके विषयमें तथा अशङ्कनीय (शङ्का न करने योग्य) वा अशक्य विवेकोंके विषयमें होता है । तथा अनशन आदि बाह्य और

प्रकीर्णक चन्द्र प्रतिमा आदि तप ६ रूप प्रायश्चित्त अनेक प्रकारका है। और छेद, अपवर्तन तथा अपहार इन शब्दोंके भी एकही अर्थ है। और यह छेद वा अपवर्तनरूप प्रायश्चित्त भी प्रवज्या (गमन), दिन, पक्ष, मास (महीना) तथा वर्ष इनमेसे किसीमे होता है ७। मासिकादि परिहार तथा त्याग है ८। उपस्थापन, पुनर्दीक्षण (फिरसे दीक्षा ग्रहण करनी), पुनश्चरण (पुनः करना) तथा पुनर्व्रतारोपण ये सब भी एकार्थबोधक शब्द है ९ यह सब नौ ९ प्रकारके प्रायश्चित्त देश, काल, शक्ति, संहनन (शरीरके रचना विशेषसे सामर्थ्य), व संयमकी विराधनाको तथा शरीर, इन्द्रिय, जाति, और गुणसे उत्पन्न उत्कर्षता (अधिकता वा उत्तमता) को पाकर शुद्धताके लिये यथायोग्य दिये जाते है और किये भी जाते है। "चिती" संज्ञाने यह सम्यग् ज्ञान व विशुद्धि अर्थमे धातु है, उस (चिती धातु)से निष्ठाक्त (त) प्रत्यय करनेसे अथवा उणादि 'त' प्रत्यय करनेसे "चित्त" यह शब्द सिद्ध होता है। तो इससे यह अभिप्राय सिद्ध होता है कि इन पूर्वोक्त आलोचन आदि ९ प्रकारके क्लेशरूप प्रायश्चित्त[1] नामक विशेष तपोसे जिसको अप्रमाद अर्थात् सावधानता प्राप्त हुई ऐसा पुरुष व्यतिक्रम (निषिद्धाचरण) को प्राय· जान जाय, और जानकर पुन· उनको जिसके द्वारा नही करता उसको प्रायश्चित्त कहते है। अथवा प्रायश्चित्त शब्दसे अपराधका ग्रहण है तो जिसके द्वारा अपराधोंसे शुद्ध हों इस कारणसे वह प्रायश्चित्त कहा जाता है ॥ २२ ॥

ज्ञानदर्शनचारित्रोपचाराः ॥ २३ ॥

विनयश्चतुर्भेदः। तद्यथा। ज्ञानविनयः दर्शनविनय. चारित्रविनयः उपचारविनयः। तत्र ज्ञानविनयः पञ्चविधः मतिज्ञानादि। दर्शनविनयः एकविध एव सम्यग्दर्शनविनय·। चारित्रविनयः पञ्चविधः सामायिकविनयादिः। औपचारिकविनयोऽनेकविधः सम्यग्दर्शनज्ञानचारित्राधिगुणाधिकेष्वभ्युत्थानासनप्रदानवन्दनानुगमादि. विनीयते तेन तस्मिन्वा विनय. ॥

सूत्रार्थ—विशेषव्याख्या—विनयरूप आभ्यन्तर तप चार प्रकारका है। जैसे—ज्ञानविनय, दर्शनविनय, चारित्रविनय और उपचारविनय। इनमेसे ज्ञानविनय पांच प्रकारका है। जैसे—मतिज्ञान विनय, श्रुतज्ञान विनय, अवधिज्ञान विनय, मन·पर्य्ययज्ञान विनय, तथा केवलज्ञान विनय। और दर्शनविनय एकही प्रकारका है; जैसे—सम्यग्दर्शन विनय। चारित्रविनय पांच प्रकारका है जैसे—सामायिक, सयमचारित्र विनय, छेदोपस्थाप्य संयमचारित्र विनय, परिहारविशुद्धि संयमचारित्र विनय, सूक्ष्मसंयम चारित्र विनय, तथा यथाख्यात सयम चारित्र विनय। और औपचारिक विनय अनेक प्रकारका है। जैसे—सम्यग्दर्शन, ज्ञान, तथा चारित्र आदि गुणोंमे जो अधिक महात्मा जन है उनके विषयमे अभ्युत्थान विनय (उनको देखके खड़े होजाना), आसनप्रदान विनय (उनको आसन देना), वन्दना

[1] प्रायश्चेतयति येन तत्प्रायश्चित्तम्।

विनय और अनुगमनादि विनय (उनके चलते समय कुछ दूरतक पीछे चलना इत्यादि) ॥ २३ ॥

आचार्योपाध्यायतपस्विशैक्षकग्लानगणकुलसङ्घसाधुसमनोज्ञाना-म् ॥ २४ ॥

भाष्यम्—वैयावृत्त्यं दशविधं । तद्यथा । आचार्यवैयावृत्त्यं उपाध्यायवैयावृत्त्यं तपस्विवैयावृत्त्यं शैक्षकवैयावृत्त्यं ग्लानवैयावृत्त्यं कुलवैयावृत्त्यं गणवैयावृत्त्यं सङ्घवैयावृत्त्यं साधुवैयावृत्त्यं समनोज्ञवैयावृत्त्यमिति । व्यावृत्तभावो वैयावृत्त्यं व्यावृत्तकर्म च । तत्राचार्यः पूर्वोक्तः पञ्चविधः । आचारगोचरविनयं स्वाध्यायं वाचार्यादनु तस्मादुपाधीयत इत्युपाध्यायः । सङ्ग्रहोपग्रहानुग्रहार्थं चोपाधीयते सङ्ग्रहादीन्। वास्योपाधीतइत्युपाध्यायः । द्विसङ्ग्रहो निर्ग्रन्थ आचार्योपाध्यायसङ्ग्रहः । त्रिसङ्ग्रहा निर्ग्रन्थी आचार्योपाध्यायप्रवर्तिनीसङ्ग्रहा । प्रवर्तिनी दिगाचार्येण व्याख्याता । हिताय प्रवर्तते प्रवर्तयति चेति प्रवर्तिनी । विकृष्टोग्रतपोयुक्तस्तपस्वी । अचिरप्रव्रजितः शिक्षयितव्यः शिक्षः शिक्षामर्हतीति शैक्षो वा । ग्लानः प्रतीतः । गणः स्थविरसन्ततिसंस्थितिः । कुलमाचार्यसंततिसंस्थितिः । सङ्घश्चतुर्विधः श्रमणादिः । साधवः संयताः । सभोगयुक्ताः समनोज्ञाः । एषामन्नपानवस्त्रपात्रप्रतिश्रयपीठफलकसंस्तारादिभिर्धर्मसाधनैरुपग्रहः शुश्रूषा भेषजक्रिया कान्तारविषमदुर्गोपसर्गेष्वभ्युपपत्तिरित्येतदादि वैयावृत्त्यम् ॥

सूत्रार्थ—वि०व्या०—वैयावृत्त्य नाम आभ्यन्तर तप दश प्रकारका है। जैसे आचार्य्यवैयावृत्त्य १ उपाध्यायवैयावृत्त्य २ तपस्विवैयावृत्त्य ३ शैक्षक वा शिक्षकवैयावृत्त्य ४ ग्लानवैयावृत्त्य ५ गणवैयावृत्त्य ६ कुलवैयावृत्त्य ७ सङ्घवैयावृत्त्य ८ साधुवैयावृत्त्य ९ और समनोज्ञवैयावृत्त्य १० । व्यावृत्त अर्थात् सेवा शुश्रूषामे तत्पर उसका जो भाव अथवा कर्म है उसको वैयावृत्त्य कहते है । उनमे आचार्य्य पांच प्रकारके होते है, यह प्रथम कहचुके है । इससे आचार्य्य आदिकी सेवा चाकरी यह आचार्य्यवैयावृत्त्यका तात्पर्य्य है । अतएव आचार्य्य-विषयक जो विनय है अथवा आचार्य्यसे विनयपूर्वक स्वाध्याय यह आचार्य्य—वैयावृत्त्य है । और जिसके समीप आके पढ़े वह उपाध्याय है । अथवा सग्रह आदि जिसके निकट आके पढ़े वह उपाध्याय है । सग्रह आदि ये है, जैसे द्विसंग्रह, निर्ग्रन्थ, आचार्य्योपाध्यायसंग्रह, तथा त्रिसंग्रह, निर्ग्रन्थी, आचार्य्योपाध्यायप्रवर्तिनी संग्रहा। यह प्रवर्तिनी आदिक आचार्य्यसे ही व्याख्यात है । हितके लिये जो स्वयं प्रवृत्त हो अथवा दूसरेको प्रवृत्त करै वह प्रवर्तिनी अर्थात् प्रवृत्त करानेवाली है। और अतिकठोर अथवा उत्तम तथा उग्र (तीव्र) तपकरके जो युक्त हो वह तपस्वी है, उस तपस्वीके लिये जो वैयावृत्त्य है, अर्थात् तपस्वियोंके अर्थ जो विनय सेवादि है वह तपस्विवैयावृत्त्य है । थोड़े कालसे जिसने संन्यास लिया है तथा जो शिक्षाके योग्य है वह शिक्ष है, अथवा जो शिक्षाके योग्य है वह शैक्ष है उसके

विषयमे जो वैयावृत्त्य है वह शैक्षवैयावृत्त्य है। ग्लानका अर्थ रोगी ही है, अर्थात् जो ग्लानि करनेयोग्य है उसके अर्थ वैयावृत्त्य। गणपदसे यहांपर स्थविरों (वृद्धों) की सन्ततिकी संस्थितिका ग्रहण है उसका वैयावृत्त्य। और कुलसे आचार्य्योंकी सन्ततिकी संस्थितिका ग्रहण है। उसका वैयावृत्त्य। सङ्घ श्रमण आदि चार प्रकारका है। उसका वैयावृत्त्य। साधु शब्द करके जो संयमसहित है उनका ग्रहण है, उन साधुओंका जो वैयावृत्त्य है वह साधुवैयावृत्त्य है। और सभोग करके जो युक्त है, वे समनोज्ञ है, उनका जो वैयावृत्त्य है वह समनोज्ञवैयावृत्त्य है। इन आचार्य्य उपाध्याय आदिकी अन्न (भोजन), पान (जलसम्प्रदान आदि), वस्त्र, पात्र (कमण्डलु तथा अन्य पात्र आदि), स्थान, आसन तथा विस्तर (बिछौना आदि), धर्मसाधनोंके सम्प्रदान आदिसे सेवा शुश्रूषा, ओषध आदि दान, वन वा अन्य दुर्गम स्थानोंमे तथा अन्य प्रकारके दुःखोमे सेवा करनी; इत्यादि सब वैयावृत्त्य है ॥ २४ ॥

वाचनाप्रच्छनानुप्रेक्षाम्नायधर्मोपदेशाः ॥ २५ ॥

भाष्यम्—स्वाध्यायः पञ्चविधः। तद्यथा। वाचना प्रच्छन अनुप्रेक्षा आम्नाय. धर्मोपदेश इति। तत्र वाचनं शिष्याध्यापनम्। प्रच्छनं ग्रन्थार्थयोः। अनुप्रेक्षा ग्रन्थार्थयोरेव मनसाभ्यास.। आम्नायो घोषविशुद्धं परिवर्तनं गुणनं रूपदानमित्यर्थः। अर्थोपदेशो व्याख्यानमनुयोगवर्णनं धर्मोपदेश इत्यनर्थान्तरम्।

सूत्रार्थ—विशेषव्याख्या—स्वाध्याय नामक चतुर्थ आभ्यन्तर तप पाच प्रकारका है। जैसे–वाचना, प्रच्छना, अनुप्रेक्षा, आम्नाय, तथा धर्म्मोपदेश। इनमे वाचनासे शिष्योंको शास्त्रोंका अध्यापन अर्थात् शास्त्रोंका पढाना विवक्षित है। प्रच्छन अर्थात् ग्रन्थके अर्थ तथा पाठको प्रश्नपूर्वक जान लेना। अनुप्रेक्षासे ग्रन्थ और अर्थका अपने मनसे अभ्यास करना अर्थात् ग्रन्थको अर्थपाठसहित मनन करना यह तात्पर्य्य है। आम्नायसे घोषविशुद्ध परिवर्तन (शुद्ध पाठका परिवर्तन) गुणनरूप दानसे यहांपर तात्पर्य्य है। तथा अर्थोपदेश, व्याख्यान, अनुयोगवर्णन और धर्म्मोपदेश, ये सब एकार्थवाची अर्थात् पर्य्यायवाचक शब्द है। तात्पर्य्य यह है कि धर्म्मोपदेशसे यहांपर धर्म्मका व्याख्यान सबको श्रवण करना अभीष्ट है ॥ २५ ॥

बाह्याभ्यन्तरोपध्योः ॥ २६ ॥

भाष्यम्—व्युत्सर्गो द्विविधः बाह्य आभ्यन्तरश्च। तत्र बाह्यो द्वादशरूपकस्योपधेः। आभ्यन्तरः शरीरस्य कषायाणां चेति ॥

सूत्रार्थ—विशेषव्याख्या—पञ्चम व्युत्सर्ग नामक आभ्यन्तर तप दो प्रकारका है। जैसे–बाह्य तथा आभ्यन्तर। इनमे बाह्य तो द्वादशरूपक उपाधिसम्बन्धी है। और आभ्यन्तर शरीर तथा कषायों (क्रोधमानादि) से सम्बन्ध रखता है ॥ २६ ॥

उत्तमसंहननस्यैकाग्रचिन्तानिरोधो ध्यानम् ॥ २७ ॥

भाष्यम्—उत्तमसंहननं वज्रर्षभमर्धवज्रनाराचं च। तद्युक्तस्यैकाग्रचिन्तानिरोधश्च ध्यानम् ॥

सूत्रार्थ—विशेषव्याख्या—वज्र, ऋषभ, अर्द्धवज्र तथा नाराच यह उत्तम संहनन है। उस उत्तम संहनन (शरीर-**अवयव**-संस्थानविशेष) करके युक्त जो प्राणी है उसका एकाग्र रूपसे जो चिन्ताका निरोध अर्थात् सांसारिक चिन्ताओंका त्याग है उसको ध्यानरूप षष्ठ अभ्यन्तर तप समझना चाहिये ॥ २७ ॥

आमुहूर्तात् ॥ २८ ॥

भाष्यम्—तद्ध्यानमामुहूर्ताद्भवति परतो न भवति दुर्ध्यानत्वात् ॥

सूत्रार्थ—विशेषव्याख्या—वह ध्यान मुहूर्तकालके अभ्यन्तरमें ही होता है न कि परे, क्योंकि मुहूर्तसे परे दुर्ध्यान (दुष्टध्यान) होजाता है ॥ २८ ॥

आर्तरौद्रधर्मशुक्लानि ॥ २९ ॥

भाष्यम्—तच्चतुर्विधं भवति। तद्यथा। आर्तं रौद्रं धर्मं शुक्लमिति तेषाम् ॥

सूत्रार्थ—विशेषव्याख्या—वह ध्यान चार ४ प्रकारका होता है। जैसे-आर्तध्यान रौद्रध्यान, धर्म्मध्यान, तथा शुक्लध्यान, इन भेदोंमें चार प्रकारका है ॥ २९ ॥ सो अब इनमेंसे यह व्यवस्था है—

परे मोक्षहेतू ॥ ३० ॥

भाष्यम्—तेषां चतुर्णां ध्यानानां परे धर्मशुक्ले मोक्षहेतू भवतः। पूर्वे त्वार्तरौद्रे संसारहेतू इति ॥

सूत्रार्थ—विशेषव्याख्या—इन पूर्वोक्त चार प्रकारके ध्यानोंमेंसे परके जो दो ध्यान है अर्थात् धर्म्मध्यान तथा शुक्लध्यान वे मोक्षके कारण होते है। और पूर्वके जो आर्तध्यान तथा रौद्रध्यान है वे संसारके कारण है ॥ ३० ॥

अत्राह। किमेषां लक्षणमिति। अत्रोच्यते—

अब यहांपर कहते है कि इन चार प्रकारके ध्यानोंका क्या लक्षण है? इस विषयको आगेके सूत्रोंसे कहते है —

आर्तममनोज्ञानां सम्प्रयोगे तद्विप्रयोगाय स्मृतिसमन्वाहारः ॥ ३१ ॥

भाष्यम्—अमनोज्ञानां विषयाणां संप्रयोगे तेषां विप्रयोगार्थं यः स्मृतिसमन्वाहारो भवति तदार्तध्यानमित्याचक्षते। किं चान्यत् ॥

सूत्रार्थ—विशेषव्याख्या—अमनोज्ञ अप्रिय वा अनिष्ट अथवा अरमणीय विषयोंके सम्प्रयोग अर्थात् संयोग होनेपर (अनिष्ट वा अप्रिय विषयोंके मिल जानेपर) उन विषयोंके वियोग होनेके अर्थ जो स्मृतिका समन्वाहार अर्थात् चिन्ताका निरोध करके ध्यान है वह आर्तध्यान है ॥ ३१ ॥ और यह भी है कि:—

वेदनायाश्च ॥ ३२ ॥

भाष्यम्—वेदनायाश्चामनोज्ञायाः संप्रयोगे तद्विप्रयोगाय स्मृतिसमन्वाहार आर्तमिति । किं चान्यत् ॥

सूत्रार्थ—विशेषव्याख्या—अमनोज्ञ अप्रिय जो वेदना (अनुभवविशेष) है उसके सम्प्रयोग अर्थात् योग होनेपर उससे (अनिष्ट वेदनासे) छूटनेके अर्थ जो चित्तकी एकाग्रता है वह आर्तध्यान है ॥ ३२ ॥ और यह भीः—

विपरीतं मनोज्ञानाम् ॥ ३३ ॥

भाष्यम्—मनोज्ञानां विषयाणां मनोज्ञायाश्च वेदनाया विप्रयोगे तत्संप्रयोगाय स्मृतिसमन्वाहार आर्तम् । किं चान्यत् ॥

सूत्रार्थ—विशेषव्याख्या—मनोज्ञ अर्थात् सुन्दर रमणीय तथा प्रिय विषयोंके, और इसी रीतिसे मनोज्ञ प्रियवेदनाके भी वियोग होनेपर उन सबके संयोगके लिये जो चित्तकी एकाग्रता रूप ध्यान है वह भी आर्तध्यान है ॥ ३३ ॥ और यह अन्य भी हैः—

निदानं च ॥ ३४ ॥

भाष्यम्—कामोपहतचित्तानां पुनर्भवविषयसुखगृद्धानां निदानमार्तध्यानं भवति ।

सूत्रार्थ—विशेषव्याख्या—कामनाओंसे जिनका चित्त उपहत अर्थात् दूषित होगया है, इसीसे ऐसे मनुष्योंके अर्थ पुनः समारके विषयोंकी तृष्णाका कारण वह आर्तध्यान होता है ॥ ३४ ॥

तदविरतदेशविरतप्रमत्तसंयतानाम् ॥ ३५ ॥

भाष्यम्—तदेतदार्तध्यानमविरतदेशविरतप्रमत्तसंयतानामेव भवति ।

सूत्रार्थ—विशेषव्याख्या—यह आर्तध्यान अविरत, देशविरत तथा प्रमत्तसंयत-गुणस्थानवर्ती जीवोंको होता है ॥ ३५ ॥

हिंसानृतस्तेयविषयसंरक्षणेभ्यो रौद्रमविरतदेशविरतयोः ॥ ३६ ॥

भाष्यम्—हिंसार्थमनृतवचनार्थं स्तेयार्थं विषयसंरक्षणार्थं च स्मृतिसमन्वाहारो रौद्रध्यानं तदविरतदेशविरतयोरेव भवति ।

सूत्रार्थ—विशेषव्याख्या—हिंसाके लिये, अनृत अर्थात् मिथ्या वचनके लिये, स्तेय-चौर्य कर्मके लिये तथा विषयकी रक्षाके लिये चित्तकी एकाग्रतारूप रौद्रध्यान अविरत तथा देशविरत प्राणियोंका होता है ॥ ३६ ॥

आज्ञापायविपाकसंस्थानविचयाय धर्ममप्रमत्तसंयतस्य ॥ ३७ ॥

भाष्यम्—आज्ञाविचयाय अपायविचयाय विपाकविचयाय संस्थानविचयाय च स्मृति-समन्वाहारो धर्मध्यानम् । तदप्रमत्तसंयतस्य भवति । किं चान्यत्

सूत्रार्थ—विशेषव्याख्या—आज्ञाविचय, आज्ञा अर्थात् जिनशास्त्रकी आज्ञा उसके

विचय अर्थात् विवेक तथा विचारके लिये, अपायविचय अर्थात् मन्मार्गसे दूरीकरण वा दूरीभवनरूप अपाय उसके विचय (विवेक वा विचार) के लिये, तथा विपाक अर्थात् कर्मोंके फलभोगरूप विपाकके विचयके लिये और संस्थानविचयके लिये जो स्मृति-समन्वाहार (चिन्ताके निरोध)से निरन्तर ध्यान है वह धर्म्मध्यान है । और यह धर्मध्यान अप्रमत्त-संयत-गुणस्थानवर्ती जीवको होता है ॥ ३७ ॥ और यह अन्य भी है—

उपशान्तक्षीणकषाययोश्च ॥ ३८ ॥

भाष्यम्—उपशान्तकषायस्य च धर्मं ध्यानं भवति । किं चान्यत्

सूत्रार्थ—विशेषव्याख्या—उपशान्तकषाय (जिसके कषाय शान्त होगये हैं ऐसा मनुष्य) तथा क्षीणकषाय अर्थात् जिमके कषाय सर्वथा नष्ट होगये है ऐसा मनुष्य, इन दोनोंको अर्थात् उपशान्तकषाय और क्षीणकषाय गुणस्थानवर्ती जीवोंको भी धर्म ध्यान होता है ॥३८॥ और अन्य यह भी है कि—

शुक्ले चाद्ये ॥ ३९ ॥

भाष्यम्—शुक्ले चाद्ये ध्याने पृथक्त्ववितर्कैकत्ववितर्के चोपशान्तक्षीणकषाययोर्भवतः । आद्ये शुक्ले ध्याने पृथक्त्ववितर्कैकत्ववितर्के पूर्वविदो भवतः ।

सूत्रार्थ—विशेषव्याख्या—शुक्ल ध्यानके चार भेद आगे (अ. ९, सू. ४१) कहैंगे; उनमेंसे पृथक्त्ववितर्क तथा एकत्ववितर्क जो आदिके दो भेद है वे उपशान्तकषाय और क्षीणकषाय पुरुषोंको होते हैं । आद्य अर्थात् आदिके जो पृथक्त्ववितर्क और एकत्वबितर्क शुक्ल ध्यानके भेद है वे पूर्वविद् अर्थात श्रुतकेवलीको होते है ॥ ३९ ॥

परे केवलिनः ॥ ४० ॥

भाष्यम्—परे द्वे शुक्लध्याने केवलिन एव भवतः न च्छद्मस्थस्य ।

सूत्रार्थ—विशेषव्याख्या—और परके दो शुक्ल ध्यान अर्थात् सूक्ष्मक्रियाप्रतिपाति और व्युपरतक्रियानिवृत्ति है ये केवली भगवान्को होते है न कि छद्मस्थको ॥ ४० ॥

अत्राह । उक्त भवता पूर्वे ध्याने परे शुक्ले ध्याने इति तत्कानि तानीति । अत्रोच्यते

अब कहते है कि आपने "पूर्वे (आद्ये) शुक्ले," तथा "परे शुक्ले" अर्थात् पूर्वके दो शुक्ल ध्यान तथा परके दो शुक्ल ध्यान ऐसा कहा है, सो वे चारों शुक्ल ध्यान कौन २ हैं, इस हेतुसे यह आगेका सूत्र कहते है ।—

पृथक्त्वैकत्ववितर्कसूक्ष्मक्रियाप्रतिपातिव्युपरतक्रियानिवृत्तीनि ॥ ४१ ॥

भाष्यम्—पृथक्त्ववितर्क एकत्ववितर्क काययोगानां सूक्ष्मक्रियाप्रतिपाति व्युपरतक्रियानिवृत्तीति चतुर्विधं शुक्लध्यानम् ।

सूत्रार्थ—विशेषव्याख्या—पृथक्त्ववितर्क १ एकत्ववितर्क २ सूक्ष्मक्रियातिपाति ३ तथा व्युपरतक्रियानिवृत्ति ४ यह चार प्रकारका शुक्ल ध्यान है ॥ ४१ ॥

तत्र्येककाययोगायोगानाम् ॥ ४२ ॥

भाष्यम्—तदेतच्चतुर्विधं शुक्लध्यानं त्रियोगस्यान्यतमयोगस्य काययोगस्यायोगस्य च यथासङ्ख्यं भवति । तत्र त्रियोगानां पृथक्त्ववितर्कमेकान्यतमयोगानामेकत्ववितर्कं काययोगानां सूक्ष्मक्रियमप्रतिपात्ययोगानां व्युपरतक्रियमनिवृत्तीति ।

सूत्रार्थ—विशेषव्याख्या—यह चारो प्रकारका शुक्ल ध्यान, त्रियोगको, तीनोमें एक योगवालेको, काययोगवालेको, तथा अयोगको क्रमसे यथासंख्यकरके होता है। अर्थात् काय, वाक् और मन ये तीनो योग जिसको है उसको पृथक्त्ववितर्क नाम शुक्ल ध्यान होता है, और इन तीनों योगोंमेसे कोई भी एक योग जिसको है उसको एकत्ववितर्क नाम शुक्लध्यान होता है। काययोगवालेको सूक्ष्मक्रियाप्रतिपाति नामक शुक्लध्यान होता है, और अयोग अर्थात् सर्वथा योगसे रहित (अयोगकेवली) को व्युपरतक्रियानिवृति नामक शुक्लध्यान होता है ॥ ४२ ॥

एकाश्रये सवितर्के पूर्वे ॥ ४३ ॥

भाष्यम्—एकद्रव्याश्रये सवितर्के पूर्वे ध्याने प्रथमद्वितीये। तत्र सविचारं प्रथमम् ।

सूत्रार्थ—विशेषव्याख्या—पूर्वके जो दो शुक्लध्यान है अर्थात् पृथक्त्ववितर्क तथा एकत्ववितर्क वे दोनो एक द्रव्यके आश्रयीभूत तथा वितर्कसहित होते है। इनमेसे जो प्रथम पृथक्त्ववितर्क है वह विचारसहित होता है ॥ ४३ ॥

अविचारं द्वितीयम् ॥ ४४ ॥

भाष्यम्—अविचारं सवितर्कं द्वितीयं ध्यानं भवति ॥

सूत्रार्थ—विशेषव्याख्या—और द्वितीय जो एकत्ववितर्क शुक्लध्यान है वह तो विचाररहित तथा वितर्कसहित होता है ॥ ४४ ॥

अत्राह् । वितर्कविचारयो: क: प्रतिविशेष इति । अत्रोच्यते

अब कहते है वितर्क तथा विचारमे क्या प्रतिविशेष अर्थात् भेद है । इस लिये आगेका सूत्र कहते है—

वितर्कः श्रुतम् ॥ ४५ ॥

भाष्यम्—यथोक्तं श्रुतज्ञानं वितर्को भवति ॥

सूत्रार्थ—विशेषव्याख्या—पूर्वकथित श्रुतज्ञान अर्थात् पूर्वप्रसङ्गमे जैसे श्रुतज्ञानका लक्षण कहा है वही यथोक्त श्रुतज्ञान वितर्क है ॥ ४५ ॥

विचारोऽर्थव्यञ्जनयोगसंक्रान्तिः ॥ ४६ ॥

भाष्यम्—अर्थव्यञ्जनयोगसंक्रान्तिर्विचार इति ।

सूत्रार्थ—विशेषव्याख्या—अर्थ, व्यञ्जन, तथा योगकी जो संक्रान्ति उसको विचार कहते है। यहांपर अर्थ शब्दसे ध्येय पदार्थ वा द्रव्य अथवा पर्य्यायका ग्रहण है, व्यञ्जनसे

वचनका ग्रहण है, और योगसे "काय-वाग्-मनःकर्म योगः" इस सूत्रमें कथित तीनो योगोंका ग्रहण है, उनकी संक्रान्ति अर्थात् परिवर्तन। इससे यह सिद्ध हुआ कि जिस ध्यानमें द्रव्य वा पर्य्याय, वचन (श्रुत) तथा योगका परिवर्तन होता रहता है वह विचारसहित प्रथम है और यह पूर्वकथित (अर्थव्यञ्जनयोगसंक्रान्ति अर्थात् इनका परिवर्तनरूप) जो विचार है उस विचारसे रहित अर्थात् अविचार द्वितीय (एकत्ववितर्क) रूप शुक्लध्यान है ॥

तदाभ्यन्तरं तपः संवरत्वादभिनवकर्मोपचयप्रतिषेधक निर्जरणफलत्वात्कर्मनिर्जरकम् । अभिनवकर्मोपचयप्रतिषेधकत्वात्पूर्वोपचितकर्मनिर्जरकत्वाच्च निर्वाणप्रापकमिति ॥

यह छ प्रकारका आभ्यन्तर तप संवर होनेसे नूतन कर्मोके संचयका प्रतिषेधक अर्थात् निषेध करनेवाला है तथा कर्मोंकी निर्जरारूप फल देनेसे कर्मोंका निर्जरणकारक अर्थात् कर्म्मोंका नाशक भी है। और अभिनव अर्थात् नूतन कर्मके उपचय (संचय वा वृद्धि) का निषेध करनेवाला होनेसे और पूर्वसचित कर्मोंका निर्जरण (नाशक) होनेसे निर्वाण अर्थात् मोक्षको प्राप्त करनेवाला भी है ॥ ४६ ॥

अत्राह। उक्तं भवता परीषहजयात्तपसोऽनुभावतश्च कर्मनिर्जरा भवतीति । तत्कि सर्वे सम्यग्दृष्टयः समनिर्जरा आहोस्विदस्ति कश्चित्प्रतिविशेष इति। अत्रोच्यते।

अब कहते है कि प्रथम आपने कहा था कि द्वाविंशति २२ परीषहोंके जयसे तथा तपके अनुभाव (प्रभाव)से कर्मोकी निर्जरा होती है। सो सब सम्यग्दृष्टिपुरुष समान निर्जरावाले होते हैं, अथवा कोई विशेष है; इस लिये आगेका सूत्र कहते हैं।—

सम्यग्दृष्टिश्रावकविरतानन्तवियोजकदर्शनमोहक्षपकोपशमकोपशान्तमोहक्षपकक्षीणमोहजिनाः क्रमशोऽसङ्ख्येयगुणनिर्जराः ॥ ४७ ॥

भाष्यम्—सम्यग्दृष्टि श्रावकः विरतः अनन्तानुबन्धिवियोजकः दर्शनमोहक्षपकः मोहोपशमकः उपशान्तमोह. मोहक्षपक क्षीणमोहः जिन इत्येते दश क्रमशोऽसङ्ख्येयगुणनिर्जरा भवन्ति। तद्यथा। सम्यग्दृष्टेः श्रावकोऽसङ्ख्येयगुणनिर्जरः श्रावकाद्विरतः विरतादनन्तानुबन्धिवियोजक इत्येव शेषाः ॥

सूत्रार्थ—विशेषव्याख्या—सम्यग्दृष्टि १ श्रावक २ विरत ३ अनन्तानुबन्धिवियोजक ४ दर्शनमोहक्षपक ५ मोहोपशमक ६ उपशान्तमोह ७ मोहक्षपक ८ क्षीणमोह ९ तथा जिन १० ये दशो क्रमसे असख्येय गुणवाली निर्जराको उत्पन्न करनेवाले होते है। जैसे—सम्यग्दृष्टिकी अपेक्षासे श्रावक असख्येयगुणनिर्जरावाला होता है, श्रावकसे विरत असंख्येय गुणवाली निर्जरासहित होता है, और विरतसे अनन्तानुबन्धिवियोजक असख्येय-गुण-निर्जरासहित होता है। ऐसेही आगे जिनपर्य्यन्त समझ लेना ॥ ४७ ॥

पुलाकबकुशकुशीलनिर्ग्रन्थस्नातका निर्ग्रन्थाः ॥ ४८ ॥

भाष्यम्—पुलाको बकुशः कुशीलो निर्ग्रन्थः स्नातक इत्येते पञ्चनिर्ग्रन्थविशेषा भवन्ति। तत्र सततमप्रतिपातिनो जिनोक्तादागमान्निर्ग्रन्थपुलाकाः । नैर्ग्रन्थ्यं प्रति प्रस्थिताः शरीरोपकरणविभूषानुवर्तिन ऋद्धियशस्कामाः सातगौरवाश्रिता अविविक्तपरिचाराश्छेदशबलयुक्ता निर्ग्रन्था बकुशाः । कुशीला द्विविधाः प्रतिसेवनाकुशीलाः कषायकुशीलाश्च । तत्र प्रतिसेवनाकुशीलाः नैर्ग्रन्थ्यं प्रति प्रस्थिता अनियतेन्द्रियाः कथंचित्किंचिदुत्तरगुणेषु विराधयन्तश्चरन्ति ते प्रतिसेवनाकुशीलाः । येषां तु संयतानां सतां कथंचित्सज्वलनकषाया उदीर्यन्ते ते कषायकुशीलाः । ये वीतरागच्छद्मस्था ईर्यापथप्राप्तास्ते निर्ग्रन्था । ईर्या योगः पन्थाः संयमः योगसंयमप्राप्ता इत्यर्थः । सयोगाः शैलेशीप्रतिपन्नाश्च केवलिनः स्नातका इति ॥

सूत्रार्थ—विशेषव्याख्या—पुलाक, बकुश, कुशील, निर्ग्रन्थ, तथा स्नातक ये पांच निर्ग्रन्थ है । इनमेसे निरन्तर जो जिनकथित आगमसे कदापि पतित न होंवे पुलाक निर्ग्रन्थ हैं । तथा निर्ग्रन्थताके प्रति जो प्रस्थित हुए है, किन्तु शरीरके उपकरण भूषण आदिके अनुवर्ती है, ऋद्धि (ऐश्वर्य्य) तथा यशकी कामना करनेवाले है, अतिगौरवयुक्त, अविविक्त (नातिपवित्रतायुक्त) परिचारसहित, और छेदशबलयुक्त जो है वे बकुश निर्ग्रन्थ है । कुशील दो प्रकारके है, एक तो प्रतिसेवनाकुशील और द्वितीय कषायकुशील । उनमेंसे जो निर्ग्रन्थता सम्पादन करनेके लिये प्रस्थित है सो जो अनियत इंद्रिय हैं, अर्थात् जिनकी इद्रिया सर्वथा स्वाधीन नही है, और किसी प्रकारसे उत्तरगुणोंमें भी विरोध (विघात) करनेवाले है वे प्रतिसेवनाकुशील निर्ग्रन्थ है । और जिन्होंने अन्य कषायोंको तो जीत लिया है ऐसे सयम युक्त होनेपर भी जिनके कथचित् (किसी प्रकारसे) सज्वलनकषाय उद्रेकताको अर्थात् आविर्भावको प्राप्त होजायँ वे कषायकुशील निर्ग्रन्थ है । और जो वीतराग छद्मस्थ है, तथा इर्य्यापथमे प्राप्त है वे निर्ग्रन्थ है । यहापर इर्य्यासे योगका ग्रहण है, और पन्था (पथ) से संयमका ग्रहण है, इससे यह तात्पर्य्य सिद्ध हुआ कि जो योगसंयममे प्राप्त है वे निर्ग्रन्थ आचार्य्य है । और जो योगसहित है तथा जो शैलेशीप्राप्त है वे स्नातक है ॥ ४८ ॥

संयमश्रुतप्रतिसेवनातीर्थलिङ्गलेश्योपपातस्थानविकल्पतःसाध्याः४९

भाष्यम्—एते पुलाकादयः पञ्च निर्ग्रन्थविशेषा एभिः संयमादिभिरनुयोगविकल्पैः साध्या भवन्ति । तद्यथा ।

सूत्रार्थ—विशेषव्याख्या—इन पुलाक आदि पांचो निर्ग्रन्थोंका आगे कहे हुए संयम आदि विकल्पोंसे साधन करना चाहिये । जैसे—

संयमः । कः कस्मिन्संयमे भवतीति । उच्यते । पुलाकबकुशप्रतिसेवनाकुशीला द्वयोः संयमयोः सामायिके छेदोपस्थाप्ये च । कषायकुशीलो द्वयोः परिहारविशुद्धौ सूक्ष्मसंपराये च । निर्ग्रन्थस्नातकावेकस्मिन्यथाख्यातसंयमे ॥

सबसे प्रथम संयमका विचार कहते है—कौन किसमे होता है, अर्थात् कौन निर्ग्रन्थ

किस संयम आदिमें होते हैं इस विषयको कहते है। जैसे—पुलाक, बकुश, तथा प्रतिसेवना-कुशील, ये दो २ संयमोंमें अर्थात् सामायिक तथा छेदोपस्थाप्यमें होते हैं। कषाय-कुशील निर्ग्रन्थ भी परिहारविशुद्धि और सूक्ष्मसंपराय इन दोनो संयमोमे होते हैं। और निर्ग्रन्थ तथा स्नातक केवल एक यथाख्यातसंयममे होते है॥

श्रुतम्। पुलाकबकुशप्रतिसेवनाकुशीला उत्कृष्टेनाभिन्नाक्षरदशपूर्वधराः। कषायकुशील-निर्ग्रन्थौ चतुर्दशपूर्वधरौ। जघन्येन पुलाकस्य श्रुतमाचारवस्तु। बकुशकुशीलनिर्ग्रन्थानां श्रुतमष्टौ प्रवचनमातरः। श्रुतापगतः केवली स्नातक इति॥

श्रुतके विषयमेः—पुलाक, बकुश, और प्रतिसेवनाकुशील ये तीन निर्ग्रन्थ उत्कृष्टतासे अर्थात् अधिकसे अधिक अभिन्नाक्षर दश पूर्वधर होते है। कषायकुशील और निर्ग्रन्थ ये दोनों निर्ग्रन्थ विशेष चतुर्दश पूर्वधर होते है। और जघन्यता (न्यूनता)से तो पुलाकका श्रुतकेवल आचारवस्तु है। और बकुश, कुशील तथा निर्ग्रन्थोका श्रुत जघन्य अपेक्षासे अर्थात् न्यूनतासे केवल प्रवचनकी माता है। और केवली स्नातक तो श्रुतापगत है।

प्रतिसेवना। पञ्चानां मूलगुणानां रात्रिभोजनविरतिषष्ठानां पराभियोगाद्बलात्कारेणा-न्यतमं प्रतिसेवमानः पुलाको भवति। मैथुनमित्येके। बकुशो द्विविधः उपकरणबकुशः शरी-रबकुशश्च। तत्रोपकरणाभिष्वक्तचित्तो विविधविचित्रमहाधनोपकरणपरिग्रहयुक्तो बहुवि-शेषोपकरणकांक्षायुक्तो नित्यं तत्प्रतिसंस्कारसेवी भिक्षुरुपकरणबकुशो भवति। शरीराभि-ष्वक्तचित्तो विभूषार्थं तत्प्रतिसंस्कारसेवी शरीरबकुशः। प्रतिसेवनाकुशीलो मूलगुणानवि-राधयन्नुत्तरगुणेषु काचिद्विराधनां प्रतिसेवते। कषायकुशीलनिर्ग्रन्थस्नातकानां प्रतिसे-वना नास्ति॥

प्रतिसेवना, पांच मूलगुण, तथा रात्रिभोजनसे विरतिसहित षट्, अर्थात् पांच मूलगुण और रात्रिभोजनसे विरति (उपराम) लेकर छः हुए, इनमेंसे, दूसरोंके अभियोग अर्थात् प्रेरणासे बलात्कार (जबरदस्ती) से किसी एकका प्रतिसेवन करनेवाला पुलाक होता है। इनमेंसे मैथुनका ग्रहण किसी एक आचार्य्यके मतसे है। बकुश दो प्रकारके होते है; एक तो उपकरणबकुश और दूसरा शरीरबकुश होता है। इनमेंसे उपकरणों (सामग्रियों) मे चित्त लगानेवाला, विविध अर्थात् अनेक प्रकारके विचित्र महाधनवाले उपकरणोंके परिग्रहसहित, बहुत अधिक उपकरणोंकी अभिलाषा करनेवाला और प्रतिदिन अर्थात् सदा उनके प्रतिसंस्कारोंको सेवन करनेवाला भिक्षुक उपकरण-बकुश कहा जाता है। और शरीरमे दत्तचित्त, विभूषणोंके लिये अर्थात् शरीरको भूषित करनेके लिये जो प्रतिसंस्कारोंका सेवन करनेवाला है वह शरीरबकुश भिक्षुक है। और जो मूलगणोंका विराध (विघात) न करता हुआ उत्तरगुणोंमें किसी एक

विराधनाका प्रतिसेवी है, वह प्रतिसेवनाकुशील है। और कषायकुशील, निर्ग्रन्थ, तथा स्नातक इन तीनोंको तो प्रतिसेवना होती ही नहीं है ॥

तीर्थम्। सर्वे सर्वेषां तीर्थकराणां तीर्थेषु भवन्ति। एके त्वाचार्या मन्यन्ते पुलाकबकुशप्रतिसेवनाकुशीलास्तीर्थे नित्यं भवन्ति शेषास्तीर्थे वातीर्थे वा ॥

तीर्थके विषयमें:—सब निर्ग्रन्थ सब तीर्थकरोंके तीर्थोंमे होते है। और कोई २ आचार्य्य तो ऐसा मानते है कि पुलाक, बकुश तथा प्रतिसेवनाकुशील ये तीनो तीर्थमे नित्य होते है, और शेष (बाकी) अर्थात् कषायकुशील, निर्ग्रन्थ तथा स्नातक ये तीर्थ वा अतीर्थमे भी होते है ॥

लिङ्गम्। लिङ्गम् द्विविधम् द्रव्यलिङ्गं भावलिङ्गं च। भावलिङ्ग प्रतीत्य सर्वे पञ्च निर्ग्रन्था भावलिङ्गे भवन्ति द्रव्यलिङ्गं प्रतीत्य भाज्याः ॥

लिङ्गके विषयमे:—लिङ्ग दो प्रकारका है, एक तो द्रव्यलिङ्ग और दूसरा भावलिङ्ग, उनमेसे भावलिङ्गको निमित्त मानकर पाचोही निर्ग्रन्थ भावलिङ्गमे होते है। और द्रव्यलिङ्गको निमित्त मानकर तो इनका विभाग करना चाहिये।

लेश्याः। पुलाकस्योत्तरास्तिस्रो लेश्या भवन्ति। बकुशप्रतिसेवनाकुशीलयोः सर्वाः षडपि। कषायकुशीलस्य परिहारविशुद्धेस्तिस्र उत्तरा। सूक्ष्मसंपरायस्य निर्ग्रन्थस्नातकयोश्च शुक्लैव केवला भवति। अयोगः शैलेशीप्रतिपन्नोऽलेश्यो भवति ॥

लेश्याके विषयमे—पुलाकको अन्त्यकी तीन लेश्या होती है। बकुश तथा प्रतिसेवनाकुशीलको सब अर्थात् छहो लेश्या होती है। परिहारविशुद्धिस्थानवर्ती, तथा कषायकुशीलको अन्तकी तीन लेश्या होती है। सूक्ष्मसपरायस्थानवर्ती और निर्ग्रन्थ तथा स्नातकको केवल एक शुक्ल लेश्याही होती है। और अभोग अर्थात् भोगसे रहित जो शैलेशीप्राप्त है वह तो अलेश्य (लेश्यारहित) ही होता है ॥

उपपातः। पुलाकस्योत्कृष्टस्थितिषु देवेषु सहस्रारे। बकुशप्रतिसेवनाकुशीलयोर्द्वाविंशतिसागरोपमस्थितिष्वारणाच्युतकल्पयोः। कषायकुशीलनिर्ग्रन्थयोस्त्रयस्त्रिंशत्सागरोपमस्थितिषु देवेषु सर्वार्थसिद्धे। सर्वेषामपि जघन्या पल्योपमपृथक्त्वस्थितिषु सौधर्मे। स्नातकस्य निर्वाणमिति ॥

उपपातके विषयमें पुलाक निर्ग्रन्थका उपपात अर्थात् ऊर्ध्वगमन अथवा स्वर्गविशेषमें उत्पत्ति सबसे उत्कृष्ट (उत्तम) स्थितिवाले जो देव है उनमे सहस्रारनाम स्वर्गविशेषमें होती है। बकुश तथा प्रतिसेवनाकुशीलका उपपात बाईस २२ सागरोपमास्थितिवाले देवोंमे आरण तथा अच्युतकल्पमे होता है। कषायकुशील तथा निर्ग्रन्थका उपपात त्रयस्त्रिंशत् (३३) सागरोपम स्थितिवाले देवोंमे सर्वार्थसिद्धनामक स्वर्ग वा विमानमें होता है। और सबका अर्थात् पांचोंकी जघन्य वा न्यूनसे न्यून स्थिति अथवा उपपात पल्योपम

पृथक्त्व स्थितिवाले देवोंमें सौधर्मनामक विमान वा स्वर्गविशेषमे होता है। और स्नातकको तो निर्वाण ही होता है ॥

स्थानम् । असङ्ख्येयानि संयमस्थानानि कषायनिमित्तानि भवन्ति । तत्र सर्वजघन्यानि लब्धिस्थानानि पुलाककषायकुशीलयोः । तौ युगपदसङ्ख्येयानि स्थानानि गच्छतः । ततः पुलाको व्युच्छिद्यते कषायकुशीलस्त्वसङ्ख्येयानि स्थानान्येकाकी गच्छति । ततः कषायकुशीलप्रतिसेवनाकुशीलबकुशा युगपदसङ्ख्येयानि संयमस्थानानि गच्छन्ति । ततो बकुशो व्युच्छिद्यते । ततोऽसङ्ख्येयानि स्थानानि गत्वा प्रतिसेवनाकुशीलो व्युच्छिद्यते । ततोऽसङ्ख्येयानि स्थानानि गत्वा कषायकुशीलो व्युच्छिद्यते। अत ऊर्ध्वमकषायस्थानानि निर्ग्रन्थः प्रतिपद्यते । सोऽप्यसङ्ख्येयानि स्थानानि गत्वा व्युच्छिद्यते । अत ऊर्ध्वमेकमेव स्थानं गत्वा निर्ग्रन्थस्नातको निर्वाणं प्राप्नोतीति एषां संयमलब्धिरनन्तानन्तगुणा भवतीति ॥

इति तत्त्वार्थाधिगमेऽर्हत्प्रवचनसङ्ग्रहे नवमोऽध्याय. समाप्तः ॥

स्थानविषयमे.–कषायनिमित्तक असङ्ख्येय सयमस्थान होते है । उनमेंसे पुलाक और कषायकुशीलके सबसे जघन्य अर्थात् सबसे निकृष्ट लब्धिस्थान होते है । वे दोनो (पुलाक और कषायकुशील) एक कालमे ही असङ्ख्येय स्थानमे जाते है । वहांसे पुलाक पृथक् किया जाता है, और कषायकुशील तो एकाकी (अकेला) ही असङ्ख्येय स्थानोंमें जाता है । उसके अनन्तर कषायकुशील, प्रतिसेवनाकुशील, और बकुश एक कालमे ही असङ्ख्येय सयमस्थानोंमे जाते है । वहां बकुश पृथक् किया (अलगाया) जाता है । उसके पश्चात् असङ्ख्येय स्थानोमे जाकर प्रतिसेवनाकुशील पृथक् किया जाता है । इसके ऊपर अकषायस्थान है, उनमें केवल निर्ग्रन्थ ही प्राप्त होता है । वह भी असङ्ख्येय स्थानोंमे जाकर रोक दिया जाता है । और इसके ऊर्ध्व (ऊपर) एकही स्थान जाकर निर्ग्रन्थ स्नातक निर्वाण (मोक्ष) को प्राप्त होता है । इनकी सयमलब्धि अनन्त तथा अनन्त गुण होती है ॥

इति श्रीतत्त्वार्थाधिगमेऽर्हत्प्रवचनसङ्ग्रहे आचार्य्योपाधिधारिद्विवेद्युपनामकठाकुरप्रसादशर्मप्रणीतभाषाभाष्ये नवमोऽध्याय. ॥ ९ ॥

अथ दशमोऽध्यायः ॥ १० ॥

मोहक्षयाज्ज्ञानदर्शनावरणान्तरायक्षयाच्च केवलम् ॥ १ ॥

भाष्यम् –मोहनीये क्षीणे ज्ञानावरणदर्शनावरणान्तरायेषु क्षीणेषु च केवलज्ञानदर्शनमुत्पद्यते । आसां चतसृणां कर्मप्रकृतीनां क्षयः केवलस्य हेतुरिति । तत्क्षयादुत्पद्यत इति हेतौ पञ्चमीनिर्देशः । मोहक्षयादिति पृथक्करणं क्रमप्रसिद्ध्यर्थं यथा गम्येत पूर्वं मोहनीयं

कृत्स्नं क्षीयते ततोऽन्तमुहूर्तं छद्मस्थवीतरागो भवति। ततोऽस्य ज्ञानदर्शनावरणान्तराय-प्रकृतीनां तिसृणां युगपत्क्षयो भवति। ततः केवलमुत्पद्यते॥

सूत्रार्थ—विशेषव्याख्या—मोहनीय कर्मके क्षीण होनेपर तथा ज्ञानावरण, दर्शनावरण और अन्तरायके क्षीण होनेपर केवल ज्ञान दर्शन उत्पन्न होता है। इन चारों अर्थात् मोहनीय, ज्ञानावरणीय, दर्शनावरणीय तथा अन्तराय कर्म प्रकृतियोंका क्षय केवल ज्ञानका हेतु है, (मोहनीयक्षयात्) तथा (ज्ञानदर्शनावरणान्तरायक्षयात्) इनके क्षयसे उत्पन्न होता है. उक्त दोनों स्थलोमे जो पञ्चमी निर्देश है, अर्थात् पञ्चमी विभक्तिका विधान आचार्य्यने किया है वह हेतु अर्थमें पञ्चमी है। तात्पर्य्य यह है कि चारों प्रकृतियोंके क्षयरूप निमित्तसे केवल ज्ञानकी उत्पत्ति है। और "मोहक्षयात्" यह पृथक् जो पञ्चमी-निर्देश किया है सो उस क्रमकी प्रसिद्धिके अर्थ किया है, जिससे कि यह अर्थ स्पष्ट रूपसे भान हो कि प्रथम सम्पूर्ण मोहनीय प्रकृतिका क्षय होता है उसके अनन्तर अन्तर्मुहूर्त-कालमे छद्मस्थ वीतराग होता है; और छद्मस्थ वीतराग होनेके पश्चात् ज्ञानावरण, दर्शनावरण, तथा अन्तराय इन तीनों प्रकृतियोंका एक कालमे ही क्षय होता है। और इन तीनों प्रकृतियोंके क्षयके पश्चात् केवल ज्ञान उत्पन्न होता है ॥ १ ॥

अत्राह। उक्तं मोहक्षयाज्ज्ञानदर्शनावरणान्तरायक्षयाच्च केवलमिति। अथ मोहनीयादीनां क्षयः कथं भवतीति। अत्रोच्यते—

अब कहते है कि यह तो आपने कहा कि मोहनीय प्रकृतिके क्षय तथा ज्ञानावरणीय दर्शनावरणीय तथा अन्तराय, इन कर्मप्रकृतियोंके क्षयसे केवल (केवलज्ञान) उत्पन्न होता है, परंतु मोहनीय आदि प्रकृतियोका क्षय किस प्रकारसे होता है? इसलिये आगेका सूत्र कहते है।

बन्धहेत्वभावनिर्जराभ्याम् ॥ २ ॥

मिथ्यादर्शनादयो बन्धहेतवोऽभिहिता। तेषामपि तदावरणीयस्य कर्मणः क्षयादभावो भवति सम्यग्दर्शनादीनां चोत्पत्तिः। तत्त्वार्थश्रद्धानं सम्यग्दर्शनम् तन्निसर्गादधिगमाद्वेत्युक्तम्। एवं संवरसंवृतस्य महात्मनः सम्यग्व्यायामस्याभिनवस्य कर्मण उपचयो न भवति पूर्वोपचितस्य च यथोक्तैर्निर्जराहेतुभिरत्यन्तक्षयः। ततः सर्वद्रव्यपर्यायविषयं परमैश्वर्यमनन्तं केवलं ज्ञानदर्शनं प्राप्य शुद्धो बुद्धः सर्वज्ञः सर्वदर्शी जिनः केवली भवति। ततः प्रतनुशुभचतुःकर्मावशेष आयुःकर्मसंस्कारवशाद्विहरति।

सूत्रार्थ—विशेषव्याख्या—मिथ्यादर्शन, मिथ्याज्ञान आदि बन्धके हेतु कहे है, उनका अर्थात् बन्धके हेतुओंका भी ज्ञानावरणीय आदि कर्मप्रकृतियोंके क्षयसे अभाव होता है, और सम्यग्दर्शन आदिकी उत्पत्ति भी होती है। **"तत्त्वार्थश्रद्धानम् सम्यग्दर्शनम्"** तत्त्वार्थका श्रद्धान ही सम्यग्दर्शन है, और निसर्ग तथा अधिगमसे होता है; यह विषय प्रथम अध्यायमें

कह आये है । इसप्रकार संवरसे संवृत (युक्त) महात्माको सम्यग्व्यायामयुक्त जो नूतन कर्म है उनकी वृद्धि नहीं होती, तथा जो पूर्वकालके सञ्चित कर्म है उनका भी यथोक्त (कहेहुए) निर्जराके हेतुओं (तपआदिकों) से अत्यन्त क्षय होता है । उसके अनन्तर अर्थात् कर्मोके सर्वथा क्षयहोनेके पश्चात् क्रमसे सम्पूर्ण द्रव्य तथा सम्पूर्ण पर्य्याय विषयक, अर्थात् सब द्रव्य और सब पर्य्यायोंको साक्षात्कार करनेवाला, परम ऐश्वर्य (सबसे उत्कृष्ट ऐश्वर्य) सहित केवल ज्ञान दर्शनको पाकर शुद्ध (सवर्था पवित्र), बुद्ध (सर्व द्रव्य पर्य्यायोंका ज्ञाता), सर्वद्रष्टा केवली जिन भगवान् यह प्राणी होता है । और उसके पश्चात् अति सूक्ष्म शुभ चार कर्म शेषवाला यह अलग रहजाता है, और आयुःकर्मसंस्कारके वशसे संसारमे विहरता है ॥ २ ॥

ततोऽस्य

और इसको.–

कृत्स्नकर्मक्षयो मोक्षः ॥ ३ ॥

भाष्यम्— कृत्स्नकर्मक्षयलक्षणो मोक्षो भवति । पूर्व क्षीणानि चत्वारि कर्माणि पश्चाद्वेदनीयनामगोत्रायुष्कक्षयो भवति । तत्क्षयसमकालमेवौदारिकशरीरवियुक्तस्यास्य जन्मनः प्रहाणम । हेत्वभावाच्चोत्तरस्याप्रादुर्भावः । एषावस्था कृत्स्नकर्मक्षयो मोक्ष इत्युच्यते ।

सूत्रार्थ—विशेषव्याख्या—सम्पूर्ण कर्मोका क्षयरूप मोक्ष प्राप्त होता है । इस रीतिसे मोहनीय आदि चार कर्मप्रकृति तो प्रथमही क्षीण होचुकी थी, और इसके पश्चात् वेदनीय, नाम, गोत्र, तथा आयु ये चार जो शुभ कर्म शेष रह गये थे, वेभी क्षयको प्राप्त होते है । और इन चारोंके क्षयके समकालमे ही औदारिक शरीरसे रहित जो यह जीव उसके जन्मका सर्वथा प्रयाण अर्थात् नाश होता है । क्योंकि हेतु (शरीरधारणके हेतु) ओंके अभावसे पुन उत्तरजन्मका प्रादुर्भाव नही होता है । इस प्रकार यह अवस्था सम्पूर्ण कर्मोका क्षयरूप मोक्ष वा मुक्तिस्वरूपसे कही जाती है ॥ ३ ॥

किं चान्यत् ।

और अन्य यह भी है.–

औपशमिकादिभव्यत्वाभावाच्चान्यत्र केवलसम्यक्त्वज्ञानदर्शनसिद्धत्वेभ्यः ॥ ४ ॥

भाष्यम्—औपशमिकक्षायिकक्षायौपशमिकौदयिकपारिणामिकानां भावानां भव्यत्वस्य चाभावान्मोक्षो भवति अन्यत्र केवलसम्यक्त्वकेवलज्ञानकेवलदर्शनसिद्धत्वेभ्यः । एते ह्यस्य क्षायिका नित्यास्तु मुक्तस्यापि भवन्ति ॥

सूत्रार्थ—विशेषव्याख्या—औपशमिक, क्षायिक, क्षायोपशमिक, औदयिक, तथा पारिणामिक भावोंके और भव्यत्वके भी अभावसे मोक्ष होता है, किन्तु केवल सम्यक्त्व,

केवल ज्ञान, केवल दर्शन, और सिद्धत्वके शिवाय, अर्थात् इनको छोड़कर। क्योंकि ये इसके क्षायिक होते है, और नित्य तो मुक्त जीवके भी ये होते हैं ॥ ४ ॥

तदनन्तरमूर्ध्वं गच्छत्यालोकान्तात् ॥ ५ ॥

भाष्यम्—तदनन्तरमिति कृत्स्नकर्मक्षयानन्तरमौपशमिकाद्यभावानन्तरं चेत्यर्थः। मुक्त ऊर्ध्वं गच्छत्यालोकान्तात् । कर्मक्षये देहवियोगसिध्यमानगतिलोकान्तप्राप्तयोऽस्य युगपदेकसमयेन भवन्ति । तद्यथा। प्रयोगपरिणामादिसमुत्थस्य गतिकर्मण उत्पत्तिकार्यारम्भविनाशा युगपदेकसमयेन भवन्ति तद्वत् ॥

उन सब कर्मोंके क्षयके अनन्तर, और औपशमिक आदि भावोंके नाशके अनन्तर यह मुक्त जीव लोकान्तपर्यन्त ऊर्ध्व गमन करता है। क्योंकि कर्मोंके क्षयके पश्चात् देहवियोग, सिध्यमान गति और लोकान्तप्राप्ति ये सब इस मुक्त जीवको एकही कालमें होती है। जैसे किसी प्रयोगके परिणामसे उत्पन्न जो गति कर्म है उसकी उत्पत्ति, कार्यारम्भ तथा विनाश एक साथही एक समयमेंही होते है, ऐसेही मुक्त जीवके भी देहवियोग सिध्यमान गति आदि भी एक साथही होती है ॥ ५ ॥

अत्राह। प्रहीणकर्मणो निरास्रवस्य कथ गतिर्भवतीति । अत्रोच्यते

अब यहांपर कहते हैं कि जिसके सपूर्ण कर्म क्षीण हो गये है ऐसे, प्राण व (कर्मोंके आगमनद्वार) से रहित मुक्त जीवकी ऊर्ध्व गति कैसे होती है ? इस शङ्काके उत्तरमे आगेका सूत्र कहते है –

पूर्वप्रयोगादसङ्गत्वाद्बन्धच्छेदात्तथागतिपरिणामाच्च तद्गतिः ॥ ६ ॥

भाष्यम्—पूर्वप्रयोगात् । यथा हस्तदण्डचक्रसयुक्तसंयोगात्पुरुषप्रयत्नतश्चाविद्ध कुलालचक्रमुपरतेऽपि पुरुषप्रयत्नहस्तदण्डचक्रसंयोगेषु पूर्वप्रयोगाद्भ्रमत्येवासंस्कारपरिक्षयात् एवं यः पूर्वमस्य कर्मणा प्रयोगो जनित स क्षीणेऽपि कर्मणि गतिहेतुर्भवति । तत्कृता गति. ॥ किं चान्यत् ॥

सूत्रार्थ–वि०व्या०–'पूर्वप्रयोगात्' जैसे हस्त (हाथ), दण्ड, और चक्र (कुंभारके बर्तन बनानेकी चाक) इन तीनोंके मिलित सयोगमे और पुरुषके प्रयत्न अर्थात् पुरुषके व्यापारसे व्याप्त (पूर्ण वा युक्त) जो कुंभारका चक्र (चाक) है पुरुषके व्यापारके निवृत्त होनेपर भी पुरुषके व्यापार, हाथ, दण्ड, तथा चक्रके सयोगमें प्रथमके व्यापारसे वह चक्र भ्रमण करता ही रहता है; जब तक कि उसमे पुरुषके प्रथम प्रयोग (व्यापार) का संस्कार है, तब तक वह बन्द नही होता, ऐसेही जो इस जीवके कर्मोंका प्रयोग अर्थात् व्यापार वा प्रयत्न उत्पन्न हुआ है वह कर्मके क्षीण होनेपर भी गतिका निमित्त होता है, इसीसे अर्थात् कर्मोंके पूर्व उत्पन्न प्रयोगसे इस मुक्त जीवकी ऊर्ध्व गति होती है ॥ और इसके अतिरिक्त (शिवाय) अन्य हेतु भी है –

असङ्गत्वात् । पुद्गलानां जीवानां च गतिमत्त्वमुक्तं नान्येषां द्रव्याणाम् । तत्राधोगौरवधर्माणः पुद्गला ऊर्ध्वगौरवधर्माणो जीवाः । एष स्वभावः । अतोऽन्यासङ्गादिजनिता गतिर्भवति । यथा सत्स्वपि प्रयोगादिषु गतिकारणेषु जातिनियमेनाधस्तिर्यगूर्ध्वं च स्वाभाविक्यो लोष्टवाय्वग्नीनां गतयो दृष्टा तथा सङ्गविनिर्मुक्तस्योर्ध्वगौरवादूर्ध्वमेव सिध्यमानगतिर्भवति । संसारिणस्तु ॥ कर्मसङ्गादधस्तिर्यगूर्ध्वं च ॥ किं चान्यत् ।

असङ्गत्वात्:—असङ्ग होनेसे भी मुक्त जीवकी ऊर्ध्व गति होती है। जैसे पुद्गलोंको तथा जीवोंको गतिमत्त्व अर्थात् गतिवाले कहा है, न कि अन्य द्रव्योंको। उन दोनों द्रव्योंमे भी अधोभागमे गौरव धर्म धारण करनेवाले पुद्गल द्रव्य होते है, और ऊर्ध्व भागमे गौरव धर्म धारण करनेवाले जीव द्रव्य होते है। यह इन द्रव्योका स्वभाव है। इससे अन्य अर्थात् विपरीत गति जैसे जीवोंकी अधोभागादिमे तथा पुद्गलोकी ऊर्ध्वादि भागमे गति सङ्ग आदि निमित्तसे उत्पन्न होती है। जैसे गतिके कारण भूत प्रयोग पुरुषप्रयत्न, अथवा व्यापार आदिके विद्यमान रहते भी पाषाण, वायु, तथा अग्निकी स्वाभाविक गति, क्रमश अधोभाग, तिर्यग् भाग, तथा ऊर्ध्व भागमेही दृष्ट है, अर्थात् पाषाणकी स्वाभाविक गति अधोभागमे, वायुकी तिर्यक् (तिरछे) भागमे और अग्निकी ऊर्ध्व भागमे गतिका दृष्ट है। ऐसेही सङ्गसे विनिर्मुक्त जीवकी भी ऊर्ध्व भागमे गौरव धर्म धारण करनेसे ऊपरकी ही ओर स्वाभाविक सिद्ध्यमान गति होती है। और ससारी जीवकी तो कर्मोके सङ्गमे अधोभाग, तिर्यग्भाग तथा ऊर्ध्व भागमे भी गति होती है। तथा इसके अतिरिक्त ऊर्ध्वगतिमे अन्य भी हेतु है—

बन्धच्छेदात् । यथा रज्जुबन्धच्छेदात्पेडाया बीजकोशबन्धनच्छेदाच्चैरण्डबीजानां गतिर्दृष्टा तथा कर्मबन्धनच्छेदात्सिध्यमानगतिः ॥ किं चान्यत् ।

बन्धच्छेदात्—बन्धके छेदसे मुक्त जीवकी ऊर्ध्व गति होती है। जैसे रज्जुके बन्धनके उच्छेदसे पेडाकी, तथा बीजकोश (जिस गुच्छ रूप कोशमे बीजबन्ध रहते है उस एरण्डफल) रूप बन्धके उच्छेद होनेपर अर्थात् कोशरूप बन्धनके टूटनेपर एरण्ड (अंडी वा रेंडी) के बीजोकी गति स्वाभाविक दृष्ट है, ऐसेही कर्मरूप बन्धनके छेद (नाश) होनेपर मुक्त जीवकी भी स्वाभाविक सिद्ध्यमान ऊर्ध्व गति होती है। और इसके शिवाय अन्य भी ऊर्ध्व गतिमे हेतु है—।

तथागतिपरिणामाच्च । ऊर्ध्वगौरवात्पूर्वप्रयोगादिभ्यश्च हेतुभ्यः तथास्य गतिपरिणाम उत्पद्यते येन सिध्यमानगतिर्भवति । ऊर्ध्वमेव भवति नाधस्तिर्यग्वा गौरवप्रयोगपरिणामासङ्गयोगाभावात् । तद्यथा । गुणवद्भूमिभागारोपितमृतुकालजातं बीजोद्भेदादङ्कुरप्रवालपर्णपुष्पफलकालेष्वविमानितसेकदौहृदादिपोषणकर्मपरिणतं कालच्छिन्नं शुष्कमलाब्वप्सु न निमज्जति तदेव गुरुकृष्णमृत्तिकालेपैर्घनैर्बहुभिरालिप्तं घनमृत्तिकालेपवेष्टनजनितागन्तुकगौरवमप्सु प्रक्षिप्तं तज्जलप्रतिष्ठं भवति यदा त्वस्याद्भिः क्लिन्नो मृत्तिकालेपो व्यपगतो भवति तदा

मृत्तिकालेपसङ्गविनिर्मुक्तं मोक्षानन्तरमेवोर्ध्वं गच्छति आसलिलोर्ध्वतलात् एवमूर्ध्वगौरवगतिधर्मा जीवोऽप्यष्टकर्ममृत्तिकालेपवेष्टितः तत्सङ्गात्संसारमहार्णवे भवसलिले निमग्नो भवासक्तोऽधस्तिर्यगूर्ध्वं च गच्छति सम्यग्दर्शनादिसलिलक्लेदात्प्रहीणाष्टविधकर्ममृत्तिकालेप ऊर्ध्वगौरवादूर्ध्वमेव गच्छत्यालोकान्तात् ॥

तथागतिपरिणामाच्च—उसी प्रकार गति परिणाम होनेसे भी मुक्त जीवकी ऊर्ध्व गति होती है। जैसे, ऊर्ध्वभागमे गौरव (गुरुता) धर्मके धारण करनेसे, और मुक्तिकालमें पूर्वप्रयोग अर्थात् प्रयत्न व्यापार आदि हेतुओंसे इस जीवका वैसाही गति परिणाम दृष्ट होता है जिससे कि इसकी सिद्ध्यमान गति होती है, और वह सिद्ध्यमान गति ऊर्ध्व देशमें ही होती है नकि अधोभाग, और न तिर्यक् भागमे; क्योंकि अधोदेश, अथवा तिर्य्यक् देशमे गति होनेमें गौरव, प्रयोग (व्यापार वा प्रयत्न) परिणाम तथा सङ्गयोगका अभाव है॥ जैसे कि गुणयुक्त अर्थात् उत्तम भूमिमे बोया हो, ऋतुकाल (निज समय) मे उत्पन्न हो, बीजके उद्भेद (बीजमे अँखुआ निकलेनेके समय) से अङ्कुर, पल्लव, पत्र, पुष्प तथा फल काल पर्यंत आदर पूर्वक सिचन आदि पालन पोषण आदि कर्मोंसे परिणामको प्राप्त (अच्छी तरहसे परिपक्व)तथा निजसमयपर तोडा हुआ जो शुष्क (सूखा) अलाबू अर्थात् लौआ वा तितलौकी (तुंबेका) फल जलमे कदापि नही डूबता। और वही अलाबू (तुंबेका फल) यदि गुरुतर (भारी) काली मृत्तिकाके लेपोंसे, वा अन्य घनीभूत गुरुतर पदार्थोंके लेपोसे लिप्त घनीभूत मृत्तिकाके लेपरूप वेष्टनप्राप्त नैमित्तिक गुरुता (भारीपन) महित हो तो जलमे प्रक्षिप्त होनेपर अर्थात् जलमे छोड़नेपर डूब जाता है। और जो कुछ काल पर्यत जलमे भीगता रहै तो उसके द्वारा इस (फल) की मृत्तिकाका लेप दूर हो जाता है, तब मृत्तिकाके लेपसे विनिर्मुक्त होकर मोक्षके अनन्तरही पुन ऊर्ध्व देशमे जलके ऊपर भाग पर्यंत, अर्थात् जलके ऊपरके भागतक ऊपरही जाता है। ऐसेही ऊर्ध्व भागमे स्वभावसिद्ध गौरवधर्मधारी जीव भी अष्टविध कर्म स्वरूप मृत्तिकाके लेपनरूप वेष्टनवेष्टित होनेसे उन कर्मोंके सङ्गसे समाररूपी समुद्रमे डूबता है, और इसमे आसक्त होनेमे अनेक जन्मोंमे अधोभाग, तिर्यग् भाग, तथा ऊर्ध्व भागमे भी गमन करता है, परन्तु जब सम्यग्दर्शन आदि जलमे भली भांति आक्लिन्न अर्थात् भीगनेसे अष्टविध कर्मरूप मृत्तिकालेप इसका सर्वथा नष्ट हो जाता है तब ऊर्ध्वगमन गौरव धर्म धारण करनेसे लोकान्तपर्यंत ऊपरकोही जाता है॥

स्यादेतत् लोकान्तादप्यूर्ध्वं मुक्तस्य गतिः किमर्थं न भवतीति। अत्रोच्यते। धर्मास्तिकायाभावात्। धर्मास्तिकायो हि जीवपुद्गलानां गत्युपग्रहेणोपकुरुते। स तत्र नास्ति। तस्माद्गत्युपग्रहकारणाभावात्परतो गतिर्न भवत्यप्सु अलाबुवत्। नाधो न तिर्यगित्युक्तम्। तत्रैवानुश्रेणिगतिर्लोकान्तेऽवतिष्ठते मुक्तो निःक्रियः इति॥

अब कहते है कि ऊर्ध्व गतिके विषयमे तो जो रहा वह उसी प्रकार रहै, अर्थात् उसको स्वीकार करनेमें कोई बाधा नही है; परन्तु लोकान्तके ऊपर भी मुक्त जीवकी गति क्यों नहीं होती ? (क्योंकि ऊर्ध्व गति स्वभाव होनेसे सर्वथा चलाही जाना चाहिये) अब इस विषयमें कहते हैं कि लोकान्तसे ऊपर धर्मास्तिकाय पदार्थका अभाव है, क्योंकि धर्मास्तिकाय जीव और पुद्गलोकी गतिमें उपकार करता है, अर्थात् दोनोंकी गतिमें सहकारी कारण है। वह धर्मास्तिक[illegible] [illegible]हां (लोकान्त वा लोकाकाशके ऊपर) नही है इससे गतिमे उपग्रह (सहकारी कारण) कारणके अभावमे लोकान्तमे वह जीवकी गति ऐसे नहीं होती जैसे जलमे ऊर्ध्व तलसे परे अलाबू (तितलौकी वा तुबेके फल) की गति न अधोभागमे हो न तिर्यग् भागमें, यह सब विषय पूर्वप्रसङ्गमे कह चुके हैं; किन्तु उसी लोकान्तमें यह मुक्त जीव अनुश्रेणि गतिसे निःक्रिय (कर्मरहित) होकर स्थित रहता है ॥ ६ ॥

क्षेत्रकालगतिलिङ्गतीर्थचारित्रप्रत्येकबुद्धबोधितज्ञानावगाहनान्तरसंख्याल्पबहुत्वतः साध्याः ॥ ७ ॥

क्षेत्रं कालः गतिः लिङ्गं तीर्थं चारित्रं प्रत्येकबुद्धबोधितः ज्ञानमवगाहना अन्तरं संख्या अल्पबहुत्वमित्येतानि द्वादशानुयोगद्वाराणि सिद्धस्य भवन्ति । एभिः सिद्धः साध्योऽनुगम्यश्चिन्त्यो व्याख्येय इत्येकार्थत्वम् । तत्र पूर्वभावप्रज्ञापनीयः प्रत्युत्पन्नभावप्रज्ञापनीयश्च द्वौ नयौ भवतः । तत्कृतोऽनुयोगविशेषः । तद्यथा ।

सूत्रार्थ–वि०व्या०–क्षेत्र १ काल २ गति ३ लिङ्ग ४ तीर्थ ५ चारित्र ६ प्रत्येकबुद्धबोधित ७ ज्ञान ८ अवगाहना ९ अन्तर १० सख्या ११ तथा अल्प बहुत्व ये द्वादश १२ सिद्धके अनुयोग द्वार (व्याख्याके द्वार) होते है । इन बारह अनुयोग द्वारोंसे सिद्ध साध्य (साधने योग्य), अनुगम्य (जानने योग्य), चिन्त्य (विचारके योग्य) तथा व्याख्येय (व्याख्या करने योग्य) होता है यह सब एकार्थवाचक शब्द है । उसमे पूर्व भाव प्रज्ञापनीय (पूर्व कालके भाव जताने योग्य) तथा प्रत्युत्पन्नभावप्रज्ञापनीय (वर्तमान समयमे उत्पन्न भाव जताने योग्य) ये दो नय होते है । उन दोनो नयोंसे किया हुआ अनुयोग विशेष होता है । जैसे.–

क्षेत्रम् । कस्मिन् क्षेत्रे सिद्ध्यतीति । प्रत्युत्पन्नभावप्रज्ञापनीयं प्रति सिद्धिक्षेत्रे सिद्ध्यति । पूर्वभावप्रज्ञापनीयस्य जन्म प्रतिपञ्चदशसु कर्मभूमिषु जातः सिद्ध्यति । सहरणं प्रति मानुषक्षेत्रे सिद्ध्यति । तत्र प्रमत्तसंयता संयतासंयताश्च संह्रियन्ते । श्रमण्यपगतवेद परिहारविशुद्धिसंयतः पुलाकोऽप्रमत्तश्चतुर्दशपूर्वी आहारकशरीरीति न संह्रियन्ते । ऋजुसूत्रनय. शब्दादयश्च त्रयः प्रत्युत्पन्नभावप्रज्ञापनीयाः शेषा नया उभयभावं प्रज्ञापयन्तीति ॥

क्षेत्र (के विषयमें) । किस क्षेत्रमे सिद्ध होता है यह; प्रत्युत्पन्नभावज्ञापनीय नयके प्रति

है कि सिद्ध क्षेत्रमें सिद्ध होता है, अर्थात् सिद्ध क्षेत्रमे यह जीव सिद्ध अवस्थाको प्राप्त होता है। और पूर्वभाव ज्ञापनीय नयका (विषय) जन्मके प्रति जैसे पञ्चदश कर्मभूमियोंमे उत्पन्न सिद्धताको प्राप्त होता है। संहरणके प्रति जैसे मानुष क्षेत्रमे सिद्ध होता है। उसमें प्रयत्नसंपन्न तथा संयतासंयत समाहृय होते हैं। श्रमणी, अपगतवेद (वेदरहित), परिहारविशुद्धिसंयत, पुलाक, अप्रमत्त, चतुर्दशपूर्वी तथा आहारक शरीरवाले नहीं समाहृत होते। ऋजुसूत्रनय और शब्द आदि (शब्द, समभिरूढ, और एवभूत) तीन नय प्रत्युत्पन्नभावज्ञापनीय है। और शेष नय अर्थात् नैगम, संग्रह और व्यवहार नय उभय भाव अर्थात् पूर्व भाव और प्रत्युपन्न भावको भी ज्ञापन (बोधन) करते है।

कालः। अत्रापि नयद्वयम्। कस्मिन्काले सिद्ध्यतीति। प्रत्युत्पन्नभावप्रज्ञापनीयस्य अकाले सिद्ध्यति। पूर्वभावप्रज्ञापनीयस्य जन्मतः सहरणतश्च। जन्मतोऽवसर्पिण्यामुत्सर्पिण्यामनवसर्पिण्युत्सर्पिण्यां च जात सिद्ध्यति। एवं तावदविशेषत। विशेषतोऽप्यवसर्पिण्यां सुषमदुःषमायां संख्येयेषु सर्वेषु शेषेषु जातः सिद्ध्यति। दु षमसुषमायां सर्वस्यां सिध्यति दुःषमसुषमायां जातो दुःषमाया सिध्यति न तु दुःषमायां जातः सिध्यति अन्यत्र नैव सिध्यति। संहरणं प्रति सर्वकालेष्ववसर्पिण्यामुत्सर्पिण्यामनवसर्पिण्युत्सर्पिण्या च सिध्यति॥

काल (के विषयमे) इस विषयमें भी दो नय है। किस काल अर्थात् किस समयमे सिद्ध होता है। प्रत्युत्पन्नभावज्ञापनीय नयके विषयमे अकालमें सिद्ध होता है। और पूर्वभावज्ञापनीय नयके बलसे जन्मसे तथा सहरणसे भी (सिद्ध होता है) जन्मसे अवसर्पिणी, उत्सर्पिणी, तथा अनवसर्पिणी कालमें उत्पन्न जीव सिद्ध होता है। इस रीतिसे अविशेष रूपसे (सिद्धताका वर्णन हुआ) और विशेषरूपसे अवसर्पिणीमे सुषम दुःषमा कालमे शेष सङ्खेय वर्षोंमे उत्पन्न हुआ जीव सिद्ध होता है, और दुःषमसुषमामे सब कालमे सिद्ध होता है, तथा दु.षमसुषमामे उत्पन्न प्राणी दु.षमामे सिद्ध होता है, न कि दुःषमामें उत्पन्न सिद्ध होता है; इसके अतिरिक्त अन्य कालमे नहीं सिद्ध होता, और संहरणके प्रति सब कालमें अर्थात् अवसर्पिणी, उत्सर्पिणी तथा अनवसर्पिणीमे भी सिद्ध होता है॥

गतिः। प्रत्युत्पन्नभावप्रज्ञापनीयस्य सिद्धिगत्यां सिध्यति। शेषास्तु नया द्विविधा अनन्तरपश्चात्कृतगतिकश्च एकान्तरपश्चात्कृतगतिकश्च। अनन्तरपश्चात्कृतगतिकस्य मनुष्यगत्या सिध्यति। एकान्तरपश्चात्कृतगतिकस्याविशेषेण सर्वगतिभ्यः सिध्यति॥

गति (के विषयमें)। प्रत्युत्पन्नभावज्ञापनीय नयके अनुसार सिद्धिगतिमे सिद्ध होता है। और शेष नय दो प्रकारके है, अनन्तर तथा पश्चात् जिसने गति क्रिया है वह, और एक अन्तर करके जिसने गति किया है वह। अनन्तरपश्चात्कृतगतिक मनुष्यगतिमे सिद्ध होता है। और एकान्तरपश्चात्कृतगतिककी गतिमे तो अविशेष रूपसे सब गतिमे सिद्ध होता है॥

लिङ्गं स्त्रीपुंनपुंसकानि । प्रत्युत्पन्नभावप्रज्ञापनीयस्यावेदः सिध्यति । पूर्वभावप्रज्ञापनीयस्यानन्तरपश्चात्कृतगतिकस्य परम्परपश्चात्कृतगतिकस्य च त्रिभ्यो लिङ्गेभ्यः सिध्यति ।

लिङ्ग स्त्री, पुरुष, तथा नपुंसक इन भेदोंसे तीन प्रकारके है । प्रत्युत्पन्नभावज्ञापनीय नयके अनुसार अवेद अर्थात् स्त्रीवेद पुंवेद तथा नपुंसक वेद, इन तीनों वेदोंसे रहित सिद्ध होता है। और पूर्वभावज्ञापनीयके अनुसार अनन्तरपश्चात्कृतगतिककी और परम्परपश्चात्कृतगतिककी गतिमें तीनो लिङ्गोंसे सिद्ध होता है ॥

तीर्थम् । सन्ति तीर्थकरसिद्धाः तीर्थकरतीर्थे नोतीर्थकरसिद्धाः तीर्थकरतीर्थेऽतीर्थकरसिद्धाः तीर्थकरतीर्थे । एवं तीर्थकरीतीर्थे सिद्धा अपि ॥

तीर्थ (के विषयमे)। तीर्थंकर सिद्ध तीर्थंकरतीर्थमे है, नोतीर्थ (ईषत्तीर्थकर) सिद्ध तीर्थंकरतीर्थमें होते है, अतीर्थंकर सिद्ध तीर्थंकरतीर्थमे होते है । और इसी रीतिसे तीर्थंकरीतीर्थमें भी सिद्ध होते है ।

लिङ्गे पुनरन्यो विकल्प उच्यते। द्रव्यलिङ्गभावलिङ्गमलिङ्गमिति प्रत्युत्पन्नभावप्रज्ञापनीयस्यालिङ्गः सिध्यति । पूर्वभावप्रज्ञापनीयस्य भावलिङ्ग प्रति स्वलिङ्गे सिध्यति । द्रव्यलिङ्गं त्रिविधं स्वलिङ्गमन्यलिङ्गं गृहिलिङ्गमिति तत्प्रतिभाज्यम् । सर्वस्तु भावलिङ्गं प्राप्तः सिध्यति ॥

अब लिङ्गके विषयमे पुनः दूसरा यह विकल्प कहते है । जैसे द्रव्यलिङ्ग, भावलिङ्ग और अलिङ्ग, इनमे प्रत्युत्पन्न ज्ञापनीय नयके अनुसार तो अलिङ्ग (लिङ्गरहित) सिद्धताको प्राप्त होता है । और पूर्वभावज्ञापनीय नयके अनुसार भावलिङ्गके प्रति निजलिङ्गमें सिद्ध होता है। द्रव्यलिङ्गके तीन भेद है, जैसे निजलिङ्ग अर्थात् अपना लिङ्ग, अन्यलिङ्ग (अलोकालिङ्ग) और गृहिलिङ्ग, उसका प्रति भाग करना चाहिये । और भावलिङ्गमे प्राप्त तो सबही सिद्धताको प्राप्त होता है ।

चारित्रम् । प्रत्युत्पन्नभावप्रज्ञापनीयस्य नोचारित्री नोऽचारित्री सिध्यति । पूर्वभावप्रज्ञापनीयो द्विविधः अनन्तरपश्चात्कृतिकश्च परम्परपश्चात्कृतिकश्च । अनन्तरपश्चात्कृतिकस्य यथाख्यातसंयत. सिध्यति । परम्परपश्चात्कृतिकस्य व्यञ्जितेऽव्यञ्जिते च । अव्यञ्जिते त्रिचारित्रपश्चात्कृतश्चतुश्चारित्रपश्चात्कृत· पञ्चचारित्रपश्चात्कृतश्च । व्यञ्जिते सामायिकसूक्ष्मसांपरायिकयथाख्यातपश्चात्कृतसिद्धा. छेदोपस्थाप्यसूक्ष्मसम्परायथाख्यातपश्चात्कृतसिद्धाः सामायिकच्छेदोपस्थाप्यसूक्ष्मसम्परायथाख्यातपश्चात्कृतसिद्धाः छेदोपस्थाप्यपरिहारविशुद्धिसूक्ष्मसम्परायथाख्यातपश्चात्कृतसिद्धाः सामायिकच्छेदोपस्थाप्यपरिहारविशुद्धिसूक्ष्मसम्परायथाख्यातपश्चात्कृतसिद्धा· ॥

चारित्र (के विषयमे) । प्रत्युत्पन्न भाव ज्ञापनीयके अनुसार नोचारित्र तथा नोअचारित्र सिद्ध होते है । और पूर्व भाव ज्ञापनीय दो प्रकारका है, एक तो अनन्तरपश्चात्कृतिक और दूसरा परम्परपश्चात्कृतिक । उसमे अनन्तरपश्चात्कृतिकके अनुरोधसे यथा-

ख्यातसंयत (यथाख्यातसंयम चारित्रवाला) सिद्ध होता है । परम्परपश्चात्कृतिकके व्यञ्जित तथा अव्यञ्जित ये दो भेद होते है। उसमें अव्यञ्जितमें त्रिचारित्रपश्चात्कृत, चतुश्चारित्रपश्चात्कृत तथा पञ्चचारित्रपश्चात्कृत होते है । और व्यञ्जितमें सामायिक सूक्ष्म सांपरायिक तथा यथाख्यातपश्चात्कृत सिद्ध होते है, तथा छेदोपस्थाप्य सूक्ष्म सम्पराय तथा यथाख्यातपश्चात्कृत सिद्ध, सामायिक छेदोपस्थाप्य सूक्ष्म सम्पराय तथा यथाख्यात पश्चात्कृत सिद्ध, ऐसेही छेदोपस्थाप्य परिहारविशुद्धि सूक्ष्म सम्पराय तथा यथाख्यात पश्चात्कृत सिद्ध, और इसी रीतिसे सामायिक, छेदोपस्थाप्य, परिहारविशुद्धि, सूक्ष्मसम्पराय तथा यथाख्यात पश्चात्कृत सिद्ध होते है । (इस प्रकार क्रमसे त्रिचारित्रपश्चात्कृत, चतुश्चारित्रपश्चात्कृत तथा पञ्चचारित्रपश्चात्कृत व्यञ्जित भेदमे दर्शाये गये ।)

प्रत्येकबुद्धबोधित. । अस्य व्याख्याविकल्पश्चतुर्विधः । तद्यथा । अस्ति स्वयंबुद्धसिद्धः । स द्विविधः अर्हंश्च तीर्थकरः प्रत्येकबुद्धसिद्धश्च । बुद्धबोधितसिद्धाः त्रिचतुर्थो विकल्पः परबोधकसिद्धा· स्वेष्टकारिसिद्धा· ॥

प्रत्येक-बुद्ध बोधित (के विषयमे) । इसका अर्थात् प्रत्येक-बुद्ध-बोधितकी व्याख्याका विकल्प (भेद) चार प्रकारका है । जैसे स्वयंसिद्ध बुद्ध प्रसिद्ध प्रथम भेद है । उसके (अर्थात् स्वयंबुद्ध सिद्धके) दो भेद है, एक तो अर्हन् तीर्थकर भगवान् और द्वितीय प्रत्येकबुद्धसिद्ध) द्वितीय बुद्धबोधितसिद्ध (बुद्धसे बोधन किये हुए सिद्ध) और तृतीय तथा चतुर्थ भेद परबोधकसिद्ध (दूसरोंको बोध करनेवाले सिद्ध) और स्वेष्टकारिसिद्ध, अर्थात् अपना इष्ट सिद्ध करनेवाले सिद्ध ये चार भेद सिद्धोंके है ।

ज्ञानम् । अत्र प्रत्युत्पन्नभावप्रज्ञापनीयस्य केवली सिद्ध्यति । पूर्वभावप्रज्ञापनीयो द्विविधः अनन्तरपश्चात्कृतिकश्च परम्परपश्चात्कृतिकश्च अव्यञ्जिते च व्यञ्जिते च । अव्यञ्जिते द्वाभ्यां ज्ञानाभ्यां सिध्यति । त्रिभिश्चतुर्भिरिति । व्यञ्जिते द्वाभ्यां मतिश्रुताभ्याम् । त्रिभिर्मतिश्रुतावधिभिर्मतिश्रुतमनःपर्यायैर्वा । चतुर्भिर्मतिश्रुतावधिमनःपर्यायैरिति ॥

ज्ञान (के विषयमें) । इस विषयमे प्रत्युत्पन्न भाव ज्ञापनीयके अनुरोधसे केवली (केवलज्ञान–सहित) सिद्ध होता है । और पूर्वभाव–ज्ञापनीय दो प्रकारका है । अनन्तरपश्चात्कृतिक, तथा परम्परपश्चात्कृतिक । इसमे भी अव्यञ्जित तथा व्यञ्जित ये दो भेद समझने । अव्यञ्जितमे तो दो ज्ञानोंसे सिद्ध होता है । तीन और चारसे भी (सिद्ध होता है) । व्यञ्जितमें दो से अर्थात् मतिज्ञान और श्रुतज्ञानसे । तीनसे मति, श्रुत तथा अवधि ज्ञानसे, अथवा मति श्रुत और मन·पर्य्यायसे सिद्ध होता है । और चारसे मति, श्रुत, अवधि, और मन.पर्य्यायसे सिद्ध होता है ।

अवगाहना । कः कस्यां शरीरावगाहनायां वर्तमानः सिध्यति । अवगाहना द्विविधा उत्कृष्टा जघन्या च । उत्कृष्टा पञ्चधनुःशतानि धनुःपृथक्त्वेनाभ्यधिकानि । जघन्या सप्तरत्नयोऽ-

ङ्गुलपृथक्त्वे हीनाः । एतासु शरीरावगाहनासु सिध्यति । पूर्वभावप्रज्ञापनीयस्य प्रत्युत्पन्नभावप्रज्ञापनीयस्य तु एतास्वेव यथास्वं त्रिभागहीनासु सिध्यति ॥

अवगाहना (के विषयमें) । जैन जीव किस अवगाहनामे वर्तमान होके सिद्ध होता है (अर्थात् किस प्रकारके शरीरमें व्याप्त होकर सिद्ध होता है, यह अवगाहनाका आशय है) वह अवगाहना दो प्रकारकी है, एक उत्कृष्टा अवगाहना, अर्थात् उत्तम अवगाहना और दूसरी निकृष्ट अर्थात् नीच वा हीन अवगाहना । उसमें उत्कृष्ट तो धनुःपृथक्त्व अधिक पंचधनुःशत अर्थात् पांच सौ धनुष प्रमाणकी होती है । और जघन्या तो अङ्गुल पृथक्त्व हीन अर्थात् अङ्गुलपृथक्त्वसे (प्रमाणविशेषसे) कम सप्त अरत्निप्रमाण (प्रमाणविशेष) की होती है । सो पूर्वभावज्ञापनीय नयके अनुसार इन पूर्वोक्त शरीर अवगाहनाओंमे, अर्थात् पूर्वकथित प्रमाणसहित शरीरोंमे व्याप्त जीव सिद्ध होता है । और प्रत्युत्पन्नभावज्ञापनीयके अनुसार तो त्रिभागहीन, इन्ही शरीरावगाहनाओंमें यथाक्रम सिद्ध होता है ।

अन्तरम् । सिध्यमानानां किमन्तरम् । अनन्तरं च सिध्यन्ति सान्तरं च सिध्यन्ति । तत्रानन्तरं जघन्येन द्वौ समयौ उत्कृष्टेनाष्टौ समयान् । सान्तरं जघन्येनैकं समयं उत्कृष्टेन षण्मासा इति ॥

अन्तर (के विषयमे) । सिद्ध होनेवालोंका अर्थात् सिद्धता दशाको प्राप्त होनेवाले जीवोका क्या अन्तर (फर्क वा अन्तराल) है यही अन्तरसे तात्पर्य्य है । उसमे ऐसा समझना चाहिये कि अनन्तरदशामे भी सिद्धताको प्राप्त होता है, और सान्तर (अन्तरसहित) दशामे भी सिद्ध होता है । उसमे जघन्य (निकृष्ट) रूपसे दो समय, और उत्कृष्टतासे आठ समय (सूक्ष्म कालके भाग) का ग्रहण होता है । और सान्तर जघन्य (निकृष्ट) रूपसे एक समय और उत्कृष्टतासे षट् मास (छः महीने) ग्रहण करने चाहिये ।

सङ्ख्या । कत्येकसमये सिध्यन्ति । जघन्येनैक उत्कृष्टेनाष्टशतम् ॥

सख्या (के विषयमे) । कितने एक समयमे सिद्ध होते है ? । जघन्यरूपसे तो एकका ग्रहण है, और उत्कृष्टतासे अष्टशत अर्थात् आठसौ (८०८) का ग्रहण है ।

अल्पबहुत्वम् । एषां क्षेत्रादीनामेकादशानामनुयोगद्वाराणामल्पबहुत्वं वाच्यम् । तद्यथा ।

अल्प बहुत्वके (विषयमे) । इन क्षेत्र काल आदि एकादश अर्थात् ग्यारह ११ अनुयोगद्वारोंका अल्प बहुत्व (न्यूनत्व तथा अधिकत्व) कहना चाहिये । वह इस प्रकारसेः—

क्षेत्रसिद्धानां जन्मतः संहरणतश्च कर्मभूमिसिद्धाश्चाकर्मभूमिसिद्धाश्च सर्वस्तोकाः संहरणसिद्धाः जन्मतोऽसङ्ख्येयगुणाः । संहरणं द्विविधम् परकृतं स्वयंकृतं च । परकृतं देवकर्मणा चारणविद्याधरैश्च । स्वयकृतं चारणविद्याधराणामेव । एषां च क्षेत्राणां विभागः कर्मभूमिरकर्मभूमिः समुद्रा द्वीपा ऊर्ध्वमधस्तिर्यगिति लोकत्रयम् । तत्र सर्वस्तोका ऊर्ध्वलोकसिद्धाः

अधोलोकसिद्धाः सङ्ख्येयगुणाः तिर्यग्लोकसिद्धाः सङ्ख्येयगुणाः सर्वस्तोकाः समुद्रसिद्धाः द्वीपसिद्धाः सङ्ख्येयगुणाः । एव तावदव्यञ्जिते व्यञ्जितेऽपि सर्वस्तोका लवणसिद्धाः कालोदसिद्धाः सङ्ख्येयगुणा जम्बूद्वीपसिद्धाः सङ्ख्येयगुणा धातकीखण्डसिद्धाः सङ्ख्येयगुणाः पुष्करार्धसिद्धाः सङ्ख्येयगुणा इति ॥

क्षेत्रसिद्धोंके जन्मसे तथा संहरणसे कर्मभूमिसिद्ध और अकर्मभूमिसिद्ध सर्व स्तोक (व्याप्त करते है) और संहरणसिद्ध जन्मकी अपेक्षासे सङ्ख्येय गुण है । संहरण भी दो प्रकारका है, एक तो परकृत संहरण और दूसरा स्वयंकृत संहरण । उसमें परकृत संहरण देवोंके कर्मसे चारण तथा विद्याधरोंके द्वारा । और स्वयंकृत संहरण चारण तथा विद्याधरोंका ही होता है । इनके क्षेत्रोंका विभाग कर्मभूमि, अकर्मभूमि, द्वीप, समुद्र, ऊर्ध्वभाग, अधोभाग, तथा तिर्य्यक् इस रीतिसे तीनों लोक है । उसमे सर्वस्तोक ऊर्ध्वलोकसिद्ध अधोलोकसिद्ध सङ्ख्येय गुण है, तिर्यग्लोकसिद्ध सङ्ख्येय गुण, और सर्वस्तोक, समुद्रसिद्ध, द्वीपसिद्ध सख्येयगुण है । इस प्रकार अव्यञ्जित (अव्यक्त वा सामान्य) रूपमें विभाग वर्णन हुआ, और व्यञ्जित (व्यक्त स्पष्ट वा विशेष) रूपसे भी सर्वस्तोक, लवणसिद्ध तथा कालोदसिद्ध सङ्ख्येय गुण है । जबूद्वीपसिद्ध सङ्ख्येय गुण, धातकीखण्डसिद्ध संख्येयगुण, तथा पुष्करार्द्धसिद्ध सङ्ख्येय गुण होते है ।

काल इति त्रिविधो विभागो भवति अवसर्पिणी उत्सर्पिणी अनवसर्पिण्युत्सर्पिणीति । अत्र सिद्धानां (व्यञ्जितानां) व्यञ्जिताव्यञ्जितविशेषयुक्तोऽल्पबहुत्वानुगम कर्तव्यः । पूर्वभावप्रज्ञापनीयस्य सर्वस्तोका उत्सर्पिणीसिद्धा अवसर्पिणीसिद्धा विशेषाधिका अनवसर्पिण्युत्सर्पिणीसिद्धाः सङ्ख्येयगुणा इति । प्रत्युत्पन्नभावप्रज्ञापनीयस्याकाले सिध्यति । नास्त्यल्पबहुत्वम् ।

काल इसका तीन प्रकारका विभाग होता है । जैसे अवसर्पिणी, (नीचेकी ओर आनेवाली कालकी गति), उत्सर्पिणी (ऊपरकी ओर चढ़नेवाली कालकी गति) तथा अनवसर्पिणी—उत्सर्पिणी अब इसमे यहापर सिद्धोका व्यञ्जित सिद्धोंका व्यञ्जित तथा अव्यञ्जित विशेषोंकरके सहित अल्प तथा बहुत्वका अनुगम (विशेष प्रमाणसहित अनुभव) करना चाहिये । पूर्वभावज्ञापनीयके अनुसार सर्वस्तोक (व्याप्त) उत्सर्पिणीसिद्ध (उत्सर्पिणी स्वरूप कालमे सिद्ध होनेवाले जीव) अवसर्पिणीसिद्ध (अवसर्पिणी स्व रूप कालमे होनेवाले सिद्ध जीव)विशेष अधिक है, तथा अनवसर्पिणी उत्सर्पिणी सिद्ध सङ्ख्येयगुण है । और प्रत्युत्पन्नज्ञापनीय नयके अनुरोधसे अकालमे सिद्ध होते है । इस नयकी अपेक्षा अल्प बहुत्व नही है ।

गतिः । प्रत्युत्पन्नभावप्रज्ञापनीयस्य सिद्धिगतौ सिध्यति । नास्त्यल्पबहुत्वम् । पूर्वभावप्रज्ञापनीयस्यानन्तरपश्चात्कृतिकस्य मनुष्यगतौ सिध्यति । नास्त्यल्पबहुत्वत् । परम्परपश्चात्कृ-

तिकस्यानन्तरा गतिश्चिन्त्यते । तद्यथा । सर्वस्तोकास्तिर्यग्योन्यनन्तरगतिसिद्धा मनुष्येभ्योऽनन्तरगतिसिद्धाः सङ्ख्येयगुणा नारकेभ्योऽनन्तरगतिसिद्धाः सङ्ख्येयगुणा देवेभ्योऽनन्तरगतिसिद्धाः सङ्ख्येयगुणा इति ॥

गति (के विषयमे) । प्रत्युत्पन्नभावज्ञापनीयके अनुसार सिद्ध गतिमें सिद्ध होता है। इस रीतिसे इस नयकी अपेक्षा अल्प बहुत्व नहीं है । और अनन्तरपश्चात्कृतिकरूप पूर्वभावज्ञापनीयके अनुसार तो मनुष्यगतिमे सिद्ध होता है । इस प्रकार इसमें भी अल्प बहुत्व नही है । और परम्परपश्चात्कृतिककी अनन्तरगतिका विचार करते है । वह इस प्रकारसे है । सर्वस्तोक, तिर्य्यक्योनि अनन्तरगतिसिद्ध होते हैं, अनन्तरगतिसिद्ध मनुष्योंसे सख्येय गुण है तथा नारक जीवोंसे अनन्तरगतिसिद्ध सङ्ख्येय गुण होते है और देवोंसे भी अनन्तरगतिसिद्ध सङ्ख्येय गुण होते है ।

लिङ्गम् । प्रत्युत्पन्नभावप्रज्ञापनीयस्य व्यपगतवेदः सिध्यति । नास्त्यल्पबहुत्वम् । पूर्वभावप्रज्ञापनीयस्य सर्वस्तोका नपुसकलिङ्गसिद्धाः स्त्रीलिङ्गसिद्धाः सङ्ख्येयगुणाः पुल्लिङ्गसिद्धाः सङ्ख्येयगुणा इति ॥

लिङ्ग (के विषयमे अल्प बहुत्व) । प्रत्युत्पन्न ज्ञापनीयके अनुसार अपगतवेद (वेद अर्थात् स्त्रीपुंनपुंसक लिङ्गशून्य) सिद्ध होता है । इसका अल्प बहुत्व नही है । और पूर्वभावज्ञापनीयकी रीतिसे सर्वस्तोक नपुंसकलिङ्गसिद्ध, तथा स्त्रीलिङ्ग सिद्ध सङ्ख्येय गुण होते है । और पुल्लिङ्ग सिद्ध भी सङ्ख्येय गुण है ।

तीर्थम् । सर्वस्तोकाः तीर्थकरसिद्धाः तीर्थकरतीर्थे नोतीर्थकरसिद्धाः सङ्ख्येयगुणा इति । तीर्थकरतीर्थसिद्धा नपुंसकाः सङ्ख्येयगुणाः । तीर्थकरतीर्थसिद्धाः स्त्रियः सङ्ख्येयगुणाः । तीर्थकरतीर्थसिद्धा पुमांसः सङ्ख्येयगुणा इति ॥

तीर्थ (के विषय अल्प बहुत्व) । सर्वस्तोक (सम्बन्धी) तीर्थंकर सिद्ध तीर्थकरतीर्थमे नोतीर्थकर सिद्ध सङ्ख्येय गुण है । तीर्थकरतीर्थसिद्ध नपुमक सङ्ख्येय गुण हैं । तीर्थकरतीर्थसिद्ध स्त्रियां भी सङ्ख्येय गुण है । तथा तीर्थकरसिद्ध पुरुष भी सङ्ख्येय गुण होते है ।

चारित्रम् । अत्रापि नयौ द्वौ प्रत्युत्पन्नभावप्रज्ञापनीयश्च पूर्वभावप्रज्ञापनीयश्च । प्रत्युत्पन्नभावप्रज्ञापनीयस्य नोचारित्री नोअचारित्री सिध्यति । नास्त्यल्पबहुत्वम् । पूर्वभावप्रज्ञापनीयस्य व्यञ्जिते चाव्यञ्जिते च । अव्यञ्जिते सर्वस्तोकाः पञ्चचारित्रसिद्धाश्चतुश्चारित्रसिद्धाः सङ्ख्येयगुणास्त्रिचारित्रसिद्धाः सङ्ख्येयगुणाः । व्यञ्जिते सर्वस्तोकाः सामायिकच्छेदोपस्थाप्यपरिहारविशुद्धिसूक्ष्मसम्परायथाख्यातचारित्रसिद्धाः छेदोपस्थाप्यपरिहारविशुद्धिसूक्ष्मसम्परायथाख्यातचारित्रसिद्धाः सङ्ख्येयगुणाः सामायिकच्छेदोपस्थाप्यसूक्ष्मसम्परायथाख्यातचारित्रसिद्धाः सङ्ख्येयगुणाः सामायिकपरिहारविशुद्धिसूक्ष्मसम्परायथाख्यातसिद्धाः

सङ्ख्येयगुणाः सामायिकसूक्ष्मसम्परायथाख्यातचारित्रसिद्धाः सङ्ख्येयगुणाः। छेदोपस्थाप्य-सूक्ष्मसम्परायथाख्यातचारित्रसिद्धाः सङ्ख्येयगुणाः।

चारित्र (के विषयमे अल्प बहुत्व)। यहां भी दो नय अर्थात् प्रत्युत्पन्नभाव ज्ञापनीय तथा पूर्वभावज्ञापनीय योजित करना (लगाना) चाहिये। प्रत्युत्पन्नभावज्ञापनीय नयके अनुसार नोचारित्र (पुरुष) तथा नो चारित्री (स्त्री) वा नो अचारित्र सिद्ध होते है। इसकी अपेक्षा अल्प बहुत्व नही है। और पूर्वभावज्ञापनीयके अनुसार व्यञ्जित तथा अव्यञ्जितमें भी। उसमें अव्यञ्जितमें सर्वस्तोक पञ्चचारित्र सिद्ध तथा चतुश्चारित्र सिद्ध सङ्ख्येय गुण होते हैं। तथा त्रिचारित्र सिद्ध भी सङ्ख्येय गुण होते है। और व्यञ्जित (व्यक्त) रूपमे सर्वस्तोक (सम्बन्धी) सामायिक, छेदोपस्थाप्य, परिहारविशुद्धि, सूक्ष्मसम्पराय, तथा यथाख्यात एतत्पच चारित्र सिद्ध, तथा छेदोपस्थाप्य, परिहारविशुद्धि, सूक्ष्मसम्पराय तथा यथाख्यात, एतत् चतुश्चारित्र सिद्ध सख्येय गुण होते है। तथा सामायिक, छेदो-पस्थाप्य, सूक्ष्मसम्पराय और यथाख्यात, एतत् स्वरूप चतुश्चारित्र सिद्ध सख्येय गुण होते हैं। तथा सामायिक परिहारविशुद्धि, सूक्ष्मसम्पराय, तथा यथाख्यात एतत्स्वरूप च-तुश्चारित्र सिद्ध सङ्ख्येय गुण होते है। तथा सामायिक, सूक्ष्मसंपराय और यथाख्यात एतत्स्वरूप त्रिचारित्रसिद्ध सङ्ख्येय गुण होते है। अथवा छेदोपस्थाप्य, सूक्ष्मसंपराय तथा यथाख्यात एतत्स्वरूप त्रिचारित्र सिद्ध सङ्ख्येय गुण होते है।

प्रत्येकबुद्धबोधितः। सर्वस्तोकाः प्रत्येकबुद्धसिद्धाः। बुद्धबोधितसिद्धा नपुंसकाः सङ्ख्ये-यगुणाः। बुद्धबोधितसिद्धाः स्त्रियः सङ्ख्येयगुणाः। बुद्धबोधितसिद्धाः पुमांसः सङ्ख्येयगुणा इति।

प्रत्येक बुद्ध बोधित (के विषयमे अल्प बहुत्व)। सर्वस्तोक (सम्बन्धी) प्रत्येकबुद्ध-सिद्ध होते है। और बुद्धबोधित सिद्ध नपुंसक सङ्ख्येय गुण होते है। तथा बुद्धबोधित अर्थात् बुद्ध सिद्धोंसे बोध कराई हुई स्त्री सिद्ध (सिद्धता दशा प्राप्त स्त्रिया) भी सङ्ख्येय गुण होती है। और बुद्धबोधित पुरुष सिद्ध भी सङ्ख्येय गुण होते है।

ज्ञानम्। कः केन ज्ञानेन युक्तः सिध्यति। प्रत्युत्पन्नभावप्रज्ञापनीयस्य सर्वः केवली सिध्यति। नास्त्यल्पबहुत्वम्। पूर्वभावप्रज्ञापनीयस्य सर्वस्तोका द्विज्ञानसिद्धाः चतुर्ज्ञानसिद्धाः सङ्ख्येयगुणाः त्रिज्ञानसिद्धाः सङ्ख्येयगुणाः। एवं तावदव्यञ्जिते व्यञ्जितेऽपि सर्वस्तोका मतिश्रुतज्ञानसिद्धाः मतिश्रुतावधिमनःपर्यायज्ञानसिद्धाः सङ्ख्येयगुणाः मतिश्रुतावधिज्ञान-सिद्धाः सङ्ख्येयगुणाः॥

ज्ञान (के विषयमे अल्प बहुत्वका विचार)। कौन किस ज्ञान युक्त (सहित) सिद्ध होता है। प्रत्युत्पन्न भाव ज्ञापनीय नयके अनुसार सब केवली (केवल ज्ञान युक्त)सिद्धता-को प्राप्त होता है। इसकी अपेक्षासे अल्प बहुत्व भाव नहीं है। और पूर्व भाव ज्ञापनीय-

के अनुसार सर्व लोक द्विज्ञान (दो ज्ञानोंसे युक्त होनेसे) सिद्ध तथा चतुर्ज्ञानसिद्ध संङ्ख्येय गुण होते हैं । ऐसेही त्रिज्ञान (तीन ज्ञानोंसे युक्त होनेसे) सिद्ध सङ्ख्येय गुण होते है । इस प्रकार तो अव्यञ्जित रूपसे अर्थात् अविशेष रूपसे निरूपण हुआ और व्यञ्जित रूपसे भी सर्व लोक मतिज्ञान श्रुतज्ञान सिद्ध, तथा मति, श्रुत, अवधि तथा मनःपर्य्याय ज्ञान सिद्ध सङ्ख्येय गुण होते है । ऐसेही मति, श्रुत, तथा अवधि ज्ञान (एतद्रूप त्रिज्ञान) सिद्ध सङ्ख्येय गुण होते है ।

अवगाहना । सर्वस्तोका जघन्यावगाहनासिद्धाः उत्कृष्टावगाहनासिद्धास्ततोऽसङ्ख्येयगुणाः यवमध्यसिद्धा असङ्ख्येयगुणाः यवमध्योपरिसिद्धा असङ्ख्येयगुणाः यवमध्याधस्तात्सिद्धा विशेषाधिकाः सर्वे विशेषाधिकाः ॥

अवगाहना (के विषयमे अल्प बहुत्वका विचार) । सर्वस्तोक जघन्य अवगाहना सिद्ध होते है । और उत्कृष्ट अवगाहना सिद्ध उनसे असङ्ख्येय गुण होते है । तथा यवमध्य-*सिद्ध असङ्ख्येय गुण होते है, यवमध्योपरि (जवके मध्यके उपरि भाग प्रमाण शरीरको* अवगाहन करनेवाले) सिद्ध भी असङ्ख्येय गुण होते है और यवके मध्य तथा अधोभाग सिद्ध विशेषाधिक (असङ्ख्येय) गुण वा सब विशेष अधिक इस रीतिसे होते है ।

अन्तरम् । सर्वस्तोका अष्टसमयानन्तरसिद्धाः सप्तसमयानन्तरसिद्धाः षट्समयानन्तर-सिद्धा इत्येवं यावद्द्विसमयानन्तरसिद्धा इति सङ्ख्येयगुणाः । एवं तावदन्तरेषु सान्तरेष्वपि सर्वस्तोकाः षण्मासान्तरसिद्धाः एकसमयान्तरसिद्धाः सङ्ख्येयगुणाः यवमध्यान्तरसिद्धाः सङ्ख्येयगुणाः अधस्ताद्यवमध्यान्तरसिद्धा असङ्ख्येयगुणाः उपरियवमध्यान्तरसिद्धा विशेषा-धिकाः सर्वे विशेषाधिकाः ॥

अन्तर (के वियषमें अल्प बहुत्व) । सर्वस्तोक अष्ट समय अनन्तर सिद्ध, सप्त समय अनन्तर सिद्ध, षट् समय अनन्तर सिद्ध इसी प्रकार द्वि (दो) समय पर्य्यन्त अनन्तर-सिद्ध सङ्ख्येय गुण हैं । इस रीतिसे तो अनन्तरोंमे निरूपण हुआ, और सान्तरोंमे भी सर्व-स्तोक षट् मास अन्तर सिद्ध, तथा एक समय अन्तर सिद्ध सङ्ख्येय गुण होते है । तथा यवमध्य अन्तर सिद्ध संख्येय गुण होते हैं, और अधोभाग तथा यव मध्य अन्तर सिद्ध भी सङ्ख्येय गुण होते है । और उपरि भाग तथा यव मध्य अन्तर सिद्ध विशेष अधिक असङ्ख्येय गुण होते है । सब विशेष अधिक इसी प्रकार होते हैं ।

सङ्ख्या । सर्वस्तोका अष्टोत्तरशतसिद्धाः विपरीतक्रमात्सप्तोत्तरशतसिद्धादयो यावत्पञ्चा-शत् इत्यनन्तगुणाः । एकोनपञ्चाशदादयो यावत्पञ्चविंशतिरित्यसङ्ख्येयगुणाः । चतुर्विंश-त्यादयो यावदेक इति सङ्ख्येयगुणाः । विपरीतहानिर्यथा । सर्वस्तोका अनन्तगुणहानिसिद्धा असङ्ख्येयगुणहानिसिद्धा अनन्तगुणाः सङ्ख्येयगुणहानिसिद्धा सङ्ख्येयगुणा इति ॥

सङ्ख्या (के विषयमें अल्प बहुत्व)। सर्वस्तोक (सम्बन्धी) अष्टोत्तर शत अर्थात् आठ अधिक सौ १०८ सिद्ध होते है, और विपरीत क्रमसे सप्त उत्तर शत अर्थात् सात अधिक शत (सौ १००) सिद्ध आदि पञ्चाशत् (पचास) पर्यन्त ये सब अनन्त गुण होते है। और एक ऊन (एक कम) पञ्चाशत् अर्थात् ओनञ्चाससे आदि लेके पञ्चविंशति (पचीस) पर्य्यन्त, ये सब सिद्ध असङ्ख्येय गुण होते है। और चतुर्विंशति (चौबीस २४)से आदि लेके एक सिद्ध पर्य्यन्त सङ्ख्येय गुण होते है। और विपरीत रूपसे हानि, जैसे सर्व लोक अनन्त गुण हानि सिद्ध, असङ्ख्येय गुण हानि सिद्ध अनन्त गुण होते है, तथा सङ्ख्येय गुण हानि सिद्ध सङ्ख्येय गुण होते है।

एवं निसर्गाधिगमयोरन्यतरजं तत्त्वार्थश्रद्धानात्मकं शङ्काद्यतिचारवियुक्तं प्रशमसंवेगनिर्वेदानुकम्पास्तिक्याभिव्यक्तिलक्षणं विशुद्धं सम्यग्दर्शनमवाप्य सम्यग्दर्शनोपलम्भाद्विशुद्धं च ज्ञानमधिगम्य निक्षेपप्रमाणनयनिर्देशसत्सङ्ख्यादिभिरभ्युपायैर्जीवादीनां तत्त्वानां पारिणामिकौदयिकौपशमिकक्षायोपशमिकक्षायिकानां भावानां स्वतत्त्वं विदित्वादिमत्पारिणामिकौदयिकानां च भावानामुत्पत्तिस्थित्यन्यतानुग्रहप्रलयतत्त्वज्ञो विरक्तो निस्तृष्णस्त्रिगुप्तः पञ्चसमितो दशलक्षणधर्मानुष्ठानात्फलदर्शनाच्च निर्वाणप्राप्तियतनयाभिवर्धितश्रद्धासंवेगो भावनाभिर्भावितात्मानुप्रेक्षाभिः स्थिरीकृतात्मानभिष्वङ्गः संवृतत्वान्निरास्रवत्वाद्विरक्तत्वान्निस्तृष्णत्वाच्च व्यपगताभिनवकर्मोपचयः परीषहजयाद्बाह्याभ्यन्तरतपोनुष्ठानादनुभावतश्च सम्यग्दृष्टिविरतादीनां च जिनपर्यन्तानां परिणामाध्यवसायविशुद्धिस्थानान्तराणामसङ्ख्येयगुणोत्कर्षप्राप्त्या पूर्वोपचितकर्म निर्जरयन् सामायिकादीनां च सूक्ष्मसम्परायान्ताना संयमविशुद्धिस्थानानामुत्तरोत्तरोपलम्भात्पुलाकादीना च निर्ग्रन्थानां संयमानुपालनविशुद्धिस्थानविशेषाणामुत्तरोत्तरप्रतिपत्त्या घटमानोऽत्यन्तप्रहीणार्तरौद्रध्यानो धर्मध्यानविजयादवाप्तसमाधिबलः शुक्लध्यानयोश्च पृथक्त्वैकत्ववितर्कयोरन्यतरस्मिन्वर्तमानो नानाविधानृद्धिविशेषान्प्राप्नोति। तद्यथा।

इस पूर्वोक्त रीतिसे निसर्गज तथा अधिगमज, इन दोनोंमेसे अन्यन्तर (किसी एक) प्रशम (अत्यन्त शमता), संवेग (तीव्र–संसार–वासना–राहित्य), निर्वेद (ससारसे ग्लानिपूर्वक वैराग्य), अनुकम्पा (दीन जनादिके विषयमे कृपा आदि), आस्तिक्य (शास्त्र गुरु देव आदिमे आस्तिक्य बुद्धि) इत्यादिकी अभिव्यक्ति (प्रकटता रूप) लक्षणयुक्त, शङ्का आदि अतिचारोंसे शून्य, तथा विशुद्ध तत्त्वार्थश्रद्धान रूप सम्यग्दर्शन प्राप्त करके, और सम्यग्दर्शनकी प्राप्तिसे विशुद्ध ज्ञानको प्राप्त होकर निक्षेप (नामादिनिक्षेप), प्रमाण (प्रत्यक्षादि प्रमाण), नय (नैगम सङ्ग्रह आदि), निर्देश (स्वामित्व) आदि तथा सत् सङ्ख्या आदि उपायोंसे जीव आदि तत्त्वों (जीव अजीव आदि षट्तत्त्वों) के, तथा पारिणामिक, औदयिक, औपशमिक, क्षायौपशमिक, तथा क्षायिक इन सबोंके यथार्थ तत्त्वोंको जानकर, तथा आदिमान् (आदिसहित), पारिणामिक, और औदयिक भावोंकी

उत्पत्ति, स्थिति, अन्यता (रूपान्तर परिणाम) रूप अनुग्रह तथा प्रलय (नाश) के तत्त्वको (यथार्थ स्वरूपको) जाननेवाला, अतएव विरक्त, तृष्णारहित, पञ्चसमिति-युक्त (ईर्ष्या आदि समितिसहित), तथा दशलक्षण धर्मो अर्थात् उत्तम क्षमा मार्दव आदि दशलक्षण धर्मोंके अनुष्ठान और उनके फलके दर्शनसे, निर्वाण (मोक्ष) की प्राप्तिमें वर्तनोंसे पूर्ण रूपसे वृद्धिको प्राप्त श्रद्धा तथा संवेगसहित, भावनाओंसे (मैत्री करुणा आदि भावनाओंसे) भावित आत्मा अर्थात् पूजित आत्मा सहित, द्वादश अनुप्रेक्षाओंसे स्थिर आत्मा संयुक्त, इसीसे सर्वथा सङ्गरहित, तथा संवृत (संवरयुक्त) होनेसे तथा आस्रवरहित होनेसे, विरक्त होनेसे, और तृष्णासे वर्जित होनेसे नूतन (नये) कर्मोंके सञ्चयसे रहित, तथा परीषहोंके जयसे, बाह्य तथा आभ्यन्तर द्वादश प्रकारके तपके अनुष्ठानसे तथा अनुभावोंसे भी सम्यग्दृष्टि, तथा विरत आदिसे लेकर जिनपर्यन्त सिद्धोंके परिणाम, अध्यवसाय और विशुद्धि रूप स्थानान्तरोंके असङ्ख्येय गुण उत्कर्षताकी प्राप्तिसे पूर्वभवके वा पूर्वकालके कर्मोंकी निर्जरा (एकदेशकर्मनाश) करते हुए, तथा सामायिकसे आदि देके सूक्ष्मसम्परायपर्यन्त संयमविशुद्धिके स्थानान्तरोंके उत्तर उत्तर (आगे २) उपलम्भ (प्राप्ति होने)से पुलाकसे आदि लेके निर्ग्रन्थपर्यन्त सिद्धोंके सयमोंके पालनसे विशुद्धियोंके स्थानविशेषोंकी उत्तर २ प्राप्ति वा बोधसे युक्त, आर्त तथा रौद्र ध्यानोंसे सर्वथा रहित, धर्मध्यानके विजयसे प्राप्त समाधिबल, अर्थात् धर्मध्यानकी दृढतासे समाधिबल जिसको प्राप्त है ऐसा, तथा पृथक्त्व वितर्क और एकत्व वितर्क इन दो प्रकारके शुक्ल ध्यानोंमेसे किसी एक ध्यानमे वर्तमान महात्माजन नाना प्रकारकी ऋद्धि विशेषोंको अर्थात् अनेक प्रकारकी सिद्धियोको प्राप्त करता है। वे ऋद्धिया (सिद्धिविशेष) ये है, जैसे —

आमर्शौषधित्वं विप्रुडौषधित्वं सर्वौषधित्वं शापानुग्रहसामर्थ्यजननीमभिव्याहारसिद्धिमीशित्वं वशित्वमवधिज्ञान शारीरविकरणाङ्गप्राप्तितामणिमानं लघिमानं महिमानमणुत्वम्। अणिमा बिसच्छिद्रमपि प्रविश्यासीतां। लघुत्वं नाम लघिमा वायोरपि लघुतरः स्यात्। महत्त्वं महिमा मेरोरपि महत्तर शरीरं विकुर्वीत । प्राप्तिर्भूमिष्ठोऽङ्गुल्यग्रेण मेरुशिखरभास्करादीनपि स्पृशेत्। प्राकाम्यमप्सु भूमाविव गच्छेत् भूमावप्स्विव निमज्जेदुन्मज्जेच्च। जङ्घाचारणत्वं येनाग्निशिखाधूमनीहारावश्यायमेघवारिधारामर्कटतन्तुज्योतिष्करश्मिवायूनामन्यतममप्युपादाय वियति गच्छेत्। वियद्गतिचारणत्वं येन वियति भूमाविव गच्छेत् शकुनिवच्च प्रडीनावडीनगमनानि कुर्यात्। अप्रतिघातित्वं पर्वतमध्येन वियतीव गच्छेत् । अन्तर्धानमदृश्यो भवेत्। कामरूपित्वं नानाश्रयानेकरूपधारणं युगपदपि कुर्यात् तेजोनिसर्गसामर्थ्यमित्येतदादि ॥ इति इन्द्रियेषु मतिज्ञानविशुद्धिविशेषाद्दूरात्स्पर्शनास्वादनघ्राणदर्शनश्रवणानि विषयाणां कुर्यात्। संभिन्नज्ञानत्वं युगपदनेकविषयपरिज्ञानमित्येतदादि ॥ मानसं कोष्ठबुद्धित्वं बीजबुद्धित्वं पदप्रकरणोद्देशाध्यायप्राभृतवस्तुपूर्वाङ्गानुसारित्वमृजुमतित्वं विपुलमतित्वं

परचित्तज्ञानमभिलषितार्थप्राप्तिमनिष्टानवाप्तीत्येतदादि । वाचिकं क्षीरास्रवित्वं मध्वास्रवित्वं वादित्वं सर्वरुतज्ञत्वं सर्वसत्त्वावबोधनमित्येतदादि । तथा विद्याधरत्वमाशीविषत्वं भिन्नाभिन्नाक्षरचतुर्दशपूर्वधरत्वमिति ॥

आमर्श—औषधत्व (विचार मात्रसे औषधादि प्रयोग सामर्थ्य), विषय–औषधत्व (जलबिन्दुमात्रसे व्याधिनाशसामर्थ्य), शाप तथा अनुग्रह (आशीर्वाद)को उत्पन्न करनेवाली वचनकी सिद्धि, ईशित्व (ऐश्वर्यवत्ता), अणिमा लघिमा, महिमा, तथा अणुत्व इत्यादि सिद्धि प्राप्त होती है । इनमे कमलके सूत्रके छिद्रमें भी प्रवेश करके स्थित होसके इस प्रकारका अणिमा (छोटापन) है। लघुत्वको लघिमा कहते हैं, जैसे वायुसे भी लघुतर हो जाय अर्थात् अति हलकापनका सामर्थ्य लघिमा सिद्धि है । महिमा अर्थात् मेरु पर्वतसे भी अधिक बड़ा शरीर करसके, यह महिमा ऋद्धि है। प्राप्ति, पृथिवीपर स्थित होकर अङ्गुलीके अग्रभागसे मेरुके शिखर तथा सूर्य आदिको भी स्पर्श कर (छू) सकै अर्थात् सर्वत्र प्राप्त होनेका सामर्थ्य यह प्राप्ति नामक सिद्धि है । प्राकाम्य–पृथिवीके समान जलमें भी पैरोंसे चल सकना, और जलके समान पृथिवीपर भी जब चाहै तब डूब जाय, और जब चाहै तब उतराने लगजाय, यह सामर्थ्य अर्थात् इच्छा वा कामनाके अनुसार कार्य करनेका सामर्थ्य प्राकाम्य है । जङ्घाचारणत्व–जिसके द्वारा अग्निकी शिखा, धूम, कुहिरा, जलकी धारा, मर्कटी अर्थात् मकरीके सूत (जाला) वा किसी ज्योतिर्मय पदार्थके किरण, तथा वायु, इनमेसे किसीको ग्रहण करके अर्थान् अग्निशिखा धूम आदिमेसे किसीके आधारसे आकाशमे गमन कर सकता है । और आकाशगतिचारणता कि जिससे आकाशमे भूमिके तुल्य गमन करै, और पक्षीके समान ऊपर उड़ना तथा नीचे उतरना आदि विशेष प्रकारके गमन आगमन करे । तथा अप्रतिघातित्व (किसी पदार्थसे प्रतिघात–राहित्य अर्थात् अवरोधका सर्वथा अभाव, जिसके द्वारा पर्वतके मध्यमें भी अवकाशसहित आकाशके सदृश चल सकता है । अन्तर्धानित्व, जिसके द्वारा लोगोंकी दृष्टिसे अदृश्य हो सकता अर्थात् लोप हो (छिप जा) ता है । कामरूपित्व, अर्थात् अपनी इच्छाके अनुसार रूप धारण करनेका सामर्थ्य; जिससे कि एकही कालमे नाना प्रकारके आश्रयसे अनेक रूप यह योगी धारण कर सकता है । तथा तेजोनिसर्गसामर्थ्य, विशेष तेज उत्पन्न करनेकी शक्ति, इत्यादि सिद्धया प्राप्त होती है । तथा इद्रियोंके विषयमे मतिज्ञानकी विशुद्धिकी विशेषता (विलक्षणता वा विचित्रता) से दूरसेही स्पर्शन, आस्वादन, घ्राण (सूंघना), दर्शन (देखना) और श्रवण (सुनना) आदि विषयोंको अनुभव कर सकता है । सभिन्नज्ञानत्व, एक कालमेही पृथक् २ अनेक विषयोंका परिज्ञान प्राप्त करना, इत्यादि । और मानस कोष्ठबुद्धित्व बीजबुद्धित्व तथा पद, प्रकरण, उद्देश, अध्याय, प्राभृत, वस्तु पूर्वाङ्गाऽनुसारिता, ऋजुमतित्व, विपुलमतित्व, परचित्तज्ञान (दूसरेके चित्तके अभिप्राय-

का ज्ञान) अभिलषित अर्थात् अपनेको अभीष्ट पदार्थकी प्राप्ति, तथा-अनिष्टकी अप्राप्ति इत्यादि सामर्थ्यविशेष सिद्धियां प्राप्त होती है। और वाचिक (वाग्जन्य सामर्थ्य) वाणीमें क्षीरस्राविता अर्थात् ऐसा मिष्ट भाषण मानो वचनसे दुग्धप्रवाह झरता है, मधु आस्रावित्व, अर्थात् वचनसे मानो मधुप्रवाह स्रवीभूत (वहता वा झरता) होता है, प्रबल वादियोंसे भी वाद करनेका सामर्थ्यविशेष, सर्वरुतज्ञान अर्थात् सब पशु पक्षी आदिके शब्दोंका ज्ञान। और सब जीवोंका अवबोधन सब जीवमात्रका ज्ञान वा सबको बोधन (ज्ञान प्रदान करने) का सामर्थ्यविशेष, इत्यादि सामर्थ्यविशेष वाचिक सिद्ध होता है। तथा विद्याधरत्व (विद्याधरपदप्राप्तिसामर्थ्य) और भिन्न अभिन्न अक्षर चतुर्दश पदत्व, इत्यादि सिद्धिविशेष उस जीवको प्राप्त होते है।

ततोऽस्य निस्तृष्णत्वात्तेष्वनभिष्वक्तस्य मोहक्षपकपरिणामावस्थस्याष्टाविंशतिविधं मोहनीयं निरवशेषतः प्रहीयते। ततश्छद्मस्थवीतरागत्वं प्राप्तस्यान्तर्मुहूर्तेन ज्ञानावरणदर्शनावरणान्तरायाणि युगपदशेषतः प्रहीयन्ते। ततः संसारबीजबन्धनिर्मुक्तः फलबन्धनमोक्षापेक्षो यथाख्यातसयतो जिन केवली सर्वज्ञ. सर्वदर्शी शुद्धो बुद्ध कृतकृत्यः स्नातको भवति। ततो वेदनीयनामगोत्रायुष्कक्षयात्फलबन्धननिर्मुक्तो निर्दग्धपूर्वोपात्तेन्धनो निरुपादान इवाग्निः पूर्वोपात्तभववियोगाद्धेत्वभावाच्चोत्तरस्याप्रादुर्भावाच्छान्तः संसारसुखमतीत्यात्यन्तिकमैकान्तिक निरुपमं निरतिशयं नित्यं निर्वाणसुखमवाप्नोतीति ॥

और इसके पश्चात् तृष्णाके अभावसे उन पूर्वकथित अणिमा आदि सिद्धियोंमे आसक्तता वा सङ्गरहित. तथा मोहक्षपक (मोहनीय कर्मको नाश करनेवाले) परिणाम भावमे स्थित इस जीवके अट्ठाईस (२८) प्रकारके मोहनीय कर्म सर्वथा नाशको प्राप्त होते है। और इसके अनन्तर छद्मस्थ वीतरागता दशाको प्राप्त इस जीवके अन्तर्मुहूर्त कालमे ही ज्ञानावरणीय दर्शनावरणीय और अन्तराय, ये तीनो कर्मप्रकृतियां एक कालमेही सर्वथा क्षीण (नष्ट) हो जाती है। इसके अनन्तर ससारके बीजरूप बन्धनसे विनिर्मुक्त, फलरूप बन्धनसे मोक्षकी अपेक्षा करनेवाला, यथाख्यात संयममें संयत, अर्थात् यथाख्यात चारित्ररूप संयमसहित जिन केवली(केवलज्ञानसम्पन्न) सर्वज्ञ, सर्वदर्शी (सर्वद्रष्टा), शुद्ध, बुद्ध, कृतकृत्य (जो कुछ करना चाहिये था वह सब कर चुकनेवाला), स्नातक रूप यह जीव होता है। और इसके अनन्तर वेदनीय, नाम, गोत्र, तथा आयुः कर्मके क्षय होनेसे फलबन्धनसे सर्वथा विनिर्मुक्त (छूटा हुआ), पूर्व कालमे ग्रहण हुए इन्धनको भस्म करनेवाला उपादान कारण (सर्वथा इन्धन) शून्य अग्निके समान, तथा पूर्वकालमे ग्रहण किये हुए जन्मोंके वियोगसे तथा हेतु (निमित्त)के अभावसे आगेके जन्मोंके प्रादुर्भाव होनेसे सर्वथा शान्त, और संसारसुखको अतिक्रमण (लंघन) करके आत्यन्तिक (जिसका कभी अन्त न हो ऐसा), ऐकान्तिक (नित्य वा सर्वदा स्थायी)

निरुपम (उपमारहित), निरतिशय (जिससे बढ़के कोई सुख न हो ऐसा), नित्य निर्वाण जो मोक्षरूप सुख है, उस मोक्षको यह जीव प्राप्त होता है ।

एवं तत्त्वपरिज्ञानाद्विरक्तस्यात्मनो भृशम् ।
निरास्रवत्वाच्छिन्नायां नवायां कर्मसन्ततौ ॥ १ ॥
पूर्वार्जितं क्षपयतो यथोक्तैः क्षयहेतुभिः ।
संसारबीजं कार्त्स्न्येन मोहनीयं प्रहीयते ॥ २ ॥
ततोऽन्तरायज्ञानघ्नदर्शनघ्नान्यनन्तरम् ।
प्रहीयन्तेऽस्य युगपत् त्रीणि कर्माण्यशेषतः ॥ ३ ॥
गर्भसूच्यां विनष्टायां यथा तालो विनश्यति ।
तथा कर्मक्षयं याति मोहनीये क्षयं गते ॥ ४ ॥
ततः क्षीणचतुष्कर्मा प्राप्तोऽथाख्यातसंयमम् ।
बीजबन्धननिर्मुक्तः स्नातकः परमेश्वरः ॥ ५ ॥
शेषकर्मफलापेक्षः शुद्धो बुद्धो निरामयः ।
सर्वज्ञः सर्वदर्शी च जिनो भवति केवली ॥ ६ ॥
कृत्स्नकर्मक्षयादूर्ध्वं निर्वाणमधिगच्छति ।
यथा दग्धेन्धनो वह्निर्निरुपादानसन्ततिः ॥ ७ ॥
दग्धे बीजे यथात्यन्तं प्रादुर्भवति नाङ्कुरः ।
कर्मबीजे तथा दग्धे नारोहति भवाङ्कुरः ॥ ८ ॥
तदनन्तरमेवोर्ध्वमालोकान्तात्स गच्छति ।
पूर्वप्रयोगासङ्गत्वबन्धच्छेदोर्ध्वगौरवैः ॥ ९ ॥
कुलालचक्रे दोलायामिषौ चापि यथेष्यते ।
पूर्वप्रयोगात्कर्मेह तथा सिद्धगतिः स्मृता ॥ १० ॥
मृल्लेपसङ्गनिर्मोक्षाद्यथा दृष्टाप्स्वलाबुनः ।
कर्मसङ्गविनिर्मोक्षात्तथा सिद्धगतिः स्मृता ॥ ११ ॥
एरण्डयन्त्रपेडासु बन्धच्छेदाद्यथा गतिः ।
कर्मबन्धनविच्छेदात्सिद्धस्यापि तथेष्यते ॥ १२ ॥
ऊर्ध्वगौरवधर्माणो जीवा इति जिनोत्तमैः ।
अधोगौरवधर्माणः पुद्गला इति चोदितम् ॥ १३ ॥
यथाधस्तिर्यगूर्ध्वं च लोष्टवाय्वग्निवीतयः ।
स्वभावतः प्रवर्तन्ते तथोर्ध्वं गतिरात्मनाम् ॥ १४ ॥
अतस्तु गतिवैकृत्यमेषां यदुपलभ्यते ।
कर्मणः प्रतिघाताच्च प्रयोगाच्च तदिष्यते ॥ १५ ॥
अधस्तिर्यगथोर्ध्वं च जीवानां कर्मजा गतिः ।
ऊर्ध्वमेव तु तद्धर्मा भवति क्षीणकर्मणाम् ॥ १६ ॥

द्रव्यस्य कर्मणो यद्वदुत्पत्त्यारम्भवीतयः ।
समं तथैव सिद्धस्य गतिमोक्षभवक्षयाः ॥ १७ ॥
उत्पत्तिश्च विनाशश्च प्रकाशतमसोरिह ।
युगपद्भवतो यद्वत्तथा निर्वाणकर्मणोः ॥ १८ ॥
तन्वी मनोज्ञा सुरभिः पुण्या परमभास्वरा ।
प्राग्भारा नाम वसुधा लोकमूर्ध्नि व्यवस्थिता ॥ १९ ॥
नृलोकतुल्यविष्कम्भा सितच्छत्रनिभा शुभा ।
ऊर्ध्वं तस्याः क्षितेः सिद्धा लोकान्ते समवस्थिताः ॥ २० ॥
तादात्म्यादुपयुक्तास्ते केवलज्ञानदर्शनैः ।
सम्यक्त्वसिद्धतावस्थाहेत्वभावाच्च निष्क्रियाः ॥ २१ ॥
ततोऽप्यूर्ध्वं गतिस्तेषां कस्मान्नास्तीति चेन्मतिः ।
धर्मास्तिकायस्याभावात्स हि हेतुर्गतेः परः ॥ २२ ॥
संसारविषयातीतं मुक्तानामव्ययं सुखम् ।
अव्याबाधमिति प्रोक्तं परमं परमर्षिभिः ॥ २३ ॥
स्यादेतदशरीरस्य जन्तोर्नष्टाष्टकर्मणः ।
कथं भवति मुक्तस्य सुखमित्यत्र मे शृणु ॥ २४ ॥
लोके चतुर्ष्विहार्थेषु सुखशब्दः प्रयुज्यते ।
विषये वेदनाभावे विपाके मोक्ष एव च ॥ २५ ॥
सुखो वह्निः सुखो वायुर्विषयेष्विह कथ्यते ।
दुःखाभावे च पुरुषः सुखितोऽस्मीति मन्यते ॥ २६ ॥
पुण्यकर्मविपाकाच्च सुखमिष्टेन्द्रियार्थजम् ।
कर्मक्लेशविमोक्षाच्च मोक्षे सुखमनुत्तमम् ॥ २७ ॥
सुखप्रसुप्तवत्केचिदिच्छन्ति परिनिर्वृतिम् ।
तदयुक्तं क्रियावत्त्वात्सुखानुशयतस्तथा ॥ २८ ॥
श्रमक्लमदव्याधिमदनेभ्यश्च सम्भवात् ।
मोहोत्पत्तेर्विपाकाच्च दर्शनघ्नस्य कर्मणः ॥ २९ ॥
लोके तत्सदृशो ह्यर्थः कृत्स्नेऽप्यन्यो न विद्यते ।
उपमीयेत तद्येन तस्मान्निरुपमं सुखम् ॥ ३० ॥
लिङ्गप्रसिद्धेः प्रामाण्यादनुमानोपमानयोः ।
अत्यन्तं चाप्रसिद्धं तद्यत्तेनानुपमं स्मृतम् ॥ ३१ ॥
प्रत्यक्षं तद्भगवतामर्हतां तैश्च भाषितम् ।
गृह्यतेऽस्तीत्यतः प्राज्ञैर्नच्छद्मस्थपरीक्षया ॥ ३२ ॥ इति ॥

इस रीतिसे अर्थात् पूर्वकथित उपायोंसे तत्त्वोंके परिज्ञान अर्थात् पूर्णरूपसे सब जीव आदि तत्त्वोंके ज्ञान होनेसे सर्वथा विरक्तताको प्राप्त इस जीवके आस्रवके अभावसे

नूतन (नये) कर्मके सन्तान (कर्मपरम्परा)के छिन्न होनेपर ॥ १ ॥ और यथो… (शास्त्रकथित) क्षयके निमित्तोंसे पूर्व उपार्जित कर्मोंको भी नाश करते हुए संसारके बीजभूत जो मोहनीय कर्म है वह भी सम्पूर्ण रूपसे नाशको प्राप्त हो जाता है, और इस मोहनीयके क्षीण होनेके पश्चात् ज्ञान प्रदर्शन अर्थात् ज्ञानावरणीय, दर्शनावरणीय तथा अन्तराय ये तीनो कर्म एकही कालमें सम्पूर्ण रूपसे नाशको प्राप्त होते है ॥ ३ ॥ और जिस प्रकार गर्भसूचीके नाश होनेपर तालस्तंभ नष्ट होजाता है, इसी रीतिसे मोहनीय कर्मके क्षय होनेपर (शेष)कर्म स्वयं नष्ट हो जाते है ॥ ४ ॥ और इसके पश्चात्, अर्थात् मोहनीय तथा ज्ञानावरण आदि तीन कर्मोंके नाश होनेके अनन्तर क्षीणचतुष्कर्म्मा, तात्पर्य्य यह जिसके मोहनीय, ज्ञानावरणीय, दर्शनावरणीय, तथा अन्तराय, ये चारो कर्म क्षीण (नष्ट) हो गये है, ऐसा यह जीव कहा जाता वा होता है, और पुनः आख्यात (यथाख्यात) संयममे प्राप्त होकर बीजबन्धनसे विनिर्मुक्त स्नातक तथा परमेश्वररूपही हो जाता है ॥ ५ ॥ और पुन शेषकर्मफलापेक्ष अर्थात् आयु नाम आदि शेष कर्मोंकी अपेक्षासे शुद्ध, बुद्ध, निरामय, सर्वज्ञ, सर्वदर्शी, जिन तथा केवली 'इत्यादि पदवाच्य' होता है ॥ ६ ॥ और सम्पूर्ण कर्मोंके क्षयके पश्चात् आयुः नाम आदि सब कर्मोंके नाशके अनन्तर इस प्रकार निर्वाण (मोक्ष) दशा प्राप्त होती है, जैसे सम्पूर्ण इन्धनोंके भस्म करनेके पश्चात् उपादान सन्तति (उपादानप्रवाह)से रहित शुद्ध देदीप्यमान अग्नि ॥ ७ ॥ जैसे बीजके सर्वथा भस्म होनेके पश्चात् पुन. अङ्कुरका प्रादुर्भाव (उत्पत्तिरूप दर्शन) नही होता है, ऐसेही ससारके बीजभूत कर्मोंके सर्वथा दग्ध (भस्म वा क्षय) होनेपर पुन. यह जन्मा अथवा ससाररूप अङ्कुर नही उपजता (जन्मता वा उत्पन्न होता) है ॥ ८ ॥ पुनः पूर्वकर्मोंके प्रयोगसे, असङ्ग होनेसे, बन्धनसे विनिर्मुक्त होनेसे, तथा ऊर्ध्व गतिमें गौरव धारण करनेसे आलोकान्त (लोकान्त) पर्यन्त यह जीव ऊर्ध्व गमन करता है ॥ ९ ॥ कुंभकारके चक्रमे, दोला (हिडोला वा झूलनेके यत्र)मे तथा बाणमे जैसे पूर्वप्रयोगसे भ्रमण गमन आदि क्रिया होती है, ऐसेही सिद्धोंके भी ऊर्ध्वगतिरूप कर्म पूर्वप्रयोगसे कहा गया है ॥ १० ॥ जैसे मृत्तिका आदिके लेपरूप सङ्गसे विनिर्मुक्त होनेपर अलाबु (तुंबीफल)की जलमे ऊर्ध्व गति दृष्ट (देखीगई) है, ऐसेही कर्मोंके सङ्गसे विनिर्मुक्त (छूटनेपर) होनेसे जीवकी भी ऊर्ध्व गति होती है ॥ ११ ॥ जैसे एरण्डफलके गुच्छके बन्धनसे छूटनेपर एरण्डबीजोंकी ऊर्ध्व गति होती है, ऐसेही कर्मरूपी बन्धनसे विनिर्मुक्त होनेपर सिद्ध जीवकी भी ऊर्ध्व गति होती है ॥ १२ ॥ उत्तम जिन महात्माओंने ऐसा कहा है कि जीव ऊर्ध्वगमनमे गौरव धर्म धारण करते है, और पुद्गल अधोमार्गकी गतिमें गौरवधारी होते हैं ॥ १३ ॥ जैसे पाषाण, वायु, और अग्निकी गति स्वभावसे ही अधोभाग, तिर्य्यक्,

॥ ऊर्ध्वभागमे क्रमसे होती हैं, ऐसेही जीवोंकी स्वभावसिद्ध गति ऊर्ध्व देशमेंही होती है ॥ १४ ॥ और पूर्वकथितके विपरीत (विरुद्ध) जो इन (जीव पुद्गल आदि) की होती है यह कर्मसे, प्रतिघातसे तथा प्रयोगसे इष्ट है ॥ १५ ॥ जीवोंकी कर्मसे अधोभाग, तिर्य्यग्भाग तथा ऊर्ध्व भागमें भी गति होती है किन्तु क्षीणकर्म जीवोंकी अर्थात् जिनके कर्म सर्वथा क्षीण होगये है ऐसे जीवोंकी तो स्वाभाविक गति ऊर्ध्व भागमे ही होती है, क्योंकि जीव स्वभावसे ऊर्ध्वगति धर्मवाला है ॥ १६ ॥ जैसे द्रव्य क्रियाकी उत्पत्ति, आरम्भ, तथा नाश साथ ही होते है, ऐसेही सिद्धकी गति, मोक्ष तथा संसारक्षय साथ ही होते है ॥ १७ ॥ जैसे प्रकाशकी उत्पत्ति और अन्धकारका नाश एक कालमे ही होते है, ऐसेही निर्वाण (मोक्ष)की उत्पत्ति तथा कर्मका नाश एक ही कालमे होते है ॥ १८ ॥ सूक्ष्म, मनोज्ञ (अतिरमणीय), सुगन्धपूर्ण, पवित्र, तथा परमप्रकाशमय, प्राग्भारा नाम पृथिवी इस लोकके शिरपर (लोकाकाशके अन्तमे ऊपर) व्यवस्थित (वर्तमान) है ॥ १९ ॥ मनुष्यलोकके समान उसका व्यास है, और यह पृथिवी श्वेत छत्रके सदृश अति शुभ (परमशुद्ध श्वेतवर्ण) है, उसी पृथिवीके ऊपर लोकान्तमे सिद्धगति स्थित है ॥ २० ॥ तादात्म्यसम्बन्ध अर्थात् अभेद सम्बन्धसे केवल ज्ञान और दर्शनसे उपयुक्त है, तात्पर्य्य यह कि केवल ज्ञान तथा दर्शनरूप उपयोगमय है, तथा सम्यक्त्व सिद्धता अवस्था सहित है, और कारणके अभावसे निष्क्रिय अर्थात् क्रियारहित है ॥ २१ ॥ यदि कदाचित् ऐसी बुद्धि हो अर्थात् उस सिद्धस्थान वा सिद्धशिलाके ऊपर भी ऊर्ध्व गति स्वभावमे सिद्ध जीवोंकी गति क्यो नही होती? यदि ऐसी शङ्का हो तो, इसका उत्तर यह है कि लोकान्तके ऊपर धर्मास्तिकाय नही है, अतः ऊर्ध्वगति नही होती, और धर्मास्तिकाय गतिमे परम हेतु है ॥ २२ ॥ संसारके सम्पूर्ण विषयोंसे पर नाशरहित तथा अव्याबाध (सब प्रकारकी बाधाओंसे रहित) नित्य परम सुख मुक्त जीवोंको होता है, ऐसा परमर्षि महात्माओंने कहा है ॥ २३ ॥ पूर्व प्रसङ्ग रहा, शरीरशून्य तथा अष्ट कर्मों (मोहनीय आदि)के नाशसहित जीवको वह परम सुख (मोक्षसुख) कैसे होता है, यदि ऐसी शङ्का हो तो मुझसे सुनो, अर्थात् इस शङ्काका उत्तर सुनो ॥ २४ ॥ इस लोकमें चार पदार्थोंमें सुख शब्दका प्रयोग (व्यवहार किया जाता है) जैसे विषयमे, वेदना (पीडा)के अभावमें, विपाक (परिणाम)में, तथा मोक्षमें ॥ २५ ॥ अग्नि सुख (सुखदायक) है, तथा वायु (पवन सुख अर्थात् सुखकारक है) इत्यादि रूपसे विषयोंमें सुख शब्दका प्रयोग किया जाता है, ऐसेही दुःखोंके अभावमें भी मैं सुखी स्थित हूं ऐसा पुरुष मानता है ॥ २६ ॥ तथा पुण्यकर्मोंके विपाक (फलभोगके समय)मे इन्द्रिय तथा पदार्थसे उत्पन्न सुख शब्दसे सबको इष्ट कहा जाता है, और कर्मोंके क्लेशोंसे विमुक्त होनेपर मोक्षमें सर्वोत्तम सुख होता है ॥ २७ ॥

इस मोक्षके सुखको कोई तो उत्तम सुषुप्ति (गाढ निद्रा)के तुल्य परमशान्तिरूप चाहते (मानते) है, परन्तु मोक्षसुखको निद्रासदृश मानना अयोग्य है, क्योंकि सुखके सम्बन्धसे वहांपर क्रियावत्ता है ॥ २८ ॥ तथा इसकी अयोग्यता यों भी है कि इस प्रकारके सुखका सम्भव श्रम, खेद, मद, व्याधि तथा मदन (मैथुन)से भी है, और दर्शनको नाश करनेवाले कर्मके विपाक (मोहकी उत्पत्ति)से भी पूर्वोक्त असङ्गति सिद्ध होती है॥२९॥ इस सम्पूर्ण संसारभरमें ऐसा कोई पदार्थ नही है जिसके साथ उसकी उपमा दें, इस हेतुसे वह मोक्षसुख निरुपम अर्थात् उपमाशून्य (सर्वोत्तम) है ॥ ३० ॥ अनुमान तथा उपमानका प्रामाण्य लिङ्गप्रसिद्धि (हेतुप्रसिद्धि)से होता है; सो इनकी विषयता (अनुमान आदि विषयाभाव)से जो अत्यन्त अप्रसिद्ध है इसी लिये वह अनुपम कहा गया है ॥ ३१ ॥ और प्रत्यक्षभाव (प्रत्यक्ष ज्ञानकी विषय)ता प्राप्त वह अर्हत् जिनभगवानोंको है, इस लिये उनसे कहा हुआ वह प्राज्ञोंसे (मोक्षसुख) ग्रहण किया जाता (जानाजाता) है, न कि छद्मस्थोकी परीक्षासे उसका बोध होता है ॥ ३२ ॥

यस्त्विदानीं सम्यग्दर्शनज्ञानचरणसंपन्नो भिक्षुर्मोक्षाय घटमानः कालसंहननायुर्दोषादल्पशक्तिः कर्मणां चातिगुरुत्वादकृतार्थ एवोपरमति स सौधर्मादीनां सर्वार्थसिद्धान्तानां कल्पविमानविशेषाणामन्यतमे देवतयोपपद्यते । तत्र सुकृतकर्मफलमनुभूय स्थितिक्षयात्प्रच्युतो देशजातिकुलशीलविद्याविनयविभवविषयविस्तरविभूतियुक्तेषु मनुष्येषु प्रत्यायातिमवाप्य पुनः सम्यग्दर्शनादिविशुद्धबोधिमवाप्नोति । अनेन सुखपरम्परायुक्तेन कुशलाभ्यासानुबन्धक्रमेण परं त्रिर्जनित्वा सिध्यतीति ॥

और जो सम्यग्दर्शन, ज्ञान, तथा चरण (चारित्र)मे युक्त साधु मोक्षके अर्थ चेष्टा करता है, किन्तु काल, सहनन तथा आयुःके दोपसे अल्पशक्ति (न्यून सामर्थ्य) होनेसे और कर्मोंकी अति गुरुताके कारण विना कृतार्थ हुए अर्थात् मोक्षप्राप्तिरूप कृतार्थताको न प्राप्त होकर उपराम भावको प्राप्त होता है, वह सौधर्म आदिमे लेकर सर्वार्थसिद्धपर्यन्त जो विमान विशेष है, उनमेंसे किसी एकमें देवता होकर उत्पन्न होता है । और वहांपर सुकृत कर्मोंके अर्थात् पुण्यकर्मोंके फलको भोगकर, पुन. स्थिति काल (जिस विमान वा देवयोनिविशेषमे जितना स्थितिका काल नियत है, उस नियत काल)के क्षय होनेके पश्चात् वहासे प्रच्युत होकर (गिरनेपर) देश (उत्तम देश), काल (उत्तम काल), जाति (सद्जाति), शील, विद्या, विनय, विभव (अनेक प्रकारके ऐश्वर्य), विषय (अनेक प्रकारके उत्तम विषयोंके सुख) तथा विस्तार (विस्तार वा विशालता) और विभूतियोंसे सहित मनुष्योंमे जन्म पाकर पुन. सम्यग्दर्शन आदि विशुद्ध बोधि, (सम्यग्दर्शन ज्ञानचारित्र) को प्राप्त होता है । इस सुखपरम्परा (सुखश्रेणि)से युक्त कुशलअभ्यासके अनुबन्धक्रमसे तीन बार इस संसारमे जन्म लेकर पुनः सिद्धतादशा (मोक्षसिद्धि)को प्राप्त होता है ।

वाचकमुख्यस्य ... प्रशिष्येण ।
शिष्येण घोषनन्दि... ...दः ॥ १ ॥
वाचनया च महावा... ...ादशिष्यस्य ।
शिष्येण वाचकाचार्यमूलनाम्नः प्रथितकीर्तेः ॥ २ ॥
न्यग्रोधिकाप्रसूतेन विहरता पुरवरे कुसुमनाम्नि ।
कौभीषणिना स्वातितनयेन वात्सीसुतेनार्घ्यम् ॥ ३ ॥
अर्हद्वचनं सम्यग्गुरुक्रमेणागतं समुपधार्य ।
दुःखार्त्तं च दुरागमविहतमतिं लोकमवलोक्य ॥ ४ ॥
इदमुच्चैर्नागरवाचकेन सत्त्वानुकम्पया दृब्धम् ।
तत्त्वार्थाधिगमाख्यं स्पष्टमुमास्वातिना शास्त्रम् ॥ ५ ॥
यस्तत्त्वाधिगमाख्यं ज्ञास्यति च करिष्यते च तत्रोक्तम् ।
सोऽव्याबाधसुखाख्यं प्राप्स्यत्यचिरेण परमार्थम् ॥ ६ ॥

जगत्प्रकाशक यशयुक्त शिवश्री नामक वाचकमुख्यके प्रशिष्य (पौत्रशिष्य,) और एकादशाङ्गवेत्ता श्रीघोषनन्दि क्षमणके शिष्य, ॥१॥ तथा वाचनारूपसे महावाचक क्षमण मुण्डपादके शिष्य प्रथित (प्रसिद्ध) कीर्ति वाचकाचार्य मूल नामके शिष्य ॥ २ ॥ स्वाति (तन्नामक पुरुष)के तनय, और वात्सी (इस नामकी स्त्री)के पुत्र, न्यग्रोधिका (स्थान)में उत्पन्न, कौभीषणी नाम गोत्रयुक्त कुसुमपुरमें विहार करते हुए ॥ ३ ॥ भलीभांति गुरुक्रमसे प्राप्त (गुरुपरम्परागत) इस अमूल्य अर्हत्प्रवचन (शास्त्र)को धारण (जानकर) तथा दुःखोंमें पीडित और दुष्ट आगमोंमें नष्टबुद्धि संसारको देखकर ॥ ४ ॥ जीवोंके ऊपर कृपा कर नागरवाचक (नागरवाचक शाखोत्पन्न) पूर्वकथित विशेषणयुक्त श्रीउमास्वातिने इस विशाल तत्त्वार्थाधिगम शास्त्रको स्पष्ट रूपमें भाषण किया ॥ ५ ॥ जो कोई इस तत्त्वार्थाधिगम नामक शास्त्रको जानेगा, और जैसा इसमें लिखा है वैसा करैगा, वह अव्याबाध (बाधारहित) परमार्थ सुख, अर्थात् मोक्ष सुखको शीघ्रही पावेगा ॥ शम् ॥

इति तत्त्वार्थाधिगमेऽर्हत्प्रवचनसङ्ग्रहे दशमोऽध्यायः समाप्तः ॥

इति तत्त्वार्थधिगमेऽर्हत्प्रवचनसग्रहे आचार्य्योपाधिधारि-प्रयागमण्डलान्तर्गत-हरिपुरनामकवास्तव्य-पूज्यपादमहामहोपाध्यायश्रीदामोदरशास्त्रिप्रधान-शिष्यठाकुरप्रसादशर्मप्रणीतभाषाऽनुवादे दशमोऽध्यायः ॥

समाप्तश्चायं ग्रन्थः ॥